सागरिका

संस्कृतत्रैमासिकी

षट्त्रिंशवर्षे अङ्कौ तृतीय-चतुर्थौ

संस्कृतव्याकरणविशेषाङ्कः

३६/३-४
विक्रमसंवत् २०५६

सागरिका समितिः
संस्कृतविभागः
डॉ.हरीसिंहगौरविश्वविद्यालयः, सागरम्

सागरिका

संस्कृतत्रैमासिकी

विक्रमसंवत् २०५६

◈

षट्त्रिंशवर्षे अङ्कौ तृतीय-चतुर्थौ

३६/३-४

◈

संस्कृतव्याकरणविशेषाङ्कः

◈

संस्थापकः प्रधानसम्पादकश्च

रामजीउपाध्यायः

◈

सम्पादकौ

राधावल्लभत्रिपाठी

कुसुमभूरिया

◈

प्रबन्धसम्पादकः

अच्युतानन्ददाशः

◈

सागरिकासमितिः

संस्कृतविभागः

डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम् (म.प्र.)

देयम्

प्रत्यङ्कम्	१५	रूप्यकाणि
वार्षिकम्	५०	रूप्यकाणि
आजीवनग्राहकस्य (व्यक्तिशः)	७५०	रूप्यकाणि
आजीवनग्राहकस्य (संस्थायाः)	१५००	रूप्यकाणि
अस्याङ्कस्य पृथङ्मूल्यम्	३०	रूप्यकाणि

अङ्कप्रकाशः प्रतिवर्षम् -- आषाढाश्विन -- पौष -- चैत्रमाषेषु
(जून-सितम्बर-दिसम्बर-मार्च)

पत्रव्यवहारसङ्केतः

डॉ.अच्युतानन्ददाशः

संस्कृतविभागः

डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम्- ४७० ००३

दूरभाष-फैक्स- ०७५८२-२३३६६

अक्षरसंयोजनम्

नरेश सैनी (संस्कृतविभागे)

डॉ.हरीसिंहगौरविश्वविद्यालयः सागरम्

अनुक्रमः

१.	त्रिमुनि-काल-विमर्शः	०७-१३
	कृष्णदेवः सारस्वतः	
२.	धर्महेतूर्ज्ञानं प्रयोगो वा ?	१४-१६
	कमलेशझाः	
३.	व्याकरणदर्शने शब्दशब्दस्यार्थः	१७-२३
	कोराडसुब्रह्मण्यम्	
४.	फलव्यापारयोर्धातुः	२४-४४
	राधामाधवो दाशः	
५.	किमिदं धातूनां सकर्मकत्वम् ?	४५-४८
	सच्चिदानन्दो मिश्रः	
६.	तुलनात्मकदृष्ट्या भवानन्दोक्त-कर्मभेदविवेचनम्	४९-५६
	अच्युतानन्ददाशः	
७.	वाक्यार्थमीमांसा	५७-६१
	दशरथचौधरी	
८.	महीयते व्याकरणदर्शनप्रभा	६२-७०
	करुणासिन्धुदासः	
९.	व्याकरणप्रस्थाने बुद्धिसत्ख्यातिवादः	७१-७६
	धर्मेन्द्रकुमारसिंहदेवः	
१०.	तदन्तविधिः	७७-८२
	बालशास्त्री	

११. समानाक्षरसंज्ञाविषये किञ्चित् ८३-८७

निर्मला कुलकर्णी

१२. रप्रत्याहारविषये शाब्दिकानां मतान्तराणि ८८-६६

सौ. भाग्यलता पाटसकर

१३. पाणिनीयव्याकरणे धातुभ्यो विहितानां प्रत्ययानां ६७-१२०
तदाश्रितानामङ्गानां च विज्ञानम्

दीक्षितपुष्पा

१४. श्री-पेरि-सूर्यनारायण-शास्त्रि-विरचित- १२१-१२५
भूषणसारव्याख्या-तत्त्वदर्शिनी-विवेचम्

एस. रङ्गनाथः

१५. शब्दसद्भावसाधने कविकर्णपूरस्य वैशिष्ट्यम् १२६-१३१

रमाकान्तपाण्डेयः

१६. संस्कृत-व्यारकणं प्रति उत्कलीय- १३२-१५१
वैयाकरण-श्रीवैजलदेव-विरचितायाः
प्रबोध-चन्द्रिकायाः (वैजल-कारिकायाः) अवदानम्

बनमाली विश्वालः

१७. श्रीहरिनामामृतव्याकरणस्य शास्त्रीयवैशिष्ट्यम् १५२-१६५

सुनेलि देई

१८. पण्डितराज-शास्त्ररत्नाकर-वे-सुब्रह्मण्यशस्त्री— १६६-१७१
विरचिता शाब्दतरङ्गिणी : एकं विहगावलोकनम्

रिछारिया ब्रजेशकुमारः

१६. पाणिनीयव्याकरणेऽर्थतत्त्वं सम्भाषणसन्दर्भश्च १७२-१७७

बसन्तकुमारो भट्टः

सम्पादकीयम्

(शब्दमायेति शब्दितम्)

शब्दस्वरूपमधिकृत्य विप्रतिपद्यन्ते तान्त्रिकाः। शब्दो नित्यः आहोस्वित् कार्य इति विषयमधिकृत्य महती खलु विचारपदवी समतिक्रान्ता तान्त्रिकैः शास्त्रार्थगहनेंऽध्वनि। शब्दो वर्णात्मकः ध्वन्यात्मकश्चेति पक्षाभ्यां विकल्प्य वर्णात्मक स इति पक्षमवलम्ब्य वर्णानामुच्चरितप्रध्वंसितत्वात् पूर्वपूर्ववर्णोच्चारण–जनतिसंस्कारसहकृत–अन्तिमवर्णो वाचक इति पक्षं द्रढयन्तः केचन शास्त्रकाराः शब्दस्यानित्यत्वं साधयन्ति। तावतैव शब्दस्य व्यवहारसाधनत्वं सिद्ध्यति, तत्रैव च तस्य प्रयोजनं पर्यवसितमिति एका सरणिः।

अपरा सरणिस्तु शब्दस्य भर्तृहरिप्रमुखैः वैयाकरणैः प्रख्यापिता दृश्यतेऽतिप्रशस्ततमा यत्र परब्रह्म–पर्यायभूतः शब्दब्रह्मेति शब्दितः जगदभिन्न–निमित्तकारणीभूतो नित्यः शब्द इति जेगीयते मनीषिभिः। तत्रैकतः परा–पश्यन्ती–मध्यमा–वैखरीभेदेन शब्दस्य चतुर्धा विभागो विकल्पितः व्यवहारसाधनता चास्य सम्यग्व्यवस्थापिता च। अपरतश्च अर्थजगतः विवर्तकारणरूपं शब्दतत्त्वं शब्दब्रह्मेति शब्दितम् ''यतः प्रवृत्तिर्भूतानि येन सर्वमिदं ततम्'' इति मन्त्रवर्णः तत्रैकवाक्यतामेति। अपरोऽपि मन्त्रः तमेवार्थं खल्वेवमाह–

''वागेव विश्वाभूवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम्।
अथेद् वाग् बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह।।'' इति

तदस्मिन् 'शब्दब्रह्मणि निष्णातस्य परब्रह्म अवभाति, शब्दब्रह्मानु–सन्धित्सोः परं च तत्परायणम्, तदेवास्य परमपुरुषार्थसाधनमिति दर्शनं सुव्यवस्थितं दृश्यते। श्रीमद्भागवतेऽपि

शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः परः।
ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः।। (श्रीमद्भा. 3.12.48)

एतद्दर्शनं तु तथा समुपबृंहितं तथा साङ्गोपाङ्गोपनिबद्धं यथैवास्यैव दर्शनस्य विततं रूपं शाङ्कराद्वैतवेदान्ते दर्शनरान्तररूपेण समानान्तरेण सुविन्यस्तं दृश्यते इति केचनार्वाचीनविद्वांसः प्रतिपद्यन्ते।

परन्त्वस्त्यत्र शब्ददर्शनेऽपरोऽपि कश्चन पक्षः सः प्रायशस्तान्त्रिकैस्तथा न परामृष्टो नापि व्यापकतयास्य विचारः प्रवर्तित इति साश्चर्यं वयमुत्पश्यामः। तद्दर्शनं शब्दस्य मायासायुज्यतामुपन्यस्यति। देव्यथर्वशिर्षोपनिषदि दृश्यते मन्त्रवर्ण्यः :–

''वाङ्माया ब्रह्मभूः'' इति

तत्र सामानाधिकरण्यप्रयोगदर्शनेन वाचः मायया तादात्म्यं सुस्पष्टं भवति। मायात्मा वागवे ब्रह्मभूः सर्वप्रसवित्री इत्यर्थो ज्ञायते। अनेन परब्रह्मणः शक्तिस्थानीया माया वाग्रूपा वर्तते, यतः सर्वस्यार्थजगतः प्रवृत्तिर्भवतीति ज्ञातुं शक्यते।

इदं तु दर्शनं परब्रह्मणः दृष्ट्या शब्दब्रह्मणः मायात्मनोऽवरत्वं प्रख्यापयति। दृश्यते खलु श्रुतिषु :—

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति।।

(मैत्रायण्यु. 6.22)

''जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते'' इति (गीता 6.44) भगवद्गीतावचनमपि मायात्मनः शब्दब्रह्मणोऽतिवर्तनं ब्रूते।

तत्र ब्रह्मविन्दूपनिषदि दृश्यते—

शब्दमायावृतो यावत्तावत्तिष्ठति पुष्करे।
भिन्ने तमसि चैकत्वमेकमेवानुपश्यति।। (15) इति

अत्रापि शब्दमायेति पदेन शब्दः मायास्थानीयो भवतीति स्पष्टम्। सा च माया अविद्यारूपेति मन्त्रस्योत्तरार्धगतेन 'तमसि' इति पदेन स्पष्टतरं भवति। निर्विकारं खलु अमृतं ब्रह्म अविद्यया भेदरूपेण विवर्तते इति प्राचीना स्मृतिः। प्राचीनामभियुक्तोक्तिमुद्धरति भर्तृहरिरपि वाक्यपदीयस्वोपज्ञोवृत्तौ :—

''तथेदममृतं ब्रह्म निर्विकारमविद्यया।
कलुषत्वमिवापन्नं भेदरूपं विवर्तते।।
ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।
विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।'' इति

शब्दस्य मायास्थानीयत्वेनैवास्याधस्तादुक्तमन्त्रस्य व्याख्यानं सुस्पष्टतरं भविष्यति। एवं ह्याह —

''सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिनिष्यन्दमानाम्।
उतान्ये विदुरन्यामिव च एनां नानारूपामात्मनि सन्निविष्टाम्।।'' इति।

अतएव ''वागेव प्रकृतिः परा'' इति गीयते। प्रकृतिस्त्रिगुणात्मिका मायेति वेदान्तिनो वदन्ति। सा हि ब्रह्मणः शक्तिस्थानीयास्ति। शक्तिरूपत्वे स्वीकृते शक्ति--शक्तिमतोऽभेद इति शब्दाद्वैतवादस्य प्रतिष्ठापि सुतरां वज्रलेपायिता भविष्यति।

परन्तु शब्दस्य मायाऽविद्यास्थानीयता वेति दर्शनं किमिति न तथा प्रथितं नापि सुविस्तृतमुपन्यस्तमिति विचारयन्तु धीधना इति सप्रश्रयं विनिवेदयामो वयम्। संस्कृतव्याकरणशास्त्रीयशोधक्षेत्रेऽभिनवं किञ्चिद् दर्शनमेतत्प्रख्यापयिष्यतीति दृढं विश्वसिमो वयम्।

अत्रास्मिन् सागरिका—व्याकरणशास्त्रीयविशेषाङ्के नैके विषयाः आधुनिकानुसन्धित्साप्रवृत्तिं प्रदर्शयतीति ते ते रचयितारः सभाज्यन्ते साधुवादैः कृतज्ञतातितिभिश्चेति शम्।।

प्रबन्धसम्पादकः

त्रिमुनि-काल-विमर्शः

कृष्णदेवः सारस्वतः

वैदिकैः ऋषिभिः महादेवस्य शब्दस्य वर्णनं कुर्वद्भिः 'त्रयो अस्य पादाः' इत्युक्तम्। पतञ्जलिना तत्र व्याख्यायां 'त्रयो अस्य पादाः = त्रयः काला भूत-भविष्यद्-वर्तमानाः' इत्युक्तम्। (महाभाष्य पस्पशाह्निक)

महर्षिणा पाणिनिना '०तत्कालस्य' १.१.७०, 'ऊकाल०', १.२.२७, कालोपसर्जने०' १.२.५७, 'कालाः' २.१.२८, 'पूर्वकाल०' २.१.४९, 'कालाः०' २.२.५, 'कालाध्वनोः०' २.३. ५, '०काले०' २.३.६४, 'कालविभागे०' ३.३.१३७, 'काल०' ३.३.१६७, '०पूर्वकाले' ३.४.२१, '०कालेषु' ३.४.५७, 'कालेभ्यः' ४.२.३४, 'कालात्०' ४.३.११, 'कालात्०' ४.३.४३, 'कालात्' ५.१.७८, 'कालाद्' ५.१.१०६, 'कालप्रयोजनाद्०' ५.२.८१, 'कालेषु' ५.३.२७, 'काले' ५.३.१५, 'काले' ५.४.२८, 'कालात्०' ५.४.३३, '०काल०' ६.२.२९, '०काल०' ६.२.१७०, '०काल०' ६.३.१५. '०काल०' ६.३.१७, '०अकालात्' ६.३.१८, 'अकाले' ६.३.८१, अष्टाविंशतिधा कालशब्दस्य प्रयोगः कृतः।

तत्र ''तपरस्तत्कालस्य'' १.१.७०, इति सूत्रे कालशब्दः वर्णबोधकः 'कालसहचरितो वर्णोऽपि काल एव' (महा. १.१.६९) 'ऊकालोऽज्झस्वदीर्घप्लुतः' इति सूत्रेऽपि कालशब्दः वर्णबोधक एव (महा. १.२.२७) तत्कालकाल, ऊकालकाल इति उत्तरपदलोपेन अर्थावगतिः।

'कालोपसर्जने च तुल्यम्' १.२.५७ इति सूत्रेण पाणिनेः कालविषयको विचारः सुस्पष्टः। तन्मतेन कालः अशिष्यः, तस्य परिभाषा अकथनीयाः, तस्य भेदाः अकर्त्तव्याः, कस्मात्? अर्थस्य अन्यप्रमाणत्वात्। लोकतोऽर्थावगतेः। यैरपि व्याकरणं न श्रुतम्, तेऽप्याहुः, इदमस्माभिरद्य कर्त्तव्यम्, इदं श्वः कर्त्तव्यम् इदं ह्यः कृतमिति। नैवं व्युत्पाद्यन्ते। यश्च लोकतोऽर्थः सिद्धः, किं तत्र यत्नेन। (काशिका १.२.५७)

महामुनिः भर्तृहरिः कालविदां कालविषयिकीं धारणां स्पष्टीकुर्वन्नाह–

आदित्यग्रहतारादि–परिस्पन्दमथापरे।
भिन्नमावृत्तिभेदेन कालं कालविदो विदुः।। इति

तेन कालस्तु क्रियाविशेष इष्यते। (न्यासः १.१.७०) कालस्तु क्रिया (न्यास. १.२.२८)

भाष्येऽपि पतञ्जलिः कं पुनर्भवान् कालं मत्वाऽऽह? येन मूर्त्तीनां उपचयाश्च अपचयाश्च लक्ष्यन्ते, तं कालमित्याहुः। तस्यैव हि कयाचित् क्रियया युक्तस्याऽहरिति च भवति, रात्रिरिति च। कया क्रियया? आदित्यगत्या। तयैवाऽसकृदावृत्तया 'मासः' इति भवति, 'संवत्सरः इति च भवति।' (महाभाष्य २.२.५)

'अहः' 'रात्रि' 'मास' 'मुहूर्त' 'सर्वरात्र' इत्यादयः शब्दाः कालवाचिनः (२.१.२८) पूर्वकाल, अपरकाल इति तस्य भेदः (२.१४९) यद्यपि कालः प्रस्थादिवत् सर्वतो मानं न भवति, तथापि परिच्छेदहेतुत्वात् परिमाणमित्युच्यते। 'मासो जातस्य' इत्यत्र मासः जातस्य परिच्छेदको न, नापि जननक्रिया। कोऽर्थस्तस्य इति चेत् जननक्रियाया ऊर्ध्वमस्य मासो जातः, अतीते मासेऽस्य जननम् इति। अनेन प्रकारेण मासो जातस्य परिमाणम् (पदमञ्जरी २.२.५)

कालस्य क्रिया–गुण–द्रव्यैः साकल्येन संबन्धः अत्यन्तः संयोग उच्यते। मासं अधीते। संवत्सरम् अधीते। मासं कल्याणी। संवत्सरं कल्याणी। मासं गुडधानाः (काशिका २.३.५)

पाणिनिना कालशब्दस्यान्यावपि पर्यायवाचिनौ 'समय' (३.३.१६७) 'बेला' (३.३.१६७, ४.३.१६) शब्दावपि प्रयुक्तौ।

कालस्य प्रथमो भेदः भूतः। यस्य स्वसत्ता व्यपवृक्ता तत्सर्वं भूतशब्देनोच्यते। काल एव भूतादिशब्दवाच्यत्वेन सुप्रसिद्धः। तत्र केचिन्नित्यं कालं परार्थानामनुज्ञा प्रति–बन्धार्थाभ्यां स्थित्युत्पत्तिप्रलयहेतुमाचक्षते। तत्र संसर्गिसूर्यादिक्रियाभेदाश्रयो मासादिभेदव्यवहारो भूतादिव्यपदेशश्च। अन्ये तु प्रसिद्धपरिमाणक्रिया सूर्यादिकर्तृका अप्रसिद्धपरिमाणायाः क्रियायाः परिच्छेदायोपात्ता अहरादिव्यपदेश्या काल इत्याहुः। (प्रदीप, महाभाष्य ३.४.८४)।

धातौ भूते। धातुर्वै शब्दो, न च शब्दस्य भूत–भविष्यद्–वर्त्तमानतायां संभवोऽस्ति। शब्देऽसंभवादर्थे कार्यं विज्ञास्यते। कः पुनर्धात्वर्थः? क्रिया। क्रियायां भूतायाम्। (महाभाष्य ३.२.८४)

तस्य भूतस्य चत्वारो भेदाः। भूतसामान्यम्, तत्र क्रियायां लुङ्। अनद्यतने भूते लङ्। अनद्यतने परोक्षेभूते लिट्। अनद्यतनेऽपरोक्षे भूते स्म उपपदे लट्। (३.२.११०, १११, ११५, ११९)

'प्रकृतः कटं देवदत्तः' इत्यत्र आदिकर्मणि निष्ठा। 'न्याय्या त्वाद्यपवर्गात्'। न्याय्या त्वेषा भूतकालता। कुतः? आद्यपवर्गात्। आदिरत्राऽपवृक्तः। एष च नाम न्याय्यो भूतकालो यत्र किंचिदपवृक्तं दृश्यते। (महाभाष्य ३.२.१०२)

आदिभूते एवावयवे समूहरूपस्य समाप्तत्वादस्ति भूतत्वोपपत्तिरित्यर्थः। तदुक्तं हरिणा–

समूहः सः तथाभूतः प्रतिभेदं समूहिषु।
समाप्यते ततोऽभेदे कालभेदस्य संभवः।। इति

(प्रदीप. ३.२.१०२)

किं शक्यन्त एते शब्दाः प्रयोक्तुमित्यतो न्याय्यैषा भूतकालता? नावश्यं प्रयोगादेवं। क्रियानामेयमत्यन्तापरिदृष्टाऽनुमानगम्याऽशक्या पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुठित। साऽसौ येन येन शब्देनाऽभिसंबध्यते तावति तावति परिसमाप्यते। तद्यथा–कश्चित् पाटलिपुत्रं जिगमिषुरेकमहर्गत्वाऽऽह– 'इदमद्य गतमिति'। न च तावताऽस्य व्रजिक्रिया परिसमाप्ता भवति। यत्तु गतं तदभिसमीक्ष्यैतत् प्रयुज्यते–'इदमद्यगतमिति'। एवमिहापि यत्कृतं तदभिसमीक्ष्यैतत् प्रयुज्यते–'प्रकृतः कटं देवदत्तः' इति। यदा हि वेणिकान्तः कटोऽभिसमीक्षितो भवति, 'प्रकरोति कटम्' इत्येव तदा भवति।

(महाभाष्य– ३.२.१०२)

यावदभिमतफलप्रयोजनसकलक्रियापरिसमाप्तिर्न भवति, तावद्वर्तमानत्वमेव क्रियाया न तु भूतत्वम्। ततश्च वस्तुशून्या एवाऽमी शब्दाः प्रयुज्यन्ते इति भावः।

परं = प्रधानं प्रमाणं प्रत्यक्षम्। अनुमानस्य तत्पूर्वकत्वात्, तेन क्रिया न दृश्यते। अवयवसमूहस्य युगपदनुत्पादानवस्थानाच्च तदुक्तम्–

क्रमात् सदसता तेषामात्मानो न समूहिनाम्।
सद्वस्तुविपर्यैर्यान्ति संबन्धं चक्षुरादिभिः।। इति

शब्देन प्रत्याय्यमाना येन येनावयवेन संबध्यते, समूहरूपा क्रिया, तस्मिन्नेवावयवे समाप्यते। तत्रावयवानां कालत्रययोगात् क्रियाया अपि कालत्रययोगः। (प्रदीप ३.२.१०२)।

अद्यतनेऽपि अद्यतनो विद्यते। कथम्? व्यपदेशिवद्भावेन। (महाभाष्य ३.२ १११)

यथा मुख्ये भेद आधाराधेयभावो भवति, 'तटे तिष्ठति' इति, तथेहापि समुदायावयवभेदाश्रयेण समुदायेऽद्यतनेऽवयवा अद्यतनाः सन्तीत्यनद्यतनो न भवतीत्युच्यते। ननु तत्त्वतोऽवयवव्यतिरिक्तोऽत्र समुदाय आधारोऽस्ति। तदुक्तं हरिणा —

कालस्यापरं कालं निर्दिशन्त्येव लौकिकाः।
न च निर्देशमात्रेण व्यतिरेकोऽनुगम्यते।। इति

(प्रदीप ३.२ १११)

तत्र न्याय्यो वर्त्तमानकालो, यत्रारम्भोऽनपवृक्तः, प्रवृत्तस्याविरामेऽपि आरभ्योऽनपवृक्तः। 'भुङ्क्ते देवदत्तः' इत्यत्रापि देवदत्तो ह्यवश्यं भुञ्जानो हसति वा जल्पति वा पानीयं वा पिबति।

उक्तं हरिणा—

व्यवधानमिवोपैति निवृत्त इव दृश्यते।
क्रियासमूहो भुज्यादिरन्तरालप्रवृत्तिभिः।।
न च विच्छिन्नरूपोऽपि सोऽविरामान्निवर्त्तते।
सर्वैव हि क्रियाऽन्येन संकीर्णेवोपलभ्यते।।
तदन्तरालदृष्टा वा सर्वैवावयवक्रिया।
सादृश्यात्सति भेदे तु तदङ्गत्वेन गृह्यते।।

(प्रदीप ३.२.१२३)

नित्यप्रवृत्ते 'तिष्ठन्ति पर्वताः' स्रवन्ति नद्यः' इत्यादौ असत्यपि कालविभागे प्रयोगादेव कालविभागो ज्ञास्यते। यतोहि भूतभविष्यद्वर्तमानानां राज्ञां याः क्रियास्तास्तिष्ठतेर–धिकरणम्। 'तिष्ठन्ति पर्वताः' इत्यत्र संप्रति ये राजानस्तेषां वा क्रियास्तासु वर्त्तमानासु। 'स्थास्यन्ति पर्वताः' इत्यत्र इत उत्तरं ये राजानो भविष्यन्ति तेषां याः क्रियास्तासु भविष्यन्तीषु। 'तस्थुः पर्वता इत्यत्र ये राजानो बभूवुस्तेषां याः क्रियास्तासु भूतासु। (महाभाष्य ३.२.१२३)

प्रसिद्धपरिमाणा क्रियैव क्रियान्तरपरिच्छेदात् काल इत्युक्तम्। तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं कालत्रयोपयोगश्चोपपन्न इत्यर्थः।

उक्तञ्च हरिणा—

परतो भिद्यते सर्वमात्मा तु न विकल्पते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते॥
प्रसिद्धभेदा व्यापारा विरूपावयवक्रियाः।
साहचर्येण भिद्यन्ते सरूपावयवक्रियाः॥ इति॥

अपर आह — नास्ति वर्तमानः काल इति।

अपि चात्र श्लोकानुदाहन्ति :—

न वर्त्तते चक्रमिषुर्न पात्यते,
न स्पन्दन्ते सरितः सागराय।
कूटस्थोऽयं लोको न विचेष्टिताऽस्ति
यो ह्येतं पश्यति सोऽप्यनन्धः॥

न वर्त्तत इति। परिवर्त्तनक्रियायाः वर्त्तमानाया अभावात् इति भावः। कूटस्थ इति॥ स्वरूपस्थो न तु वर्त्तमानक्रियाविशिष्ट इत्यर्थः। अत एवाह॥ न विचेष्टितेति॥ व्यापारस्य न कर्त्तेत्यर्थः। एवं यो वेत्ति सोऽप्यनन्धः — किं पुनर्योऽनुष्ठाता योगीत्यर्थः। स ह्यविकृतमात्मतत्त्वं भावयन् प्रत्यक्षीकरोति। तथा चोक्तं भगवता—

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषाम् आदित्यवज्ज्ञानं प्रकाशयति तत्परम्॥ इति

मीमांसको मन्यमानो युवा मेधाविसंमतः।
काकं स्मेहानुपृच्छति किं ते पतितलक्षणम्॥

मीमांसकः = विचारकः। युवा इत्यनेन पाटवं प्रज्ञाया दर्शयति। पतितलक्षणम् इति पातः पतितं तस्य कि रूपं नास्त्येव पतनक्रियेत्यर्थः।

(प्रदीप ३.२.१२३)

अनागते च पतसि अतिक्रान्ते च काक न।
यदि संप्रति पतसि सर्वो लोकः पतत्ययम्।।

अनागतत्वादेवाऽसन्त्वात् पातक्रियायाः पतसीति व्यपदेशोऽनुपपन्नः इत्यर्थः। अतिक्रान्त इति। तथैव क्रियाया असत्वात्। सर्वो लोक इति। क्रियाया वर्त्तमानत्वाभावेऽपि यदि 'पतसीति' व्यपदेशस्तदा विशेषाभावात् पर्वतादावपि पतसीति व्यपदेशप्रसङ्गः इत्यर्थः। (प्रदीप ३.२.१२३)

अनागतमतिक्रान्तं वर्तमानमिति त्रयम्।
सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते।।

अनागतमिति। एक एव क्षणः उपलभ्यते नातीतो नाप्यनागतो, न चैकस्य क्षणस्य गमनादिक्रियावेशः सम्भवतीति भावः।

क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम्।
तत्समीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन्।।

परिहारः। हेतुः प्रयोजनं, गमनस्य देशान्तरप्राप्तिः तदर्थं फलार्थमित्यर्थः। इह प्रत्यभिज्ञानात् क्षणभङ्गनिरासे देवदत्तस्य देशान्तरप्राप्तिर्निहेतुका न संभवतीति गमनक्रियैवै तस्या निमित्तम्। तत्रानेकलक्षणसमूहात्मकं क्रियाप्रबन्धरूपं बुद्धया संकलय्य गच्छतीत्यादि प्रयुज्यत इत्यर्थः। अविचारयन्निति। कुविकल्पकलङ्करहितमित्यर्थः।

अपर आह— अस्ति वर्त्तमानः काल इति। आदित्यगतिवन्नोपलभ्यते। अपि चात्र श्लोकमुदाहरन्ति—

विसस्य बाला इव दह्यमाना,
न लक्ष्यते विकृति सन्निपाते।
अस्तीति तां वेदयन्ते त्रिभावाः,
सूक्ष्मो हि भावोऽनुमितेन गम्यः।।

विसस्येति। विसस्य बाला विसे दह्यमाते दह्यमाना अपि न प्रत्यक्षं दह्यमान—त्वेनावसीयन्ते। किं तर्ह्यनुमानेन, विसान्तर्गतत्वात् तद्दाहे तेषामपि दाहः प्रतीयते। तथा कारकसंनिपात एकैकक्षणग्रहणे क्रियावेशलक्षणा विकृतिः प्रत्यक्षेण न लक्ष्यते। तां तु त्रिभावाः, अस्तीति निश्चिन्वन्ति। त्रिषु कालेषु भावो भावना येषां ते त्रिभावा = योगिनः,

ये भावनावशेन त्रीनपि कालान् योगिप्रत्यक्षेण विदन्ति। सूक्ष्म इति। अनेकक्षणसमूहात्मकस्य धातुवाच्यस्य अर्थस्य क्रियारूपस्य युगपदसंनिधानादनुमीयत इत्यर्थः। (प्रदीप ३.२.१२३)

भविष्यत् कालो द्विधा। अद्यभावो नास्त्यस्मिन् इति अनद्यतनः (अनद्यतने लुट् ३.३.११५) शेषश्च (लृट् शेषे च ३.३.१३)

—इत्थं मुनित्रययमतेन कालविषयिकीधारणायाः सारं एवं प्रतिपादयितुं शक्यते—

१. कालेन सहचरितः वर्णः कालः।

२. येन मूर्त्तीनां उपचयाश्च अपचयाश्च लक्ष्यन्ते, स कालः।

३. आदित्यगत्या = क्रियया अहरिति च रात्रिरिति च भवति।

४. कालः प्रस्थादिवत् न सर्वतो मानम् तथापि परिच्छेदहेतुत्वात् मानम्।

५. नित्यः कालः। पदार्थानां अनुज्ञाप्रतिबन्धार्थाभ्यां स्थित्युत्पत्ति—प्रलयहेतुः।

६. यस्य स्वसत्ता व्यपवृक्ता स भूतः। आरम्भो यत्रानपवृक्तः स वर्त्तमानः कालः।

७. प्रसिद्धपरिमाणा क्रियैव क्रियान्तरपरिच्छेदात् कालः।

८. क्रियाया एव भूत—भविष्यद्—वर्त्तमानता। न शब्दस्य।

धर्महेतुर्ज्ञानं प्रयोगो वा?

कमलेशझाः

अथ भाष्यकृद्भिः सप्रपञ्चं व्यवस्थापितम् – लोकत एव शब्दार्थसम्बन्धे सिद्धे अर्थज्ञानप्रयोजनकृते शब्दप्रयोगेऽपि सिद्धे शास्त्रं धर्मनियमं कुरुते "साधवः शब्दा प्रयुज्यमाना धर्मं जनयन्ति न तु अपभ्रंशाः" इति। प्रसङ्गतः "अस्त्यप्रयुक्तः[1]" इत्यादिना केषांचन शब्दानामप्रयुक्तत्वमाह "सर्वे देशान्तरे[2]" इति वाक्येन सिद्धान्तितं यत्नदृश्यः प्रयोग एष्टव्य इति।

एवं च व्याकरणशास्त्रस्य नियमार्थत्वं पर्यवसीयते। आह च भगवती श्रुतिः– "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवतीति"[3]। अत्र ज्ञानप्रयोगयोरुभयोः श्रवणात् "यदैकस्मादपूर्वं तदेतरत् तदर्थमि"[4]ति न्यायेन एकस्य प्राधान्यमपरस्य च गौणत्वं कल्पनीयम्।

अथ शब्दः सम्यग्ज्ञातः कामधुग्भवति सुप्रयुक्तत्वान्न तु केवलं सम्यग्ज्ञातत्व–मनुमीयते। उताहो शब्दः सुप्रयुक्तः कामधुग्भवति सम्यग्ज्ञानात्तु सुप्रयुक्त्वं भवतीति विकल्पयोर्मध्ये प्रथमविकल्पः "प्रथमं वा नियम्येत[5]" इति न्यायेन संगच्छते।

परन्तु साधुशब्दज्ञाने धर्म इत्यङ्गीकारे शब्दज्ञानवतः भूयसामपशब्दानां ज्ञानसत्त्वाद् धर्मापेक्षया अधर्मबाहुल्यं प्रसज्येत।

अथ "तेऽसुरा ..... पराबभूवु[6]" इति श्रुत्या अपशब्दप्रयोगादधर्मप्रतिपादनात् साधुशब्दप्रयोगाद् धर्मो। न तु ज्ञानादिति पक्षः आश्रीयेत चेद् व्याकरणे अकृतश्रमाणामपि धर्मोऽभ्युदयश्च प्राप्नुयादेवं च व्याकरणाध्ययनप्रयत्नो व्यर्थः स्यात्। किं च "सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते[7]" इति न्यायेन प्रयोगस्यैव धर्महेतुत्वमास्थेयं न तु ज्ञेयशेषस्य ज्ञानस्य। किं च ज्ञानस्य दृष्टं फलं प्रयोगः "सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यन्त्वम्" इति नयेन ज्ञानस्य न धर्मजनकत्वमपितु प्रयोगस्येति द्वितीयो हेतुः।

किञ्च ''फलवत्सन्निधौ अफलं तदङ्गमितिन्यायेन ज्ञानं प्रयोगाङ्गभूतमिति तस्यैव धर्महेतुता युज्यते। स्वर्गादिरूपे फले सन्निधिपाठरूपस्थानप्रमाणेन प्रयोगस्यान्वयो युज्यते न ज्ञानस्येति तृतीयो हेतुः।

किन्तु व्याकरणे कृतश्रमस्यापि कदाचित् कौशलव्यतिरेकवत् फलव्यतिरेकोऽपि स्यादिति व्याकरणाध्ययनविषयकप्रयत्नवैयर्थ्यापत्त्या प्रयोगस्य धर्महेतुत्वाङ्गीकारो न युज्येतेति प्रयत्नानर्थक्यं भवतीत्यादिना वाक्योपष्टभेन ज्ञानस्यैव धर्महेतुता प्रतिपादिता।

वस्तुतस्तु ''शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन''[८] इति वार्तिकमुखेन शब्दानां व्याकरणाध्ययनज्ञानपूर्वकप्रयोगेण धर्म इति सिद्धान्तितम्।

किञ्च ''योऽग्निष्टोमेन यजते य उचैनमेवं वेदे''[९]ति श्रुतिस्वारस्येन यथा नियमपूर्वमधीताः वेदशब्दाः ज्योतिष्टोमादिकर्मानुष्ठानाङ्गविशिष्टबोधेन फलवन्तो भवन्ति तथा देवदत्तः पचतीत्यादयः शब्दाः प्रकृत्यादिविभागवत्तया विदिताः सन्तः प्रयुक्ता अभ्युदयहेतुतां भजन्ते। एवं च ज्ञानपूर्वकात् क्रत्वनुष्ठानात् फलोत्पत्तिवत् ज्ञानपूर्वकात् शब्दप्रयोगादेवधर्मोत्पत्तिरिति न्याय्यः पन्थाः।

तत्त्वविदस्तु शब्दज्ञानस्यैव धर्मफलकत्वमभ्युपयन्ति। एतन्मते ज्ञाने धर्म इत्येष सिद्धान्तः।

अत एव भाष्ये ''अथ गौरित्यत्र कः शब्दः[१०]'' इति प्रस्तावे शब्दस्वरूपं द्विधा प्रदर्श्य समाहितम्। तत्र ''येनोच्चारितेनेत्यादिना[११]'' स्फोटस्य सिद्धान्तिसम्मतस्य शब्दत्वमभिधीयते। ''ध्वनिः शब्द[१२]'' इत्युक्त्या तु प्रसिद्धो ध्वनिः शब्दत्वेन निरूप्यते।

तथा च ध्वनिरूपं शब्दमाश्रित्य शास्त्रपूर्वके प्रयोगे अभ्युदयहेतुता प्रोच्यते–स्फोटशब्दमाश्रित्य तु ज्ञाने धर्म इत्येष सिद्धान्तो राजते।

कौस्तुभकृन्मते धर्मजनकत्वं प्रयोगस्य[१३] न तु ज्ञानमात्रस्य। तत्र शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देने[१४]''ति वार्तिके प्रयोगशब्दोपादानमेव विनिगमकम्। भाष्ये ज्ञानस्य धर्मफलकत्वसमर्थनं तु अभ्युपेत्यवादेनेति बोध्यम्।

एतन्मते यद्यपि ''एकः शब्दः'' इत्यादिश्रुतौ सम्यग्ज्ञातः सुप्रयुक्तः इत्युभयो–रुपादानेन उभयोर्ज्ञानप्रयोगयोः अभ्युदयहेतुत्वं प्रतीयते तथापि प्रतिपदाधिकरणन्यायेन प्रयोगस्य फलं प्रति साक्षात् कारणता ज्ञानस्य तु प्रयोगाङ्गत्वेन प्रयोजकता यदैकस्मादपूर्वं तदा इतरत् तदर्थमित्यु[१५]''क्तेरिति शम्।।

संदर्भा:

१. म.भा.पस्पशा. पृ. ३५

२. म.भा.पस्पशा. ९/०७५०३८

३. म.भा. ६/१/८४

४. उद्धृत म.भा. पस्पशा. उद्योत पृ. ३९

५. मीमांसासूत्रम् – ११/१/४३

६. म.भा. पस्पशा. पृ. ११

७. मी.द.त.वा. १/३/८

८. म.भा. पस्पशा. वा. ११ पृ. ४०

९. म.भा. पस्पशा. उद्धृत पृ. ४०

१०. म.भा. पस्पशा. पृ. – ५

११. म.भा. पस्पशा. पृ. – ७

१२. म.भा. पस्पशा. पृ. – ७

१३. श. कौ. पृ.–२६ प्रथमाह्निकम्

१४. म.भा. पस्पशा. का. वा. –१००

१५. उद्धृत म.भा. पस्पशा. उद्योत पृ.–३९

व्याकरणदर्शने शब्दशब्दस्यार्थः

कोराडः सुब्रह्मण्यम्

शब्दशास्त्रमिति प्रथिते व्याकरणदर्शने शब्दशब्दः बहुष्वर्थेषु प्रयुक्तः। किन्तु नैकत्र साकल्येन तेऽर्थाः विवेचितास्सन्ति। पदशास्त्रमिति च नाम प्राधान्येन व्यपदेश भवतीति न्यायमनुसृत्यैव प्रथितमस्ति। यतो हि वाक्यशास्त्रे न केवलं वाक्यस्य किन्तु वर्ण–पद–महावाक्य–प्रामणानामपि चर्चाऽकारि। प्रमाणशास्त्रेऽपि न केवलं प्रमाणानां किन्तु वर्ण–पद–वाक्य–महावाक्यानां विश्लेषणं दरीदृश्यते। न्यायशब्दस्य पञ्चावान्तर–वाक्यरूपाणामवयवानां संघातरूपे न्यायमहावाक्ये शक्तिरित्यादि सप्रमाणं न्यरूपि अस्मदीये महावाक्यविचारे। एवमेव व्याकरणेऽपि वर्णवाक्यमहावाक्यादिषु गच्छत्सु विषयतां पदशास्त्रमिति प्रथा तद्वत्प्रकृतिप्रत्ययादिविश्लेषणपूर्वकपदस्वरूपनिरूपणबाहुल्यमनुसृत्यैव। नो चेत् ''अथ पदानुशासनमि''त्येवावक्ष्यत्। नेत्याह।

तस्माद् इदमत्र संक्षेपेण विचार्यते यद् अथ शब्दानुशासनमित्यत्र को वाऽभिधेयः शब्दशब्दस्य? स्वं रूपं शब्दस्याशब्दसंज्ञा (१.१.६८) वचोऽशब्दसंज्ञायाम् (७.३.६७) शब्ददर्दुरं करोति (४.४.३४) इत्यादि पाणिनिवाक्येषु, सिद्धे शब्दार्थ सम्बन्धे'' इत्यादि कात्यायनवाक्येषु, ''शब्दतत्त्वं यदक्षर''मित्यादिहरिवचनेषु च शब्दशब्दः कमर्थं प्रत्याययतीति।

प्रायेण शब्दशब्दः एष्वर्थे प्रयुज्यमानः संदृश्यते– वर्णः, प्रकृतिः, प्रत्ययः, पदं, वाक्यं, महावाक्यं, परा, पश्यन्ती, मध्यमा (स्फोटः), वैखवरी, ध्वनिः, शब्दप्रमाणम्, धातुः इत्यादि (अव्ययसमासोपसर्गनिपाततन्त्रीशब्दकाकवाशितापभ्रंशव्यंग्यव्यंजकादि–नामादिशब्देन ग्रहणम्)।

अत एव हेतोः शब्दशब्दः भाषान्तरीकरणं नैव सहते इतिकृत्वा मत्कृत–वाक्यपदीयब्रह्मकाण्डस्याङ्ग्लानुवादे ग्रन्थान्तविवरणपूर्वकं तमेव यथायथं प्रायुञ्जि। शब्दः वागिति चानर्थान्तरम्।

''किं पुनरिमे वर्णा अर्थवन्तः आहोस्विदनर्थका'' इति वर्णगतं वस्तु विचार्यमाणेन भाष्यकृता वार्तिकान्युद्धृत्य उभावपि पक्षौ प्रदर्शितौ। तत्र चानर्थका वर्णा इत्येव सिद्धान्तः।

धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानाम् अर्थदर्शनं च वर्णस्फोटाश्रयेण। अयं च वर्णस्फोटः शास्त्रप्रक्रियामात्रोपयोगीति स्पष्टमुद्योते "हयवरट्–सूत्रे। तत्र वाक्यस्फोटो मुख्य इति मञ्जूषा अन्ये च सप्त पदस्फोटाद्वयः पञ्चकोशाधिकरणवदुपयुज्यन्ते इत्यादि स्पष्टं प्रत्यपादि भूषणे मञ्जूषायां च।

उपायाः शिक्षमाणानां बालानामुपालालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।

(वाक्य. २३८, वाक्य)

इति हरिरपि। प्रातिपदिकसंज्ञासूत्रे भाष्येऽपि एषा वर्णविषयिणी चर्चा दरीदृश्यते। "सिद्धं त्वन्वयव्यतिरेकाभ्यां, वृक्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते, सकारो हीयते औकार उपजायते।... इमे पुनर्वर्णा अत्यन्तमेवानर्थकाः। ... एवमेषां वर्णानां समुदाया अर्थवन्तः अवयवा अनर्थकाः। आह च हरिः–

शास्त्रार्थ एव वर्णानामर्थवन्त्वं प्रदर्शितम्।
धात्वादीनां विशुद्धानां कौकिकोऽर्थो न विद्यते।।

(वाक्य. २१०, वाक्य.)

वाक्यपदीये च पदार्थाष्टकं विचारितम् प्रकृतिप्रत्ययौ पदवाक्ये इति द्विविधौ शब्दौ, प्रकृतिप्रत्ययार्थपदवाक्यार्थरूपार्थद्वयं, कार्यकारणभावयोग्यतारूपसम्बन्धौः, अर्थज्ञान–धर्मरूपप्रयोजनं चेति। अत एव पदार्थाष्टकविचारपरत्वाद् वाक्यपदीयस्येति तृतीयकाण्डारम्भे प्रोवाच हेलाराज़ः। अखण्डवाक्यमेव तावत् सिद्धान्तः। वाक्यानामानन्त्यात् पदविभागं कृत्वा पदानामपि आनन्त्यात् प्रकृतिप्रत्ययविभागं च कृत्वा शास्त्रं निरमायि पाणिनिना। स्पष्टं चेदं वाक्यपदीये मञ्जूषादौ च। तथा च हरिः–

अपोद्धारपदार्था ये ये चार्थाः स्थितलक्षणाः।
अन्वायख्येयाश्च ये शब्दाः ये चापि प्रतिपादकाः।।

(ब्रह्म.२४. वाक्य)

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते।। (वाक्य.१०, वाक्य)

भागैरनर्थकैर्युक्ता वृषभोदयथावकाः।
अन्वयव्यतिरकौ तु व्यवहारनिबन्धनम्।। (वाक्य. १२. वाक्य)

अपोद्धारशब्दश्च कृत्रिमे पृथक्करणे प्रयुज्यते। असत्यभूतावयवकल्पनमिति–यावत्।

पाणिनिः शब्दशास्त्रप्रक्रियानिर्वाहाय वाक्यसाधुत्वसंसाधनाय च वस्तून्यमूनि परिकल्पयामास – धातुप्रातिपदिके द्वे प्रकृती। अष्टविधप्रत्ययाः, स्वादयः एकविंशतिः, नव स्त्रीप्रत्ययाः, द्विशताधिका तद्धिताः, सनादयो द्वादश, द्वाविंशतिः विकरणाः, दश लकाराः, अष्टादश तिङः, दशोन्तरैकशताधिकं कृतः।

प्रकृतिप्रत्ययानामर्थोऽपि शास्त्रकृत्कल्पितः। "न केवला प्रकृतिः प्रयोक्तव्या नाऽपि प्रत्यय" इति, तश्शब्दो विधेयः तिशब्दः, प्रतिषेध्यः, इत्यादि च सरूपसूत्रे पतञ्जलिः। सिद्धे शब्दार्थसंबन्धे इत्यादि–कात्यायनवचनेन नित्याः शब्दार्थसंबन्धाः इति हरिवचनेन च शब्दनित्यत्वं साध्यत्वेन प्रतिज्ञातम्। 'राज्ञः पुरुष' इति वाक्यं प्रयुज्यते राजपुरुष इति समासश्च। न तत्र परस्परं कश्चनास्ति संबन्धः। 'समर्थः पदविधिः' (पा.२.१.१) इति पाणिनीयं, परार्थाभिधानं वृत्तिरिति ततः प्राचीनाचार्यनियमश्च बालानां सुखबोधाय वृत्तिकल्पने उपयुज्यते। आह च हरिः–

प्रतिपादयता वृत्तिमबुधां वाक्यपूर्विकाम्।
वृत्तौ पदार्थभेदेन प्राधान्यमुपदर्शितम्।। (वाक्य.२२६, वाक्य)

शब्दनित्यतायां कथं शास्त्रप्रकृतिरिति मनसि निधाय 'दाधाघ्वदाप्' (पा.१.१.२०), 'स्थानिवदादेशोऽनल्विधौ' (पा. १.१.५६) इति सूत्रयोः भाष्यकारेण समाहित–मतिचतुरमतिनेत्थमत्र शब्दान्तरे शब्दान्तरस्य प्रतिपतिर्युक्ता,

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।
एकदेशविकारे हि नित्यत्वं नोपपद्यते।।

बुद्धिस्त्वस्य विपरिणम्यते। सः अस्तेर्भूः इत्यनेनास्तिबुद्धया भवतिबुद्धिं प्रतिपद्यते। नित्य एव च स्वस्मिन् विषये अस्तिर्नित्यो भवतिश्च। बुद्धिस्त्वस्य विपरिणम्यते–इत्यादि।

सर्वपदादेशा इत्यत्र पदशब्देन न सुप्तिङन्तं गृह्यते अपि तु कार्यं प्रतिपद्यमानं प्रतीयमानं प्रकृतिप्रत्ययादि तत्सर्वं पदम् इति कैयटः। एवं चास्मिन् विषये शक्तं पदमित्यादि नैयायिकदर्शनं भ्रममूलकमिति स्पष्टं मञ्जूषायां शक्तिवादान्ते च।

सुप्तिङन्तं पदमिति द्वैधी गतिः पदजातस्य। शाकटायनस्तु नामाख्यातो–पसर्गनिपाता इत्युपदिदेश। पदनिष्पत्तिश्च प्राधान्येनान्वाख्यायि पाणिनीये। परंतु अनेकमन्यपदार्थे इति सर्वार्थत्यागं पदानां ब्रुवता आचार्येण जहत्स्वार्थपक्षं मनसिकृत्य अखण्डवाक्यार्थ एव सिद्धान्तः पदानाम् अर्थः कल्पित इत्यसूचि। आह च हरिः–

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।।

(ब्रह्म. ७३, वाक्य)

यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः।
अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते।।

(वाक्य १०. वाक्य)

जहत्स्वार्थविकल्पे च सर्वार्थत्यागमिच्छता।
बहुव्रीहिपदार्थस्य त्यागस्सर्वस्य दर्शितः।।

(वाक्य.२२८, वाक्य)

एतेन पदस्फोटोऽपि शास्त्रप्रक्रियानिर्वाहोपयोगीति स्पष्टीभवति। वास्तु–ज्यौतिषादिशास्त्रगतपदेऽतिव्याप्तिवारणाय च पदं निर्वक्ति पाणिनिः। वाक्यमिति काचन शब्दसंज्ञा। वचोऽशब्दसंज्ञायामिति पाणिनीयसूत्रेण कुत्वाभावः।

वाक्यस्फोटश्च सिद्धान्तः। वाक्यमेव वाचकमिति तस्यार्थः। कारके इत्यधिकृत्य आचार्येण वक्यनिर्मितिः प्रादर्शि।

पस्पशायां च ''केषां शब्दानां'' मिति चोदयित्वा ''लौकिकानां वैदिकानां चे'' ति समाधाय वैदिकानि शं नो देवीरभिष्टये इत्यादिवाक्यानि समुदाहृतानि। एतेन च व्यज्यते यद् व्याकरणं शब्दशास्त्रं न तु पदशास्त्रं केवलमिति।

स्वं रूपमिति सूत्रे शब्दसंज्ञा इति प्रतीकमुपादाय शब्दशब्देन चाभेदोपचारात् व्याकरणमुच्यते, शब्दे संज्ञा शब्दसंज्ञा एवं च कर्मकरणमित्यादिष्वर्थसंज्ञास्वपि शास्त्रीयासु स्वरूपग्रहणं न भवतीति पदमञ्जर्यां हरदत्तः। दीक्षितनागेशौ च तदेवावादिष्टाम्शब्दशास्त्रे या संज्ञेति, शब्दपदेन च शब्दशास्त्रं तदाहेति च।

अर्थोऽल्पश्चेद्वाक्यं प्रयुज्यते स चेन्महान् महावाक्यम्। विस्तरस्तु मम महावाक्य-विचारे द्रष्टव्यः। प्रत्यगात्मनि अतिव्याप्तिवारणाय महावाक्यार्थे वाक्यशब्दप्रयोग इति न्यायवार्तिकतात्पर्यपरिशुद्धौ। वाक्यमहावाक्ययोश्च तन्त्रेण निर्वचनं द्वादशलक्षण्यां जैमिनेः 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति'। योग्यतासत्तेः नोक्तेः गमकत्वात्। सूत्रे च पदशब्दः नोपात्तः अत एव वाक्यमहावाक्यसाधारणं सूत्रमिति। परिशुद्धिवाक्ये प्रत्यगात्मनीत्यस्य प्रत्यगात्मबोधके तत्त्वमसीत्यादिमहावाक्ये इत्यौपचारिकोऽर्थः। तृतीया-ध्याये च अभिज्ञावचने लृट्, न यदि, विभाषा साकाङ्क्षे इति सूत्रत्रयेण पाणिनिः स्मरसि कृष्ण गोकुले वत्स्यामः। अभिजानासि कृष्ण यद्वने अभुञ्ज्महि इत्यादि महावाक्यानां साधुत्वं प्रार्थयामास। बहुषु बहुवचनम्, णेरणौ इत्यादिसूत्रेषु प्रदीपोद्योतयोः प्रकरणस्य नैक सूत्रसमुदायरूपस्य महावाक्यरूपेण लक्ष्यसंस्कारकत्वं प्रत्यपादि। तथा च पारिभाषिकेन महावाक्येन भाषां संचस्कार पाणिनिः। तृतीये च तंत्रवार्तिके कुमारिलेन प्रत्ययविधिं स्वीकृत्य 'विशेषेण तु व्याकरणैः' यथा एकवाक्यता तथा समुदीरितम्। तौवोक्तम्-

सर्वाण्येव हि शास्त्राणि स्वप्रदेशान्तरैस्सह।
एकवाक्यतया युक्तमुपदेशं प्रतन्वते।।

इत्यादि। शास्त्रम् सूत्रम्। एकवाक्यतया वाक्यैकवाक्यतया। हरिरपि वाक्यकाण्डे विधेर्नियमनिषेधयोश्च शेषशेषिभावं न्यगादीत्-

नियमः प्रतिषेधश्च विधिशेषस्तया सति।
द्वितीये यो लुगाख्यातस्तच्छेषमलुकं बिदुः।।
(वाक्य.३४९, वाक्य)

लौकिकं महावाक्यलक्षणं जैमिनिमनुसृत्य हरिणैवमभाणि-

साकाङ्क्षावयवं भेदे परानाकाङ्क्षशब्दकम्।
कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते।। (वाक्य.४, वाक्य)

वाक्यानां समुदायश्च य एकार्थप्रसिद्धये।
साकांक्षावयवः....(७६, वाक्य. वाक्य)

इति च। एतेन शब्दशास्त्रे महावाक्यरूपशब्देन महावाक्यरूपशब्दस्यान्वाख्यानं स्पष्टमुपलभ्यते।

रमणीयार्थप्रतिपादकशब्दः काव्यमित्यत्र शब्दशब्दस्य महावाक्यमित्यर्थः। महाकाव्यम् महावाक्यमिति चानर्थान्तरम्। पस्पशायां, समर्थः पदविधिः इत्यादिषु "शब्दप्रमाणका वयं, यच्छब्द आह तदस्माकं प्रमाणम्" इति वदता पतञ्जलिना शब्दानुशासने शब्दप्रमाणस्य प्राधान्यमुपदर्शितम्।

पस्पशायां व्याकरणप्रयोजनपरिगणनसन्दर्भे चत्वारीत्यादि ऋचमुपादाय चत्वारि शङ्गाः पदजातानीति व्याख्यायि भाष्यकारेण। तने परा—पश्यन्ती—मध्यमा—वैखरीणां ग्रहणमिति व्याख्यातारः। प्राह च हरिर्ब्रह्मकाण्डे—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्॥

(ब्रह्म. १४३, वाक्य)

ऋषीणां पुनः पश्यन्तीशब्देऽपि प्रकृतिप्रत्ययज्ञानं भवति। शास्त्राविषयत्वात् परा नोक्ता। तस्य ब्रह्मरूपत्वं तु वर्णयांचकार हरिरिति मञ्जूषायां नागेशः—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥

(ब्रह्म. १, वाक्य)

मध्यमाशब्द एव स्फोट इति निगद्यते। द्रव्यादीनां शब्दत्वं निराकुर्वता पतञ्जलिना "येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः" इति राद्धान्तः कृतः पस्पशायाम्। स्फोटस्य च स्वरूपं समग्रतया वाक्यपदीये व्यवस्थापितम्, भूषणमञ्जूषादिषूपवर्णितं च। तत्र वाक्यस्फोट एव मुख्यः, इतरे तु शास्त्रप्रक्रियोपयोगिन इति विवेकः।

तत्रैव भाष्ये "अथवा प्रतीतपदार्थको लोके ध्वनिश्शब्द इत्युच्यते, तस्माद्ध्व—निश्शब्द" इत्यप्यभ्यधायि। "तर्हि स्फोटश्शब्दः ध्वनिशब्दगुण" इत्यन्यत्र च। धातुर्वै शब्द (परोक्षे लिट्) इत्यादिरूपेण धात्वादीनामपि शब्दशब्देन व्यवहारो महाभाष्ये। शब्दं करोति प्रकृतिप्रत्ययविभागद्वारा व्युत्पादयतीति "शाब्दिक इति शब्ददर्दुरं करोतीति" सूत्रे व्याख्यातारः।

सन्दर्भाः

१. व्याकरणमहाभाष्यम् (प्रदीपोद्योतसहितम्)
२. वाक्यपदीयम्
३. काशिकाविवरणपञ्जिका (न्यासः)
४. पदमञ्जरी
५. वैयाकरणभूषणम्
६. शब्दकौस्तुभः
७. वैयाकरणसिद्धान्तमञ्जूषा
८. स्फोटवादः
९. पूर्वमीमांसादर्शनम्
१०. तन्त्रवार्तिकम्
११. न्यायवार्तिकतात्पर्यपरिशुद्धिः
१२. तर्कसंग्रहः
१३. वैयाकरणसिद्धान्तकौमुदी
१४. लघुशब्देन्दुशेखरः
१५. रसगंगाधरः
१६. वाक्यपदीयम्— ब्रह्मकाण्डः (आंग्लकानुवादः, व्यासकर्तुः)
१७. महावाक्यविचारः (प्रबन्धकर्तुः)

फलव्यापारयोर्धातुः

राधामाधवो दाशः

० .० उपक्रमणिका

व्याकरणसिद्धान्तभूतवाक्यस्फोटान्तर्गतसकलशब्दकारणीभूतधात्वर्थस्य प्राथम्यात् भट्टोजिसंकलितवैयाकरणसिद्धान्तकारिकासु मौलिकसिद्धान्तरूपेण समुपन्यस्ताऽस्ति कारिका–

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।[1] इति

सेयं कारिका कौण्डभट्टेन वैयाकरणमौलिमुकुटेन वैयाकरणभूषणसाराख्ये ग्रन्थे काममालोचिता, तदीयमेतत्सान्दर्भिकमालोचनं परवर्त्तिव्याकरण–न्याय–मीमांसादिरचनासु प्रमाणत्वेनाऽङ्गीकृतमस्ति। बहुतत्त्वगर्भिताया अस्याः कारिकायाः प्रथमपादोऽस्ति 'फलव्यापारयोर्धातु'रिति, यत्र केवलं धात्वर्थतत्वानुसन्धानं नव्यव्याकरणदर्शनाभिमुख्या–नुकूलतया सुविहितम्। प्रस्तुतलेखे तामेव शीर्षिकामङ्गीकृत्य भारतीयशब्दशास्त्रपरम्परा–धारेण धात्वर्थविचारः सविनीतमुद्यम्यते।

० .१ आख्यातांशाः

संस्कृताख्यातपदेषु (परिनिष्ठतक्रियापदेषु) अस्त्यर्थवदेककद्वयम्धातुः प्रथममेककं तिङ्कृत्प्रत्ययनिचयश्चेतरम्। धातुरस्ति प्रकृतिः। अत एव धातुविशेषसंयोगेन निर्मितानि क्रियापदानि तत्तद्धातुविशेषाणां स्वीयमर्थमादधति। किन्तु समेषु क्रियापदेषु चकास्ति धातुसामान्योऽर्थोऽथवा धातुजातित्वभावना।[2] तथैव तिङ्कृत्सु च सामान्यविशेषौ चार्थौ प्रवर्त्तमानौ दृश्येते।

प्रस्तुतलेखे केवलमाख्यातांशधातुरेव विचारपरिसरीभूतोऽस्ति। अतो धात्वर्थ–विचारात्पूर्व धातुस्वरज्ञानमावश्यकम्। 'भूवादयो धातवः' (पा.१.३.१) इति धातुसंज्ञाविधायकसूत्रोपरि व्याख्याक्रमेण 'क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युरिति' सिद्धान्तकौमुदीवृत्तिः। प्राचीनकाशिकावृत्तावपि 'भू इत्येवमादयः शब्दाः क्रियावाचिना धातुसंज्ञा भवन्तीति व्याख्यातम्। पाणिनीयव्याकरणस्य परिशिष्टकल्पेषु धातुपाठ–गणपाठ–

लिङ्गानुशासनादिष्वन्यतमे धातुपाठे १९४४ परिमिता धातवः संकलिताः। रूपनिर्माणस्वातन्त्र्यमाविष्कृत्य तत्तत्स्वातन्त्र्याधारेण भ्वादि–अदादि–जुहोत्यादि–दिवादि–स्वादि–तुदादि–रूधादि–तनादि–क्र्यादि–चुराद्याख्येषु ते दशसु स्थूलविभागेषु संकलिताश्च सन्ति। एतेषां प्रतिनिधित्वं कुर्वत्सु भवति–अत्ति–जुहोति–दीव्यति–सुनोति–तुदति–रूणद्धि–तनोति–क्रीणाति–चोरयत्याकृतिमत्सु यथासंख्यं पारिभाषिकरीत्या[३] शप् (गुणकारक–अः)–लुक् (शून्यम्)–श्लु (धातुद्वित्वकारकः)–श्यन् (यः)–श्नु (नुः)–श (गुणनिरोधक–अः) श्नम् (धातुगतस्वरोत्तर–नः)–श्ना(ना)–णिच्पूर्वक– शप् (अय) इत्येतेषां प्रकृतिप्रत्ययमान्तरालयोगविशेषा स्तत्तद्धातुप्रकाराणां रूपविकारकतत्त्वानि सन्ति। अतएव एतानि विकरणान्युच्यन्ते। एतेषु गणेष्वनन्तर्भाविताः पाणिनीयसूत्रेषु सुलभा धातवः सौत्रधातुनाम्ना प्रोक्ताः।[४] एतद्व्यतिरिक्तं कानिचन नामानि कण्ड्वादिगणे संकलितानि येभ्यः परं 'यक्' योगं कृत्वा क्रियारूपाणिनिष्पादयितुं शक्यन्ते।[५] अत्रान्तर्गताः षष्ठिसंख्याका धातवस्तत्पार्यायवाचिनोऽपि धातवो नामधातव इत्युच्यन्ते। अपरं च भवतिभ्य औपदेशिकीभ्यो धातुभ्यः परं नामधातुभ्यश्च परं यथानयिमं विहिताः सन् (स)–क्यङ्(य)–क्यषृ (य)–णिङ्(इ)–णिच्(इ)–यङ्(य)–आय–इयङ्(इय) प्रत्ययावुभूष–पुत्रीयादि–धातून् जनयन्ति। ते च अतिदिष्टा धातव इति परम्परा।[६] मौलिकरूपेण भूवादिष्वथवा भूप्रभृति वा–सदृशेषु क्रियावाचिषु रूपेषु यदस्ति तत्त्वं तद्व्याकरणदर्शनगुन्थेषु विशेषतो वाक्यपदीय–भूषण–मञ्जूषाग्रन्थेषु समुदाहृतैर्नैयायिकमीमांसकादीनां तत्तुल्यमतैः सह तौलनिक–खण्डन–मण्डन–गहन–विपिनेषु भ्राजतेतराम्।

१.० धातूनां फलव्यापारवाचकता

'फलव्यापारयोर्धातु'रित्युक्तेऽभिप्रेतोऽस्ति यदाख्याततांशो धातुः फलस्य व्यापारस्य च वाचकोऽस्ति। कारिकाया अवशिष्टपादानामर्था यद्यपि प्रबन्धस्य परिसरे नान्तर्भावितास्तथापि सामान्येन तत्कारिकार्थसूचनेन कारिकाकृतो विवक्षापरिष्कारः स्यादिति धिया कारिकावशिष्टभागस्य संक्षेपार्थः प्रस्तूयते। 'आश्रये तु तिङः स्मृता', इति तिङ्प्रत्ययाः फलाश्रयस्य कर्मणो व्यापाराश्रयस्य कर्तुश्च वाचकाः सन्तीति आशयः। 'फले प्रधानं व्यापार' इति पादेनोच्यते आख्यातांशफलव्यापारयोर्मध्ये फलं प्रति व्यापारः प्रधानोऽथवा फलस्य विशेष्योऽस्ति व्यापारः, फलं, तु व्यापारदृष्ट्या गौणमथवाऽस्य विशेषणं भवति। अन्तिमपादस्योपदेशो वर्तते। तिङर्थाः कर्तृ–कर्म–संख्या–काला विशेषणरूपाः सन्ति।

तिङ्प्रत्यया: कर्त्तरि वाच्ये कर्त्तारमभिदधति कर्मणि च कर्माभिदधति। तथैव तिङर्थसंख्या कर्तृप्रधानवाक्ये कर्त्रा सहाऽन्विता कर्मप्रधानवाक्ये कर्मणा चान्विताऽस्ति। तिङर्थकालस्तु व्यापारस्य विशेषणं भवतीत्यनुभवसिद्धः। कर्तृकर्मक्रियापदसमवेतवाक्यार्थबोधनाय परिकल्पित: कर्तृवाच्यपरको वैयाकरणशाब्दबोधप्रकारो व्यापारविशेष्यकोऽस्ति। 'देवदत्त ओदनं पचति' इति वाक्यस्य शाब्दबोधोऽस्ति देवदत्ताभिन्नैककर्तृक ओदनकर्मको वर्त्तमानकालिको विक्लित्त्यनुकूलो व्यापार:। सोऽयं विचार: खण्डशो व्यस्ततयैवमस्ति यत्पचति नाम पाकक्रियापर्यायवाचिव्यापारोऽस्ति य: कठोरधान्यादीनामवयवानां शिथिलीकरणस्य (विक्लित्तेः) जनको वर्तते, स व्यापार, पुनर्वर्तमानकाले घटितो वर्तते (वर्त्तमानकालिक:), यस्य व्यापारस्येप्सिततमं लक्ष्यमस्ति ओदन: (ओदनकर्मक:), कर्त्ता चास्ति संख्यया एक: पुरुषविशेषो य: परिचिताद् देवदत्ताद् भिन्नो नास्ति (देवदत्ता–भिन्नैककर्तृक:)। तथैव 'देवदत्तेन ओदन: पच्यते' इति वाक्यस्य फलविशेष्यकतया शाब्दबोधोऽस्ति देवदत्तवृत्ति–वर्त्तमानकालिका व्यापारजन्या ओदननिष्ठा विक्लित्तिरिति।

१.०.१ धात्वर्थत्वे प्राचीनाऽर्वाचीनवैयाकरणानां मतभेद:

(क)प्राचीना वैयाकरणा: 'फलविशिष्टव्यापारे' 'फलानुकूलयत्न–सहितव्यापारे' वा धातो, शक्तिं मन्यन्ते। (ख) अपि च क्रिया कर्तृवाच्ये कर्मवाच्ये वाऽस्तु उभयत्र शाब्दबोधस्तु व्यापारप्रधानो भवति इति तेषां मति:।[३] अत एव 'पचति' पदार्थोऽस्ति 'एककर्तृनिष्ठ–पाकानुकूल–व्यापार:'। 'पच्यते' पदार्थस्तु 'एककर्मनिष्ठ–विक्लित्यनुकूल–व्यापार:। 'देवदत्त ओदनं पचति' इत्यादि उपरिनिर्दिष्ट–शाब्दबोधप्रकारौ नवीनवैयाकरणमता–नुकूलकाविति। फले व्यापारे चं पृथक् खण्डशश्च शक्तिं स्वीकुर्वन्ति नवीना:।[४] तत्र फलव्यापारयोरिति द्विवचनप्रयोगो फल–व्यापारयो: पृथक्शक्तिमत्तासूचने मानम्। सहाभाष्यकारोऽपि 'द्व्यर्थ: पचि:' इत्युक्त्या तत्संकेतयति। भूवादयो धातव: (पा.१.३.१) इति सूत्रव्याख्यायां व्यापारो फलं च धातुवाच्यें इति भाष्यकारस्य सम्मति।[५] नागेशस्य केवले व्यापारे धात्वर्थत्वस्वीकारे भर्तृहरि–भट्टोजिदीक्षितौ दीक्षितानुगामिकौण्डभट्टोपि फले व्यापारे च पृथक्शक्तिं स्वीकुर्वन्ति। वस्तुतो नागेश: फले व्यापारे च पृथक्तया धात्वर्थमस्वीकृत्य फलानुकूलव्यापारूपार्थं मन्यते। तस्मात् पाकानुकूलव्यापार: पच्धातोरर्थ इति निष्कर्ष:। सोऽयं व्यापारो 'यत्नसहित' इति विशेषणेन विशेषितोऽस्ति। पाकानुकूलो

व्यापारः सयत्नश्चेत् क्रियेत पच्धात्वर्थो भवेत्, नान्यथा। पचनव्यापारे पाचकस्य यत्नाभावश्चेत् 'अयं न पचति' इति प्रयोगो न त्वयं पचतीति। एतदुद्दिश्य नागेशेनाऽभिहित–मस्ति –'फलानुकूलो यत्नसहितव्यापारो धात्वर्थ' इति।[१०]

फलव्यापारयोः पृथक्शक्तिकल्पने नागेशेन काश्चनाऽऽपत्तयः प्रदर्शिताः। ता भवन्ति–(क) यथा 'नीलो घटः' इति प्रयोगवद् उद्देश्यविधेयभावेन तयोः स्वाभाविकी–अन्वयापत्तिः। अत्र कदाचित् नीलशब्द उद्देश्यो भवेत् कदाचित् घटः, कदाचित् तद्वैपरीत्यम्। तद्वदत्रापि व्यापार उद्देश्यः फलं विधेयं कदा फलमुद्देश्यं व्यापारो विधेयः सम्भाव्येत(ख) व्युत्पत्तिद्वयकल्पने कार्यकारणभावकल्पनागौरवमापद्येत। यदि व्यापारो मुख्यत्वेन फलं च गौणत्वेन बोध्येते तदा तद्बोधनरूपं कार्यं प्रति धातुसंबद्धकर्तृवाचि प्रत्ययः कारणरूपं भवेत्। तथैव फलस्य प्राधान्ये कल्पिते व्यापारस्य गौणत्वे तद्बोधनकार्यं प्रति धातु–सम्बन्धानां कर्मवाचिप्रत्ययानां कारणत्वप्रसङ्गः। (ग) तृतीयापत्तिस्तु यदि धातो द्वौ भिन्नार्थो फलव्यापाररूपौ स्तः, धातूनां द्विविधवाचकशक्तेः कल्पनं सम्भाव्येत। (घ) अन्तिमापत्तिर्भवति – प्राचीनविदुषां मतानुगुणं फलव्यापारयोर्द्विविधबोधनजनकताशक्तेः कल्पनमवश्यंभावि।

एतासामापत्तीनां निराकरणाय फलविशिष्टे व्यापारे तथा व्यापारविशिष्टे फले धातोः शक्तिः परिकल्पनीया। फलविशिष्टव्यापारस्याभिप्रायोऽस्ति फलानुकूलो व्यापारः फलोत्पादको व्यापारो वा। व्यापारविशिष्टफलस्याभि–प्रायोऽस्ति व्यापारजन्यं फलम्। कर्त्तरि प्रयोगे फलानुकूलव्यापारस्य प्रतीतिः। कर्मणि प्रयोगे व्यापारजन्यफलस्य च प्रतीतिः। कर्तृवाच्ये प्रयुक्ताः प्रत्ययाः फलानुकूलव्यापारे तात्पर्यं ज्ञापयति। कर्मवाच्य–प्रयोगे कर्मणि प्रत्यया व्यापारजन्यफलं बोधयन्ति। अनया रीत्या दोषाणां परिहारो भवति।[११]

१.१. धात्वर्थः फलम्

फलशब्दोऽत्र पारिभाषिकः। स च धात्वर्थव्यापारजन्य–धात्वर्थफलस्य बोधकः, यथा पचेर्विक्लित्तिः, गमेः संयोगः, त्यजेर्विभागः। प्रसिद्धप्रयोजनरूपं लौकिकफलं नात्राभिप्रेतम्। यथा 'स्वर्गकामो यजेत' इत्यादिवाक्येषु 'स्वर्गप्राप्तिरेव लोकप्रसिद्धं प्रयोजनम्, यथा वा वपनक्रियायाः फलमस्ति धान्यप्राप्तिः, पचति–क्रियाया मुख्यं फलं क्षुन्निवृत्तिः। आत्मनेपद–परस्मैपद–क्रियानिबन्धनं खलु लौकिकं मुख्यं प्रयोजनरूपफलम्। तथा भर्तृहरिः–

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलं तेषां न लाभादिप्रयोजनम्।।

(वा.प. ३.१२.१८)

अतएव परस्मैपदाऽऽत्मनेपदविचारे[12] लोकप्रसिद्धं फलमभिप्रेतम्, धात्वर्थफलविचारे धातूनां सकर्मकाऽकर्मकविचारे तु पारिभाषिकं फलं लक्ष्यमस्ति। अन्यथा लोकप्रसिद्ध–फलार्थताङ्गीकारे पाकसमाप्त्यनन्तरमपि क्षुन्निवृत्तेरभावात् अपाक्षीदिति प्रयोगाऽसम्भवः। अपरं च भोजनसमये क्षुन्निवृत्तौ 'पचति' शब्दस्य प्रयोगापत्तिः स्यात्।

१.१.१ धात्वर्थफलस्य लक्षणम्

तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वं फलत्वम्। धात्वर्थ–व्यापारजन्यमपि धातुजन्योपस्थितेश्च विषयो भवति फलम्। तथा च नागेशः[13] – फलत्वं च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठ–विशेष्यता–निरूपितप्रकारत्वम्। यथा पचतिक्रियांयाः कर्तृवाचि–ति–प्रत्यय–संबद्ध–पच्–धातुजन्यशाब्दबोधे विक्लित्यनुकूलव्यापाररूपेण संबद्धे धात्वर्थव्यापारे स्थिततया विशेष्यतया निरूपितायां विक्लित्तौ प्रकारताया आश्रयरूपा विक्लित्तिः पच्धातुवाच्या। अत एव विक्लित्तिरेव पच्धात्वर्थफलम्। तथैव देवदत्तो ग्रामं गच्छति इति वाक्ये गमेः शाब्द–बोधो भवति संयोगानुकूलो व्यापारः। संयोगोऽत्र फलम्। चलनादिसकलक्रिया व्यापारः। संयोगस्तु तज्जन्योऽस्ति।

१.२ व्यापारलक्षणम्

कौण्डभट्टेन 'व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया' इत्युच्यते। कस्यापि फलस्य सिद्ध्यर्थं कार्यारम्भात् समाप्तिपर्यन्तं कृतानां निखिलयत्नानां समूह एव व्यापारः। सोऽपि क्रियेत्युच्यते। पचति–करोत्यादि–क्रियासु साध्यावस्थाया लक्षणं विद्यते। क्रियायाः साध्यावस्था सैव भवति यद्रूपं श्रुत्वा श्रोतुर्मनसि क्रियान्तराणामाकाङ्क्षा नोत्थिता भवति। तथा च निरुक्तकारः "पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्य–पवर्गपर्यन्तम्" (निरूक्तम् १.१.१)। पचति–पठति–वदतीत्यादि–क्रियापदानि श्रुत्वा श्रोततुर्मनसि 'किं पाकः पाठः वादो वा प्रवर्त्तते नश्यति भविष्यति वेत्येवंरूपाणां

क्रियाणामाकाङ्क्षा उदियात्। तत्तदाकाङ्क्षाणां पूर्त्यर्थमेतासां साध्यावस्थाविशिष्टानां क्रियाणामुच्चारणमावयकम्। पाक—पाठ—वादरूपक्रियाशब्दाः सिद्धावस्थाया वाचकाः सन्ति। पचति = पाकं करोति = पाककृतिरिति तिङन्त—घञन्तशब्दयोः पार्थक्यं विवृण्वता कौण्डभट्टेनोच्यते उभयत्र धात्वर्थावगमाऽविशिष्टेऽपि क्रियान्तराऽऽकाङ्क्षाऽनाकाङ्क्षयोर्दर्शनात् तयोर्यथाक्रमं साध्यसिद्धावस्थात्वमनुभवसिद्धम्। क्रियायाः सिद्धावस्थालक्षणं निरूपयन् नागेशो ब्रवीति— 'सिद्धत्वम् क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्तराऽन्वयायोग्यत्वम्।'[14] साध्यावस्थाऽसत्त्वभूता। सिद्धावस्था सत्त्वरूपा अतएव नामवद् सुब्विभक्तिभिश्चोच्यते। यदुच्यते वाक्यपदीये (२.१९५)

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते।
सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते।।

पचत्यादिषु स्वाभाविकी साध्यावस्था तिङ्भिः पाकादिषु सिद्धावस्था च सुब्विभक्तिभिः प्रतिपाद्येते। पाकादिशब्दा घञादिकृत्प्रत्ययपरकाः। यदुक्तं भाष्ये 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। तथैव कौण्डभट्टः

'साध्यत्वेन क्रिया यत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादि—निबन्धनः।।'

लिङ्ग—वचन—विभक्ति—समन्वयेन तस्याः क्रियायाः प्रयोगः — पाको जायते, पाकौ जायेते, पाका जायन्ते, पाकेन कार्यं सेत्स्यति, पाके प्रवर्त्तते सूदः इत्यादिवत्। किन्तु साध्यावस्थोपेतानां, पचत्यादीनां क्रियारूपाणामद्रव्यवद्व्यवहारे लिङ्ग—विभक्ति— वचनयोगो न भवति। पचत्यादीनां वचनसत्ता तु देवदत्तादिकर्तृसंबन्धजन्या। क्रिया अमूर्त्त्वत्वाद— निर्वचनीयास्ति। एतदर्थं भाववाच्ये वचनविचारवेलायाम् 'एकवचनमुत्सर्गतः करिष्यते' इति क्रियाणामौत्सर्गिकमेकवचननियमः।

१.२.१ व्यांपारलक्षणान्तरेषु दोषाः

क. फलप्रयोज़नक्रियात्वं व्यापारत्वम् इति लक्षणेन करणस्यापि फलप्रयोजकत्वेन व्यापारत्वापत्तिः। अतो व्यापाराश्रय करणस्य कर्तृसंज्ञात्वे — 'बालको दण्डेन क्रीडति' इति वाक्ये करणरूपदण्डः 'दण्डः क्रीडति' इति कर्तृरूपत्वं लभेत। लक्षणमेतदतिव्याप्तिदोषदुष्टम्।

ख. 'तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारवत्त्वम्' अर्थात् स एव व्यापारो भवति य कर्तृजन्योऽपि कर्तृजन्यफलस्यापि जनकोऽस्ति। व्यापारस्यैतल्लक्षणस्वीकारे साक्षाद्विक्लित्तेर्जनकरूपोऽन्तिमाग्निसंयोग एव व्यापारत्त्वापत्तिः। तथा सति पचति पदेनान्तिमाग्निसंयोगव्यापार एव गम्यमानः स्यात्। चूल्लिकोपरि पात्राधिश्रयणवेलायां पचति–पदस्य प्रयोगासंगतौ पक्ष्यतीति प्रयोगो युज्येत इत्यत्राव्याप्तिदोषः।

एतादृशदोषप्रकाराणां निराकरणाय फलसिद्ध्यर्थमा कार्यारम्भादा समाप्तिं सकलानां यत्नानां नामास्ति व्यापारः। अत एव ''पदान्तरसमभिहाराप्रयोज्यसाध्यत्वप्रकार–प्रतीतिविपयत्वं व्यापारत्वमित्यर्थः।[१५] अभिधानस्य प्रकारतावत्त्वं विषयतानिरूपकत्वं वा चौपचारिकम्। तादृशसाध्यत्वप्रकारकप्रतीतिरेव विषयत्वम्। 'घटं करोति' इत्यादौ कृञसमभिहारे घटादीनामपि साध्यत्वेन प्रतीतेरतिप्रसङ्गभङ्गाय पदान्तरसमभिव्याहार–प्रयोज्येति प्रतीतिविशेषणम्, तदसमभिव्याहारे तेषां तत्त्वेनाप्रतीतेः। अधिश्रयणाद्य–धः–श्रयणपर्यन्तक्रियाकलापस्य पदान्तरसमभिव्याहारमन्तरेणापि साध्यत्वेन प्रतीयमान–त्वादुक्तव्यापरत्वमविकलमिति तदवच्छिन्ने पच्यादिधातुवाच्यता नानुपपन्नेति भावः।''[१६]

ग. व्यापारलक्षणमभिदधद् नागेशो वदति– व्यापारत्वं च–'धात्वर्थफल–जनकत्वे सति धातुवाच्यत्वम्'। 'फलानुकूलो यत्नसहितो व्यापारः' धात्वर्थः। अत्र 'अनुकूलत्वम्' संसर्गः, 'अनुकूलत्वं च फलनिष्ठजन्यतानिरूपितजनकत्वम्।[१७] पच्धा–त्वर्थफलविक्लित्तिनिष्ठजन्यतानिरूपितोत्पादकता चूल्लिकोपरि पात्राधिश्रयणाग्नि–संयोगादिव्यापारजन्या सोऽयं व्यापारकलाप एव पचधात्वर्थोऽस्ति। एवंभूते लक्षणे कल्पिते प्रथमधात्वंशस्य कारणं फलं, व्यापारो नैव भवति। यतोहि फलं नित्यं जन्यतानिष्ठम्। नात्र जन्यतानिरूपितजनकता विद्यते। द्वितीयधात्वंशो व्यापारो धातुवाच्यः। देवदत्तः स्थाल्यां तण्डुलान्पचति इत्यादिवाक्ये स्थालीतण्डुलानां व्यापारो धात्वर्थव्यापारो न भवति। स्थालीतण्डुलानां स्वव्यापारसत्त्वेऽपि पच्धातुव्यापारात्तत्र भिन्नताऽस्ति। पच्धातुवाच्य–व्यापारो देवदत्तरूपकर्तृनिष्ठो न तु स्थालीरूपाधिकरणनिष्ठो नापि कर्मरूपतण्डुलनिष्ठः। कर्त्तरि 'स्थाली पचति' अथवा कर्मकर्त्तरि'–'पच्यते ओदनेन'–सदृशप्रयोगेषु स्थालीनिष्ठ–व्यापार ओदननिष्ठव्यापारो वा धात्वर्थत्वेनागम्यते, एतादृशेषु प्रयोगेष्वितरकारकाणाम–विवक्षाकारणात्। प्रथमवाक्ये व्यापाराश्रयत्वे स्थाली कर्त्ताऽस्ति तत्र कर्त्तरि प्रथमा युक्ता, द्वितीयवाक्ये कर्मणि प्रत्ययविधाने कर्तुरनभिधाने तृतीया।

१.२.२ अवान्तरक्रियाणां समाहारो व्यापारः

यथाऽन्यत्रोल्लिखितमस्ति फलसिद्ध्यर्थमा कार्यारम्भादा कार्यसमाप्तिं सकलयत्नानां नामास्ति व्यापारः। भर्त्तृहरिवचनं चात्र प्रमाणमस्ति–

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पितभेदः क्रियेति व्यपदिश्यते।। (वा.प.३.८.४)

कौण्डभट्टोऽपि "अयं च व्यापारः फूत्कारत्वाऽधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। न च नानार्थतापत्तिः। 'तदादि'न्यायेन बुद्धिविशेषणादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाऽपि अवच्छेदकबुद्धिविशेषैक्यमादायैव" इति विचारयन्नस्ति। पच्धात्वर्थो व्यापारः सर्वासां फूत्करणाधिश्रयणाधः–सन्तापन–विविधयत्न–परीक्षणाऽधःस्थापनादीनां संबद्धानामेकबुद्धि–विशिष्टानामवान्तरक्रियाणां समष्टिरेव। अत एतासु कस्याश्चिदपि क्रियायाः सम्पादनावसरे पचतीति आख्यातस्य प्रयोगः संगच्छते। अवान्तरक्रियाणां वैविध्येऽपि अनेकार्थक–हरिशब्दवत्पच्धातोरनेकार्थता न शङ्कनीया। विष्णवहीन्द्रादिष्वर्थेषु हरिशब्दस्यानेकार्थता। तथा च पर्यायः

हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ।
चन्द्रे कोले प्लवङ्गे च यमे वाते च कीर्त्तितः।।

तथा नात्र संकल्पना। अपि तु पुष्पमालायां पुष्पवैविध्येऽपि 'माला' इति यथैकबुद्धिः सञ्जायते तथैव समासामवान्तरक्रियाणामेकमुद्देश्यं भवति विक्लित्तिरूपं फलोत्पादनम्। यथा वा तदिदमादयः सर्वनामशब्दाः। स वानरः, सा लता, तत्कुलम्, अयं घटः, इयं बाला, इदं फलमित्यादिप्रयोगेषु पदार्थवैविध्यं बोधयन्तोऽपि नानार्थका न भवन्ति तद्वदत्रापि समानता। अवान्तरक्रियाणां वैविध्येन न धातुभेदः। 'आख्यातेन एका किया प्रत्याय्यंते' इति न्यायः। सहबद्धानां नैकासां क्रियाणामुद्देश्यैकत्वने परस्परमनुपूरकत्वम्। ता अवान्तरक्रियाः समकालमेव न जायन्ते। ताः क्षणस्थायिन्यः प्रत्येकं क्रमपूर्विकया सम्भवन्ति। अग्रिमक्रियोत्थानात्पूर्वं तत्पूर्वक्रियाया विनाशोऽवश्यं भवति। सर्वासां पूर्वपूर्वसंघटितानां क्रियाणां विनाशेऽपि बुद्धिस्थया अभेदकल्पनया तासामेकरूपत्वं धातोश्चैकार्थत्वं निर्विवादम्।

१.३.० भाव–क्रियाऽऽख्यात–व्यापारविषयणिी ऐतिहासिकी दृष्टिः

'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' (निरुक्तम् १.१.१) इति यास्कोक्तलक्षणं संक्षिप्तं दुरूहं च। पतञ्जलितो भर्त्तृहरिपर्यन्तं वैयाकरणैः प्रभावितेन दुर्गाचार्येणास्य व्याख्यानं कुर्वता पक्षद्वयमुपन्यस्तम्।

(क) क्रियया भावस्योत्पत्तिर्भवतीति क्रिया नाम व्यापारविशेषो भावोऽस्ति तस्या अन्तिमपरिणतिः फलरूपः। क्रियापदेन भावव्यापारौ बोध्यौ किन्तु फलरूपभावो मुख्यार्थोऽस्ति।[१८]

(ख) अन्ये फलव्यापारौ भावान्तर्गतौ मन्यन्ते। फलव्यापारौ धात्वर्थौ, प्रत्ययार्थस्तयो वैशिष्ट्यं प्रकटयतः। क्रियापदं धातु–तिङां च समूहो यत्र प्रकृत्यर्थस्य प्राधान्यं प्रत्ययार्थस्य विशेषणता। 'भावप्रधानमाख्यातम्' इत्युक्तेः स्वारस्यमिदम्।[१९] नागेशस्तु 'भावप्रधानमाख्यातम्' इत्यस्य स्थाने 'क्रियाप्रधानमाख्यातमिति पाठं साधीयांसं मन्यते। 'क्रियते अनया' इति करणव्युत्पत्त्या क्रियाशब्दो व्यपारार्थस्य बोधको व्यापारेणैव क्रियासम्पादनात्। 'क्रियते इयमिति' क्रिया कर्मव्युत्पत्त्या क्रियापदस्यार्थः स्यात्फलमिति, व्यापारेणैव फलस्य सिद्धेः। अतो यास्कप्रयुक्तः क्रियाशब्दः (भावः) फलव्यापारयोर्बोधको भवति।[२०] वस्तुतः क्रिया व्यापारो वा भावोऽस्तीति यास्कीया मान्यता। अतः पूर्वापरीभूतभावप्रतीतिराख्यातेन भवतीति कथनं संगच्छते। पूर्वापरीभावत्वे व्यापारकलाप एव सम्भवति न फले।[२१] यास्कदृष्टया भावः सत्ताविशेषो यस्य षड्भावविकाराः सम्भवन्ति। एताः स्थितयो निखिलगुणक्रियाद्रव्याणामपि सम्भवन्ति। आचार्यवार्ष्यायणिरस्य मतस्य प्रवर्त्तकः।[२२] तत्राप्यस्ति पञ्तजलेः सम्मतिः।

यद्यपि पाणिनिनाऽऽख्यातस्याऽथवा क्रियायाः साक्षाल्लक्षणं न कुत्रापि प्रदत्तं तेन प्रयुक्तेभ्यः क्रियावाचिशब्देभ्यस्तथा क्रियास्वरूपबोधकशब्देभ्यश्च तदीयविचारस्य निष्कर्षः कलयितुं शक्यते। क्रियापदानि तिङन्तानि भवन्ति। तिङश्च धातोर्भवन्तीति तदीयाशयः[२३]। भूवादयो धातवः (पा. १.३.१) इति धातुसंज्ञाविधायकसूत्रबलेन भूप्रभृतीनां वा सदृशानां च धातुपाठगतक्रियावाचिशब्दानां धातुसंज्ञा विहिता।[२४] 'भुवं वदन्तीति भूवादय इति महाभाष्यम्।[२५] भूयते इति भावः स तु धात्वर्थोऽस्ति। भावार्थकप्रत्यय–विधानाज्ज्ञाप्यते एतत्। भावार्थकप्रत्ययाः क्रियाया भावसामान्यस्यैव बोधकाः सन्ति।[२६] भावस्तु द्विविधः सिद्धः साध्यश्च। सिद्धत्वबोधनं कृद्भिः साध्यत्वबोधनं तु तिङ्भिः सम्भवति। पाणिनिर्धातुं बोधयितुं भाव–क्रियाशब्दयोः प्रयोगं कृतवान्दृश्यते।[२७]

धातुस्वरूपविवेचने पञ्जलेर्विविधा दृष्टयः समवलोक्यन्ते। तन्मतेन सर्वेषु धातुषु क्रियात्वमथवा करोतिभावः सामान्येन स्थितोऽस्ति। 'क्रियावचनो धातुः' इति तदीयं धातुलक्षणम्। किं करोति? पचति, किं करिष्यति? पक्ष्यति, किमकार्षीत्? अपाक्षीत् इत्यादिप्रयोगेषु पच्–कृ–धातुद्वयस्य सामानाधिकरण्यं सिद्ध्यति। किन्तु अस्ति–भवति–विद्यते इत्यादिक्रियासु करोतेः सामानाधिकरण्याऽसम्भवात् पूर्वोक्तलक्षणसंगतौ 'भाववचनो धातुरिति' तेन लक्षणं निर्मितं येनास्त्यादीनां भावत्वं च स्वतो बुध्यते।[28] ननु क्रिया–भावयोर्व्यापारसामान्यवाचित्वेऽपि पूर्वोक्तरीत्या लक्षणद्वयस्याऽनावश्यकतेति वाक्तव्ये सपरिस्पन्दाऽपरिस्पन्दभेदेन व्यापारप्रकारद्वयबोधनाय लक्षणद्वयं संगतमिति नागेशाशयः। सपरिस्पन्दव्यापारे शरीरचेष्टाया अवश्यं भावित्वमत एव करोतिक्रियायाः सामानाधिकरण्यम्। अपरिस्पन्दव्यापारे शरीरचेष्टाऽनिवार्या न भवति, भवत्यादिक्रिया अपरिस्पन्दव्यापारबोधिका भवन्ति।[29]

भाववचनस्य सारस्त्रिधा एवं संकलयितव्यः १. पचत्यादयो व्यापारविशेषाणाम् २. करोति सपरिस्पन्दव्यापारसामान्यस्य ३. अस्ति–विद्यतेभवत्यादयोऽपरिस्पन्दव्यापारसामान्यस्य च बोधकाः सन्ति। क्रियावचनो धातुरिति लक्षणं सपरिस्पन्दव्यापारसामान्यबोधनधिया विहितम्। भाववचनो धातुरिति लक्षणं च सपरिस्पन्दाऽपरिस्पन्दव्यापारसामान्यं बोधयितुमिष्टम्। अनेन लक्षणद्वयमपि संगच्छते। यथा क्रियारूपव्यापारसामान्यबोधनात् पचत्यादीनां धातूनां करोतिना सह सामानाधिकरण्यं तथैव भावरूपव्यापारसामान्यबोधनात् भवतिना सह पचत्यादीनामपि सामानाधिकरण्यम्।[30] एतावदेव पार्थक्यमुभयोः प्रकारयोर्यत्करोतेः सामानाधिकरण्ये सर्व–काल–पुरुष–वचनानि प्रयोज्यानि भवेयुः। किन्तु भवतेः सामानाधिकरण्ये केवलं भवतीति लट्–प्रथमैकवचनरूपविशेषस्य प्रयोगो भवति। अद्यतनसंस्कृते नैकक्रियासंवलितवाक्यानामभावात् 'पक्ष्यति भवति' 'अपाक्षीद् भवति' इत्यादिवाक्येषु पचत्यादिक्रियाः कल्पाः सन्ति। कर्तृकर्मरूपेण क्रियाद्वयमन्वितं दृश्यते नैकेषु स्थलेषु। यथा 'पश्य मृगो धावति' इति वाक्ये धावतिक्रिया पश्यतिक्रियायाः कर्माऽस्ति।[32] यथाऽनेकसुबन्तमपरस्य सुबन्तस्य विशेषकं भवति तथैवाऽनेकतिङन्तमपि तिङन्तस्यापरस्य विशेषकं भवितुमर्हतीति भर्तृहरेराशयः।[33]

कारकाणां प्रवृत्तिविशेषः क्रियेति पुनः क्रियायास्तात्पर्यं व्यापार इति व्यपदिष्टः। प्रवृत्तिविशेषो नाम व्यापारविशेषः। प्रवृत्तयः परस्परं भिद्यन्ते। शुष्कौदने यथा प्रवृत्तिर्मांसौदने तद्भिन्ना प्रवृत्तिः कर्त्तरि दर्शनात्। अस्ति–म्रियते इत्यनयोस्तथैव प्रवृत्तिभिन्नता।

अस्धातुना कर्त्तृव्यापारविशेषो बुध्यत एव।[३४] प्रतिकारकस्य विशिष्टप्रवृत्तिः क्रिया। कस्मिंश्चिदपि वाक्ये कर्तृवाच्यपरको धातुः कर्त्तृजन्यं व्यापारं बोधयति। कर्मणि वाच्ये कर्मणो बोधनं भवति। कर्तृकर्मविहायेतरकारकाण्यपि कदाचित्स्वतन्त्रव्यापारवन्ति कर्त्तृत्वमापद्यन्ते। तदा तेषां प्रवृत्तिविशेषबोधो भवति। स्थाली पचतीतिवाक्येऽधिकरणत्वं परिहाय स्थाली स्वव्यापारे स्वतन्त्रा सती कर्त्तृत्वं भजते। तथैव सम्प्रदानापादानकारके विहाय कारकान्तराणि कर्त्तृत्वमापद्येरन्। अतः कारकाणां प्रवृत्तिविशेषः क्रियेति भाष्यवचनस्य सहेतुकता निःसन्दिग्धा। 'प्रवृत्तिविशेष' इत्यस्याशयं स्पष्टीकुर्वता हेलाराजेन मतत्रयं प्रस्तावितम्। (क) (यथोपरिविवेचितम्) एकेषामाचार्याणां मतेन प्रवृत्तिविशेषस्यार्थोऽस्ति व्यापारः, (ख) अन्ये प्रवृत्तिविशेषो विक्लित्त्यादि–फलरूपमिति मन्यन्ते।[३५] (ग) अवशिष्टानामाचार्याणां मतेन प्रवृत्तिविशेषो नाम समेषां कारकाणां सामान्यव्यापार इति प्रवृत्तिसामान्यमिति वा न कस्यापि कारकविशेषस्य।[३६] तथा सति प्रतिक्रियापदं धात्वंशो धातुसामान्यस्य तथा धातुविशेषस्य च बोधकस्तिष्ठति। यथा पचतिपदे पच्धातुर्धातुसामान्यरूपेण फलव्यापारयोर्धातुविशेषरूपेण विक्लित्तिफूत्कारादीनां च बोधको भवति।

१.३.१ क्रियाया अप्रत्यक्षता

निरुक्तकारेण पूर्वापरीभूताभावबोधने क्रियात्वमभिप्रेतम्। सांशे सखण्डे च व्यापारे सति आदिमांशस्य समाप्त्यनन्तरं द्वितीयांशस्य पुनर्द्वितीयस्मात्परं तृतीयस्येतिक्रिमेण क्रियोत्पत्तिर्भवति। निवृत्तिपर्यन्तं सोऽयं क्रियाक्रमश्चलति। क्षणस्थाय्यपि व्यापारः समेषामवान्तरक्रियाणां सामूहिकरूपत्वेन समकालमेव कदापि प्रत्यक्षतां न गच्छति। यथोक्तं भाष्यकारेण –'क्रिया नामेयमत्यन्तापरिदृष्टा। अशक्या क्रिया पिण्डीभूता निदर्शयितुम्। यथागर्भोऽनिर्लुण्ठितः।' (पा.१.३.१ सूत्रोपरि)। सोऽयं सिद्धान्तो भर्तृहरिणाऽतिरोचक–तयोपन्यस्तोऽस्ति। यथा क्षणस्थायिनां ग्–औ–विसर्जनीयवर्णानां चरमप्रत्यक्षकाले एव गौरिति पदस्य बोधो भवति, यथा वा अलातचक्रस्य विविधज्वालानां घूर्णनहेतुकः प्रतीतिविशेषो भवति तद्वदवान्तराणां क्रियाणां समूहोऽखण्डकारेण प्रतिभासितो भवति।[३७] न केवलमग्निप्रज्वालन–फूत्कारादयो नैके भागा भवन्ति पच्धातुनिष्ठव्यापारस्य नैकेऽपि उपभागाः समवलोक्यन्तेऽग्निप्रज्वालनस्य च यथा – इन्धनाहरणैकत्रीकरणाऽग्नौ संस्थापनादयः।[३८] विघटनस्येयं प्रक्रिया तादृशीं स्थितिं भजमाना दृश्यते यत्र केवलमेको व्यापारोऽवशिष्यते। तादृशे व्यापारान्तिमांशे क्रियेति व्यपदेशो नैव युज्यते नाऽपि पूर्णव्यापारे।[३९]

अत एव क्रिया त्वप्रत्यक्षेति दार्शनिकैः सुतरां साधिता। अन्येषामाचार्याणां मतेन स एव चरमव्यापारः क्रिया भवेत् यस्या अव्यवहितोत्तरकालं फलं तु निष्पाद्यते। यद्यपि ताः सर्वाः क्रिया आनुपूर्विकया संघटिताः सन्त्यः फलनिष्पत्तौ युञ्जाना विचारितास्ताः सर्वाः स्वस्वोत्तरकालघटितानां क्रियाणामेवोत्पादिकाः सन्ति। केवलमन्तिमा क्रिया यदुत्पत्तेरव्यवहितोत्तरकालमेव फलोत्पत्तिर्जाता सैव क्रियापदवाच्या। तत्तत्पूर्वोत्थापिता निखिलाः क्रिया गौण्या लक्षणयैव क्रियासंज्ञात्वं भजन्ते।[60]

१.३.२ क्रियाया अखण्डता

पचति–पचतः पचन्त्यादिक्रियापदेषु एकत्व–द्वित्व–बहुत्वादीनां बोधो न भवति, केवलं कर्त्तुः संख्याबोधनम्। नापि क्रियायां पुरुषभेदः। एकेन द्वाभ्यामथवा नैकैः कर्त्तृभिः सम्पादिता क्रियेकप्रकारिका भवति। तथैव पचति–पचसि–पचाम्यादिक्रियापदानि दृष्ट्वा क्रियाणां पुरुषबोधो भवति। कर्त्तृगतपुरुषभेदानुकारमेवैतेषु पुरुषभेदः।[61]

१.३.३ निष्कर्षः

वस्तुतो व्याकरणदर्शनस्य प्रमुखप्राचीनतत्त्वज्ञानां भाव–क्रियाऽऽख्यात–व्यापारादिशब्दस्वरूपविवेचने मतपार्थक्यं सुतरां चकास्ति। व्यक्तिपक्षे भावो व्यापारो वा क्रिया, जातिपक्षे सत्ताऽथवा स्थितिः क्रियेति विचारयन्त्येके। सैव सत्ता जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते नश्यतीति षड्भावविकारैर्विवर्त्तिता भवति। सूक्ष्मदृष्ट्या एते सर्वे विकाराः सामान्येनाऽऽविर्भाव–तिरोभावात्मक–तयाऽथवा जन्मनाशरूपतया द्वयोरेव भावविकारविभागयोरन्तर्भाविताः स्युः। वस्तुत एतेषु कोऽपि विकारविशेष आविर्भाव–तिरोभवयोरन्यतरस्थितौ वर्तमानोऽनुभूयते। तावाविर्भावतिरोभावावेव सत्ताया विकारोऽस्ति। अन्तिसत्ताऽविनश्वरा, सैव क्रियावाच्या।[62] आख्यातशब्दविषयेऽपि मतवैविध्यं विद्यते। कदाचिद् धातुं कदाचिन्न क्रियापदं बोधयितुं प्रयुक्तः स शब्दो यास्केन।[63] भावशब्दस्य प्रयोगः क्रियां व्यापारं वाऽभिप्रैति।[64] दुर्गाचार्यस्य मतानुसारं भावशब्दः फलार्थस्यापि वाचकोऽस्ति।[65] पाणिनिस्तु धात्वर्थबोधनाय कदाचित्क्रियाशब्दस्य कदाचिद्भावशब्दस्य च प्रयोगः कृतो दृश्यते।[66] क्रियाभावशब्दयोः प्रयोगे पाणिनेरभिप्रायो महाभाष्यदिव्याख्याग्रन्थेषु परिष्कारितो दृश्यते। भाष्यकारः क्रियाशब्दमाह।[67] भट्टोजि–कौण्डभट्ट–नागेशभट्टादीनामर्वाचीनानां वैयाकरणानां पूर्वोक्तपारिभाषिकशब्देषु मतद्वैधं सांकर्य वा न दृश्यते। विषयप्रतिपादने

तेषां कृतिषु समानशब्दानां प्रयोगो विहित:। एतेषां मतानुसारम् आख्यातादीनामर्थ–विशेषास्त्वेवंभूता:[४९]–

आख्यातम् = क्रियापदम् (धातु–तिङ्–योगजन्यं परिनिष्ठितरूपम्)

धातु: = क्रियापदानां प्रकृति:

फलं व्यापारश्च = धात्वर्थ:

तिङ: = क्रियापदेषु विहिता: प्रत्यया:

१.४ फलव्यापारसन्दर्भे नैयायिकमीमांसकानां विचार:

नैयायिका वैयाकरणा इव फलव्यापारौ धात्वर्थं मन्यन्ते किन्तु (क) कर्तु–कर्म–संख्या–कालरूपे तिङर्थे तेषां विमति:। (ख) तन्मतेनाऽऽख्यातार्थ: (तिङर्थ:) भवन्ति यत्नपर्यायवाचिकृति: (ग) पुन: शाब्दबोध: प्रथमान्त–विशेष्यस्तिष्ठति। यथा 'देवदत्त ओदनं पचति' इति वाक्यस्य शाब्दबोधोऽस्ति ओदनकर्मकविक्लित्त्यनुकूल–व्यापारनुकूलकृतिमान् देवदत्त:। अत एवाऽऽख्यातार्थकृतिप्रथमान्ततार्थमुख्यतादृष्ट्या वैयाकरणनैयायिकानां परस्परं विरोध:।

मीमांसकानां मतेन फलमेव धात्वर्थ:। व्यापारस्तु आख्यातार्थ: (तिङर्थ:)। व्यापाराश्रयकर्तृकर्मणी लक्षणयाऽऽक्षिप्ते मते। वैयाकरणानां शाब्दबोध इवैषामपि व्यापार–प्रधानकोऽस्ति। 'देवदत्त: पचति' इति वाक्यस्य 'देवदत्ताभिन्नैककर्तृकवर्त्तमानकालिक–विक्लित्त्यनुकूलो व्यापार', इति। विस्तारभिया सारांशत एवायं विचारोऽत्रोपन्यसोऽस्ति।

१.५ सकर्मकाऽकर्मकत्वनिरूपणे धात्वर्थविचारस्य सहेतुकता

फलव्यापारयोर्धातुरिति लक्षणं धातूनां सकर्मकाऽकर्मकत्वविचारे सुतरां स्हयोगं करोति। (क) येषां धातूनां फलव्यापारौ समानाधिकरणकौ ते सन्ति धातवोऽकर्मका:।[५०] 'देवदत्त: शेते' इति वाक्ये निद्रारूपं फलं तदनुकुलव्यापारश्च देवदत्तनिष्ठौ। अत एव शीधातुरकर्मक:। (ख) नितान्तवर्जितफलांशका धातवोऽपि अकर्मका:। अस्ति–विद्यते–वर्ते–आदीनां धातूनां फलांशप्रतीति: सूक्ष्यतयाऽपि सम्भवति।[५१] यास्कस्यापि मतमस्ति यदस्तां क्रियायामुत्पन्नसत्त्वस्वरूपधारणरूपसत्तैवार्थ:।[५२] भर्तृहरिमतेन –

आत्मानमात्मना विभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः।।

(वाक्यप. ३.३.४७)

अस्तिक्रियायाः प्रयोग आत्मनाऽऽत्मानं विभ्रद् इत्यर्थे भवति। तस्य मतेनाऽऽत्म–रूपकर्मणो धात्वर्थेऽन्तर्भावात् स धातुरकर्मको विविच्यते। भर्त्तृहरिणाऽपिधातूनामकर्मकत्वं विमृशतोच्यते।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।।

(वाक्यप. ३.७.८८)

कारिकायास्तात्पर्यमिदम् (क) सकर्मकधातुर्यद्यकर्मकधात्वर्थे प्रयुज्यते तर्हि सोऽवश्यमकर्मकतां याति यथा 'दासी भारं वहति'– प्रयोगे 'वहति' सकर्मकः। किन्तु स्यन्दनार्थेऽकर्मको–वहति' 'नदी वहति' इत्यादौ, (ख) यदि कर्म धात्वर्थेऽन्तर्भुक्तं भवेदकर्मकताप्ति'– 'जीवति' नाम प्राणानां धारणां करोति यत्र प्राणरूपकर्मणो जीवधातावन्तर्भावः। तथैव 'नृत्यति' 'गात्रं' विक्षपति' इत्यर्थे गात्ररूपकर्मणो नृत्धा–तावन्तभवः। पूर्वालोचितभूधातुरपि आत्मानमात्मना विभ्रदर्थे 'आत्मरूपं' कर्म धात्वर्थेऽन्तर्भुक्तम्, (ग) प्रसिद्धिवशात् सकर्मकधातूनामकर्मकत्वावाप्तिर्यथा 'मेघो वर्षति' यत्र वर्षाक्रिया जलवर्षणेऽर्थे प्रसिद्धाऽत एव जलरूपकर्मणोऽनावश्यकता, (घ) कदाचिद् विवक्षात् सकर्मकधातुरकर्मकत्वं भजते। सकर्मकोऽपिधातुर्यत्राऽकर्मकवद् व्यवह्रियते– 'हितान्न यः संशृणुते स किं प्रभुः' (किरात. २.७) इत्यादि।

नन्वात्मानं जानाति, इच्छत्यादिवाक्येषु ज्ञाधातोः फलज्ञानस्य ज्ञानानुकूलव्यापारस्य च कर्त्तृनिष्ठतया ज्ञाधातोरकर्मकत्वमिति चेत् समाधनमत्र भाष्यरीत्यैवं भवति– 'द्वात्मानौशरीरात्मा अन्तरात्मा च। अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुखेऽनु–भवते'। अत एव ज्ञाधातोर्ज्ञानरूपफलं विषयतासम्बन्धेन शरीरात्मनिष्ठं तदनुकूलक्रिया–रूभावनाऽन्तरात्मनिष्ठा येन योरसामानाधिकरण्यम्। तयोर्भिन्नाधिकरणवृत्तित्वे ज्ञाधातुः सकर्मकः। तथा च भर्त्तृहरिः–

एकस्य बुद्ध्यवस्थाभिर्भेदे च परिकल्पिते।
कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते।।

(वाक्यप. ३.७.१०४)

धातूनामकर्मकत्वे नियामकतत्त्वानि तत्तद्विशिष्टार्थत्पराणि सन्ति यथा–

लज्जा–सत्ता–स्थिति–जागरणं वृद्धि–क्षय–जीवितमरणम्।
शयन–क्रीडा–रुचि–दीप्त्यर्थं धातुगणं तमकर्मकमाहुः।।[13]

लज्जादित्रयोदशधातूनां तत्पर्यायवाचिनां चाकर्मकत्वं स्वतः सिद्धमिति शास्त्रकाराः।

सकर्मकत्वं नाम फलव्यधिकरणव्यापारवाचकत्वम्। देवदत्तस्तण्डुलान् पचतीति वाक्ये पचतिधात्वर्थं फलं विक्लित्तिस्तण्डुलनिष्ठा, विक्लित्त्यनुकूलव्यपारः फूत्कारादिः कर्तृदेवदत्तनिष्ठः। अत एव तयोर्भिन्नाधिकरणत्वे पच्धातुः सकर्मकः तथैवोत्तरदेश–संयोगानुकूलव्यापरो गच्छत्यर्थः। अत्र संयोगरूपफलं समवायसम्बन्धेनोभयग्रमदेवदत्तनिष्ठम्। तथा सति उत्तरदेशसंयोगरूपफल तदनुकूलव्यापारस्य च कर्त्तरि देवदत्ताधिकरणे सत्त्वात् फलव्यापारयोरेकाधिकरणत्वे पूर्वप्रतिपादनानुसारं गम्धातोरकर्मकाप्तिः। किन्तु कौण्डभट्टेनात्र[14] सयुक्तिकं गम्धातोः सकर्मकत्वं प्रतिष्ठापितम्। पूर्वोद्धृतायां सिद्धान्त–कारिकायाम्[15] 'एकनिष्ठतायाम्' इति पदमेकमात्रनिष्ठतायामित्यर्थं व्यनक्ति। गम्धातोः प्रसङ्गे यद्यपि व्यापारः केवलकर्तृनिष्ठोऽस्ति संयोगरूपफलं तु ग्रामदेवदत्तयोरुभय–योस्तिष्ठति। फलस्योभयनिष्ठत्वादेकाधिकरणमात्रनिष्ठताया अभावात्तस्याकर्मकत्व–लक्षणाऽसंगतिरत एव गम्धातुः सकर्मकः।[16]

किन्तु नागेशभट्टेन कौण्डभट्टीयः परामर्शः पूर्णतया निर्दुष्ट इति न स्वीकृतः। 'अधिशीङ्स्थासां कर्म' (पा. १.४.४६) इति सूत्रबलेन भूमिमधिशेते अधितिष्ठति–अध्यास्त आदिक्रियासु नायं संगच्छते नियमः। शब्दशास्त्रीयमर्यादाबलेनैतेषां सकर्मकत्वं केषां नानुमतम्। अपि चैतेषां सकर्मकत्वप्राप्तिबलेन 'अध्यासिनाभूमयः' इति कर्मवाच्ये आधारस्यापि भूमेः कर्मप्रयोगो युज्यते'। कर्मत्वान्वयबलेन आसधातुः सकर्मकः सिध्यति, न तु पूर्वालोचितसकर्मकत्वनिरूपफलक्षणबलेन। अत एव व्याकरणशास्त्रे येषां सकर्मकत्वमुपदिष्टंन एव धातवः सकर्मकास्तदितरेऽकर्मका इति नागेशस्य मतिः।

अन्ततो गत्वा लक्षणीयमिदं यत् प्राचीनभारतीयमनीषिणः पदपदार्थसमर्पणे अतिगूढं तलस्पर्शि च विचारमन्थनं कृतवन्तो दृश्यन्ते। फलव्यापारात्मकधात्वर्थविवेचनं तूपलक्षणमेव। इति शम्।।

संदर्भाः

१. द्रष्टव्याः द्र. वैयाकरणभूषणसारः, दर्पणसंस्कृतव्याख्यया सुबोधिनीहिन्दी–व्याख्यय च समलङ्कृतः, चन्द्रिकाप्रसादद्विवेदि–संपादित, चौखम्बा सुरभारती प्रतिष्ठानम्, दिल्ली, १९८९, पृ. ६

२. द्र. जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।
असाध्य व्यक्तिरूपेण स साध्येवोपलभ्यते। ३.८ *वाक्यपदीयम्* क्रियासमुद्देश (क्रि.स) २१, पृ. ९४ (के.भि.आभ्यङ्कर–भि.पि. लिमायेसंपादितम्, पुना–वेश्वविद्यालय–प्रकाशितम् १९६५–संस्करणमत्रानुसृतम्)।

३. द्र. कर्तरि शप् – पा. ३.१.६८, अदिप्रभृतिभ्यः शपः –पा. २.४.७२ जुहो–त्याभ्यःश्लुः' पा. २.४.७५, दिवादिभ्यः श्यन्–पा. ३.१.६९, स्वादिभ्यः श्नु– पा. ३.१.७३, तुदादिभ्यः शः–पाः ३.१.७७, रुधादिभ्यः,श्नम् पा ३.१.७८, तनादिकृञ्भ्य उः–पाः ३.१.७९, क्र्यादिभ्यःश्ना–पा. ३.१.८; सत्यापपाश, ... चुरादिभ्योणिच्, पा.३.१.२५।

४. द्र तु–रु–स्तु–शम्यमः...। तु इति सौत्रोऽयं धातुः। पा. ७.३.९५ उपरि काशिकावृत्तिः, स्तम्भु–स्तुम्भु–स्कम्भु–स्कुम्भुस्कुञ्भ्यः श्नुश्च। (पा.३.१.८२) काशिकायामुच्यते–'आद्याश्चत्वारो धातवः सौत्राः' इति।

५. द्र. कण्ड्वादिभ्यो यक्–पा.३.१.२७ : कड्वादिराकृतिगणः, एकादशगणः खलु।

६. द्र. सनाद्यन्ता धातवः –पा. ३.१.३२, पा. ३.१.५ इति आरम्भ्यः पा.३.१.३२ सूत्रावधि सर्वे सनाद्यन्ता धातव इति अतिदेशेन धातुसंज्ञका भवन्ति।

७. द्र. वैयाकरणभूषणसारः पूर्वोल्लिखित, हिन्दीव्याख्या, पृ.७।

८. तत्रैव

९. द्र. *महाभाष्यम्* पा.१.३.१ सूत्रोपरि– 'क्रियोवचनो धातुः। का पुनः क्रिया? ईहा। का पुनरीहा? चेष्टा। का पुनश्चेष्टा? व्यापारः। कथं पुनर्जायन्ते क्रियावचनाः पचादय इति। यदेतेषां करोतिना सामानाधिकरण्यम्। कि करोति? पचति। इह पचतीत्युक्ते कश्चित्शब्दः श्रूयते पच्शब्दश्चकारान्तः, अतिशब्दश्च प्रत्ययः अर्थोऽपि कश्चिद् गम्यते–विक्लित्तिः कर्तृत्वमेकत्वं च।

१०. द्र. *वैयाकरणसिद्धान्तपरमलघुमञ्जूषा*, 'धात्वर्थनिर्णय:', (संपदनम्), कपिलदेव–शास्त्री, कुरुक्षेत्र–विश्वविद्यालय:, १९७५, पृ. १२६।

११. तत्रैव पृ. १३१ : परे तु फलव्यापारयोर्धातो: पृथक् शक्तावुद्देश्यविधेयभावेन अन्वयापत्तिस्तयो: स्यात्। पृथगुपस्थितयोस्तथाऽन्वयस्य औत्सर्गिकत्वात्। किञ्चैकपदे व्युत्पत्तिद्वयकल्पनेऽतिगौरवम्। तथाहि फलविशेषणकव्यापारबोधे कर्तृप्रत्यय–समभिव्याहृत–धातुजन्योपस्थिति: कारणम्। व्यापारविशेषणक–फलबोधे कर्मप्रत्ययसमभिव्याहृत धातुजन्योपस्थिति: कारणमेति कार्यकारण–द्वयकल्पनम्, धातोरर्थद्वये शक्तिद्वयकल्पनं, धातोर्बाधजनकत्वसम्बन्धद्वयकल्पनं चातिगौरवम्। तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्ति:। कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहाराच्च तत्तद्बोधे नियामक:– इत्याहु:।

१२. द्र. स्वरितञित: कर्त्रभिप्राये क्रियाफले–पा. १.३.७२ शेषात्कर्तरि परस्मैपदम्–पा. १.३.७८

१३. द्र. *परमलघुमञ्जूषा*, पूर्वोल्लिखिता, पृ. २७

१४. तत्रैव, पृ. ४३–१४४

१५. द्र. *वैयाकरणभूषणसार:*, दर्पणसंवलित, पूर्वोल्लिखित: पृ. १२

१६. तत्रैव, पृ.११

१७. द्र. *परमलघुमञ्जूषा*, पूर्वोल्लिखता, पृ. १२९

१८. द्र. नामपदवाच्यार्थाश्रयक्रियाव्यंग्यो भाव: पाकरागत्यागाख्य:। स यत्र प्रधानं गुणभूता क्रिया तदिदं भावप्रधानम्। किं पुनस्तदिति? आख्यातम् आखतेनानेन गुणभावेन वर्त्तमाना अनेककारकप्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावा–भिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन वर्त्तमानो भाव: स्वात्मलाभ–प्रधान इत्याख्यातम्। दुर्गस्य निरुक्तव्याख्या १.१.१. उपरि।

१९. द्र. एके पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते। प्रकृत्यर्थ–विशेषणं हि प्रत्ययार्थादय इति। भाव: कर्म, क्रिया धात्वर्थ इत्यनर्थान्तरम्। स यत्र प्रधानं गुणभूतानि साधनानि, तदिदं भावप्रधानम्। किं पुनस्तत्? आख्यातम्। पूर्वत्रैव।

२०. द्र. क्रियाप्रधानमाख्यातम्— इति यास्कोक्तौ क्रियापदं करणव्युत्पत्त्या व्यापारपरं कर्मव्युत्पत्त्या फलपरमिति बोध्यम्। तथा च 'ग्रामं गच्छति चैत्रः' इत्यत्र 'एकत्वावच्छिन्न—चैत्राभिन्नकर्तृको वर्त्तमानकालिको ग्रामाभिन्नकर्मनिष्ठो यः संयोगानुकूलो व्यापारः। 'ग्रामो गम्यते मैत्रेण' इत्यत्र तु मैत्रकर्तृकवर्तमान—कालिकव्यापारजन्यो ग्रामाभिन्नकर्मनिष्ठः संयोगः इति बोधः *परमलघुमञ्जूषा*, पूर्वोल्लिखिता, पृ. २४५।

२१. द्र. पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्। निरुक्तम् १.१.१

२२. द्र. 'षड्भावविकारा भवन्तीति वार्ष्यायणिः — जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति। *महाभाष्यम्* १.३.१ उपरि।

२३. द्र. सुप्तिङन्तं पदम्—पा. १.४.४, धातोः —पा ३.१.९१ अस्य सूत्रस्योपरि काशिका : धातोरित्ययमधिकारो वेदितव्य आतृतीयाध्यायपरिसमाप्तेः।

२४. द्र. बालमनोरमाटीका, पा. १.३.१ सूत्रोपरि, *वैयाकरण--सिद्धान्त--कौमुदी* । चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९६९, पृ.२४।

२५. द्र. *महाभाष्यम्*, १.३.१ उपरि

२६. द्र. 'सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्स्यात्', — *सि.कौ.* ३१८४ सूत्रोपरि।

२७. द्र. क्रियार्थोपपदस्य च कर्मणि स्थानिनः पा. २.३.१४, तुमर्थाच्च भाववचनात्—पा. २.३.१५, तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् पा. ३.३.१०, भाववचनाश्च—पा ३.३.११, भावे — पा. ३.३.१८, क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः — पा. ३. ४.२ इत्यादीनि।

२८. द्र. *महाभाष्यम्* पा. १.३.१ उपरि।

२९. द्र. क्रियाशब्दः सपरिस्पन्दसाधनसाध्यार्थरूढो भावशब्दः सपरिस्पन्दाऽपरिस्पन्दा—ऽन्यतरसाध्य इति भावः। *उद्योत* १.३.१ उपरि, 'किं च परिस्पन्दस्वभावा लोके क्रिया प्रसिद्धा—'हेलाराजव्याख्या, *वाक्यपदीयम्* ३.८ (क्रियासमुद्देशः) १ कारिकोपरि'

३०. द्र. कथं पुनर्ज्ञायते भाववचनाः पचादय इति। यदेषां भवतिना सामाना—धिकरण्यम्, भवति पचति, भवति पक्ष्यति, भवत्यपाक्षीदिति *महाभाष्य* १.३.१. उपरि।

३१. द्र. क्रिया क्रियया समवायं न गच्छति, पचति पठतीति। महा. ३.१.६७ उपरि।

३२. द्र. 'ननु साध्यत्वात् क्रियायाः कथं क्रियान्तरं प्रति कर्मकर्तृभावः?

(क) विषयभेदादेकस्याप्यर्थस्य साध्यसाधनभावसम्बन्धसंभवाददोषः। कैयट प्रदीपः पा. ३.१.६७ उपरि।

(ख) यत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया।
सिद्धा तु यस्मिन्साध्यत्वं न तमेव पुनः प्रति।।

वाक्यप ३.८.५०

मृगो धावति पश्येति साध्यसाधनरूपता।
यथा विषयभेदेन सरणस्योपपद्यते।। *वाक्यप* २.६

३३. सुबन्तं हि यथानेकं सुबन्तस्य विशेषकम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषकम्।। *वाक्यप* २.६

३४. द्र. कारकाणां प्रवृत्तिविशेषः क्रियाः। अन्यथा कारकाणि शुष्कौदने प्रवर्त्तन्ते, अन्यथा च मांसौदने–अन्यथा हि कारकाणि अस्तौ प्रवर्त्तन्ते, अन्यथा म्रियतौ।' *महाभाष्यम्* पा. १.३.१ उपरि।

३५. द्र. 'अन्ये तु विशेषपदे भरं कृत्वा प्रवृत्तीनां विशेषः प्रवृत्तिविशेष इति सकलकारकजन्या विक्लित्त्यादिरूपा भूतिः फलभूता कारकप्रवृत्तेः क्रियेति व्याचक्षते'। हेलाराजव्याख्या, *वाक्यप.* ३.८.१ उपरि।

३६. द्र. नव्या हि फलजननैव साधारणात्मिका क्रिया प्रवृत्तिविशेष इत्युच्यते। प्रवृत्तिश्चार्थविशेषश्चेति। विशेषोऽस्याः फलजननरूपम् न पुनरधिश्रयणादि–रूपतैव। तेन जननाख्यो विशेषः प्रवृत्तीनां क्रिया। हेलाराजव्याख्या *वाक्यप.* ३.८.१ उपरि।

३७. द्र. यथा गौरिति संघातः सर्वो नेन्द्रियगोचरः।
भागशस्तूपलब्धस्य बुद्धौ रूपं निरूप्यते।।
इन्द्रियैरन्यथाप्राप्तौ भेदांशोपनिपातिभिः।
अलातचक्रवद्रूपं क्रियाणां परिकल्पते।।

वाक्यप. ३.८.७–८

३८. द्र. यथा च भागाः पचनेरुदकासेचनादयः।
उदकासेचनादीनां ज्ञेयां भागास्तथापरे।। *वाक्यप.* ३.८.९

३९. द्र. यश्चापकर्षपर्यन्तमनुप्राप्तः प्रतीयते।
तत्रैकस्मिन् क्रियाशब्दः केवले न प्रयुज्यते।। *वाक्यप.* ३.८.१०

४०. अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः।
प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्याता। *वाक्यप.* ३.८.१७

४१. द्र. (क) न तिङन्तान्येकशेषारम्भं प्रयोजयन्ति। किं कारणम्? यथा जातीयानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति तथाजातीयकानामेकशेषः। न च तिङन्तानां द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति। किं कारणम्? एका हि क्रिया। एकत्वेनोक्तत्वात् तस्यार्थस्य द्वितीयस्य पदस्य प्रयोगेण न भवितव्यम्। उक्तार्थानामप्रयोग इति— *महाभाष्यम्* पा. १.२.६४ उपरि।
ख. आख्यातवाच्या क्रिया सर्वत्र निर्वृत्तभेदा प्रतीयते। भवद्भिरास्यते इत्यादौ वस्तुस्थित्या कर्तृभेदादभेदेऽपि तिङन्ताद् भेदस्यानवगमात्। कैयट— *प्रदीप* पा. १.२.६४ उपरि।

४२. द्र. (क) अन्तरात्मनि या सत्ता सा क्रिया कैश्चिदुच्यते।
भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः।।
वाक्यप. ३.८.२४

(ख) आविर्भावतिरोभावौ जन्मनाशौ तथापरे।
षट्सु भावविकारेषु कल्पितौ व्यावहारिकौ।।
वाक्यप. ३.८.२६

(ग) जायमानात्र जन्मान्यद्विनाशेऽप्यपदार्थता।
अतो भावविकारेषु सत्तैका व्यवतिष्ठते।। *वाक्यप.* ३.८.२८

४३. द्र. (क) नामाख्यातजानीति शाकटायनो नैरुक्तसमयश्च,
(ख) भावप्रधानमाख्यतं सत्त्वप्रधानानि नामानि। *निरुक्तम्* १.१.१

४४. द्र. पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति, पचति इति।
निरुक्तम् १.१.१

४५. द्र. क्रियाव्यङ्ग्यो भावः पाकरागत्यागाख्यः। दुर्गाचार्यः, *निरुक्तम्* १.१.१ उपरि

४६. द्र. तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्। पा. ३.३.१०, भावकर्मणोः। पा. १.३.१३

४७. द्र. *महाभाष्यम्* पा. ३.१.१. उपरि (क) धातुरेव क्रियामाह। अर्थोऽपि कैश्चिदव-गम्यते विक्लित्तिः। (ख)कारकाणां प्रवृत्तिविशेषः क्रिया। (ग) भवनं भावः। भाव्यते यः स भावः। भाववचनो धातुः।

४८. द्र. यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेतत्यभिधीयते।। *वाक्यप.* ३.८.१
गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्धया प्रकल्पितभेदः क्रियेति व्यपदिश्यते।। *वाक्यप.* ३.८.४

४९. द्र. वलदेव सिंहः, *पदपदार्थसमीक्षा* (हिन्दीभाषायाम्), कुरुक्षेत्रविश्वविद्यालय, १९६९, पृ. ७६

५०. द्र. भूषणसारिका १३ – 'फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः।।
अपि च 'फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्,
परमलघुमञ्जूषा, पूर्वोदाहृता, 'धात्वर्थनिर्णयः,
पृ. १४८

५१. द्र. क्वचित्तु फलांशाभावादकर्मकत्वम्। यथाऽस्त्यादौ केवलं सत्तादिरर्थः। फलांशस्य सूक्ष्मतयाप्यप्रतीतेः। उत्पन्नस्य सत्त्वस्य स्वरूपधारणरूपां सत्तामाचष्टेऽ-स्त्यादि'। तत्रैव।

५२. द्र. अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्। *निरुक्तम्* १.१.३

५३. द्र. *परमलघुमञ्जूषा*, पृ. १४८

५४. द्र. टिप्पणी ७०।

५५. तत्रैव

५६. *भूषणसारः* पूर्वोदाहृतः पृ. ८९

५७. द्र. वस्तुतस्तु शब्दशास्त्रीय–कर्मसंज्ञाकार्थान्वय्यर्थकत्वं 'सकर्मकत्वम्'। तदनन्व-य्यर्थकत्व'मकर्मकत्वम्'। 'अधिशीङ्स्थाऽऽसां (पा. १.४.४६) इत्यनेन भूमय इत्याधारस्य 'कर्मत्वम्'। *परमलघुमञ्जूषा*, पृ. ४५।

किमिदं धातूनां सकर्मकत्वम्?

सच्चिदानन्दो मिश्रः

धातवस्तावद् द्विविधाः सकर्मका अकर्मकाश्च। सकर्मकाकर्मकपदयोर्यथा बोधो जायते तावता त्वेतदेवाभाति यत् यः कर्मणा समन्वितो भवति धातुः स सकर्मकः यश्च तद्रहितो भवति सोऽकर्मकः। किन्तु व्याकरणे न्यायसम्प्रदाये च सकर्मकाकर्मक–पदयोर्व्युत्पत्तिः स्वरूपनिरूपणञ्च काञ्चिदन्यां विचारसरणिमाश्रित्य क्रियते। अस्मिन्निबन्धे इममेवार्थं निरूपयितुं प्रयासोऽयं मामकः।

व्याकरणसम्प्रदाये फले व्यापारे च धातोः शक्तिः एकवृन्तगतफलद्वयन्यायेन स्वीक्रियते, किंवा फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च शक्तिः स्वीक्रियते। सर्वोऽपि धातुः फलस्यापि वाचको भवति व्यापारस्यापि। न हि कश्चन धातुः केवलस्य फलस्य न वा केवलस्य व्यापारस्य भवति वाचकः। अकर्मको वा भवेत् सकर्मको वा भवेद्धातुः फलव्यापारयोरुभयोरपि भवति वाचकः। क्रियाजन्यफलाश्रयत्वमेव कर्मत्वं भवति, अनया रीत्या क्रियाजन्यफला कर्मेत्युच्यते, यदि सर्वोऽपि धातुः फलव्यापारयोरुभयोरपि भवति स्तर्हि क्रियाजन्यफलाश्रयीभूतेन कर्मणा सर्वोपि धातुः सहितो भविष्यति। अतः सर्वैरपि धातुभिः सकर्मकैर्भवितव्यम्। किन्तु नैवं भवति, कश्चिदेव धातुः सकर्मको भवति कश्चन चाकर्मकः। तर्हि किं कारणमस्ति यस्माद् भवति सकर्मकाकर्मकव्यवहारः? अत्र समाधीयते वैयाकरणैः यदेतत् सत्यमस्ति यत् सर्वत्रैव क्रियाजन्यफलाश्रयो भवति किन्तु यत्र फल व्यापारयोर्वैयधिकरण्यं भवति तत्र भवति सकर्मकत्वं धातोर्यत्र च फलव्यापरयोः सामानाधिकरण्यं भवति तत्र भवति धातोरकर्मकत्वम्। उक्तञ्चैतत् 'वैयाकरणमतोन्मज्जने"—

'फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातोस्तयोर्धर्मिभेदे सकर्मक उदाहृतः। का.५

यद्यपि गम्यादावपि फलस्य उत्तरदेशसंयोगाद्यात्मकस्य द्विष्ठतया व्यापारस्य फलस्य च कर्तृनिष्ठतया विद्यत एवैकनिष्ठता, अतः सकर्मकाणां गम्यादीनामपि

भवत्यापन्नमकर्मकत्वम्, तथापि फलव्यापारयोरेकमात्रनिष्ठतायां धातोरकर्मकत्वव्यवहारो भवति कदाचनापि धर्मिभेदे भवति सकर्मकत्वव्यवहारः।[2] भ्वादीनामस्त्यादीनां हि स्वीक्रियतेऽकर्मकत्वं तेषामपि धातूनामपि फलव्यापारोभयवाचकत्वं विद्यते। प्रतिपादितं चैतत् भर्तृहरिणा 'वाक्यपदीये'–

'आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते'[3]।

न्यायसम्प्रदाये धातोः कः अर्थः? इति प्रश्ने त्रीण्युत्तराणि मतभेदेन दीयन्ते। एकं मतमस्ति धातोः केवलं व्यापार एवार्थः; द्वितीयं मतमस्ति फलावच्छिन्नव्यापारोऽर्थः; तृतीयं मतं विद्यते धातोः फले व्यापारे च शक्ति द्वयम्। विवृतञ्चैतत् विस्तरशोः व्युत्पत्तिवादे द्वितीयाकारकं धातुप्रत्ययप्रकरणे च। तत्र यदि तावद् धातोरर्थः व्यापारमात्रं तर्हि सकर्मकत्वमन्यविधं भवति, द्वितीयतृतीयमतयोश्चान्यविधम्। प्रथमपक्षे फलं नास्ति धातोरर्थः तद्भवति द्वितीया अर्थः सति चैवं गमिस्पन्द्यादीनां धातूनां क्रियामात्रवाचकतया पर्यायत्वं भवति तर्हि कुतो गम्यादेः सकर्मकत्वं स्पन्द्यादीनाञ्चाकर्मकत्वं भवति? अत्र समाधीयते यत् द्वितीयादेर्गम्यादिसमभिव्याहार एव फलबलादन्वयबोधौपयिकोभवति न तु स्पन्द्यादिसमभिव्याहार इति पक्षेऽस्मिन् फलान्वितव्यापारबोधक धातुत्वमेव सकर्मकत्वं भवति, फलानन्वितव्यापारबोधकधातुत्वञ्चाकर्मकत्वं भवति[4]।

द्वितीयपक्षे फलावच्छिन्नव्यापारवाचकत्वं हि सकर्मकत्वं फलानवच्छिन्नव्यापार–वाचकत्वञ्चाकर्मकत्वम्। प्रथमकल्पादत्रायं विशेषो यदत्र कल्पे सकर्मकाणां धातूनां व्यापारमात्रं नार्थः केवलानामकर्मकाणामेव व्यापारमात्रमर्थः। प्रथमे कल्पे तु सर्वेषामेव धातूनां व्यापारमात्रमेवार्थः। तथाहि गम्यादीनां उत्तरदेशसंयोगावच्छिन्नबोधकतया अस्त्यादीनाञ्च सत्तामात्रबोधकतया (व्यापारमात्रबोधकतया) सकर्मकाकर्मकत्वव्यवहारौ सम्भवतः। किन्तु प्रश्नोऽत्र भवति यत् पत्धातोरप्यनया रीत्या सकर्मकत्वमापन्नं भवति, यतोहि अधः संयोगावच्छिन्नव्यापारः पतेरर्थः इति फलावच्छिन्नव्यापारवाचकत्वं तस्य भवत्येव? अत्र समाधीयते यत् विद्यत एव पतेरपि सकर्मकत्वम्'। अपरमपि दीयते समाधानं यदाश्रया–नवच्छिन्नफलावच्छिन्न'व्यापारवाचकत्वं हि सकर्मकत्वं भवति। पतधात्वर्थतावच्छेदकीभूतं फलं त्वाश्रयेणाधोदेशेन भवत्यवच्छिन्नमिति न तस्य सकर्मकत्वं भवति।[5]

अत्रायमपरोऽपि प्रश्नः समुदेति यदनया रीत्या कथंकारं ज्ञादीनां धातूनां सकर्मकत्वं भविष्यति, ज्ञाधातोर्ज्ञानमात्रमर्थः नास्त्येव फलावच्छिन्नव्यापारवाचकत्वं ज्ञादीनां

धातूनाम्? अत्रोच्यते यद् भाक्त एव जानात्यादेः सकर्मकत्वव्यवहारो न तु मुख्यः। उक्तं हि रघुनाथशिरोमणिनाख्यातवादे— 'फलावच्छिन्नव्यापारबोधकत्वादेव च धातूनां सकर्मकत्वव्यवहारः, भाक्तस्तु जानात्यादेः' तर्हि किमिदं भाक्तं सकर्मकत्वमिति प्रश्ने दीयते इदमुत्तरं यत् विषयित्वरूपविभक्त्यर्थद्वारानामार्थान्वयित्वमेव गौणं सकर्मकत्वं भवति अस्मादेव कारणाद् यतिधातोः कृधातोश्च समानार्थकत्वेऽपि यतिधात्वर्थे यत्ने नामार्थस्य विषयित्वरूपविभक्त्यर्थद्वाराऽन्वयाभावादेव यतिधातोः भवत्यकर्मकत्वं कृधातोश्च सकर्मकत्वम्। कृधातुना समुपस्थापिते यत्ने नामार्थस्य विषयितया यतधातुना समुपस्थापिते यत्ने नामार्थस्य उद्देश्यतयाऽन्वयो भवति।

तृतीयपक्षेऽपि दर्शितयैव सरण्या केवलव्यापारवाचकत्वमकर्मकत्वं धातोर्भवति फलव्यापारोभयवाचकत्वञ्च सकर्मकत्वं भवति। परिष्कारस्तु दर्शितयैव रीत्या।

वैयाकरणास्तावदिदं नैयायिकमतं नैव सहन्ते प्रथमपक्षे तैः दूषणं दीयते त्यजिगम्योः पर्यायतापत्तिः द्वयोरपि क्रियावाचकत्वाविशेषात्। सत्यमेवेदं दूषणम्। यद्यपि गदाधरभट्टाचार्येण 'व्युत्पत्तिवादे' दोषोऽयं दूरीकृतः स्वीयया परिष्कारपद्धत्या किन्तु रघुनाथशिरोमणि—भवानन्द—सिद्धान्तवागीशप्रभृतयः पक्षेऽस्मिन् दोषमिमं स्वीकुर्वन्ति, अस्मादेव च कारणात् फलावच्छिन्नव्यापारस्य धात्वर्थतामङ्गीकुर्वन्ति। अत उचितमेवैतत् दोषप्रदर्शनम्। किन्तु द्वितीयतृतीयपक्षयोः कः दोषः? अत्र प्रतिपाद्यते यत् विद्यत एवाकर्मकाणामपि फलवाचकत्वं धातूनाम्। सत्तादिरूपोऽर्थः आत्मधारणात्मको भवति अत्रापि फलमन्तर्भूतमेव विद्यते। अत्र च 'द्व्यर्थः पचिः' इत्यादिकं भाष्यमपि प्रमाणं भवति।"

नागेशभट्टास्तु 'परलघुमञ्जूषायां' क्वचित् स्थले फलांशाभावादेव धातोर—कर्मकत्वं भवति इति प्रतिपादयन्ति। तत्र पक्षे तर्कोऽपि दीयते यत् केषुचित् स्थलेषु फलांशस्य सूक्ष्मदृष्ट्यापि प्रतीतिर्न भवति। अतः सर्वस्यापि धातोर्फलव्यापारोभय—वाचकत्वं भवतीति वैयाकरणोक्तं नैवादर्त्तुं शक्यत इति मामकीनोऽभिप्रायः।

कृञादौ सकर्मकत्वव्यवहारस्य भाक्तत्वनिराकरणाय वैयाकरणैरुच्यते यत् व्यवहारस्य भाक्तत्वे कर्मणि लकारो न स्यात्, न हि गङ्गापदस्य तीरे लक्षणायां सत्यामपि तेन स्नानादिकार्यं कर्तुं शक्यम्। किन्त्वेतन्नैवाद्रियामहे। लक्षणया शब्दप्रयोगस्तु भवत्येव कर्मणि लकारोऽपि शब्दप्रयोगात्मक एवेति नानया रीत्या निराकर्तुं शक्यते।

वैयाकरणैस्तु नानया रीत्या सर्वत्र सकर्मकत्वव्यवहारो व्युपपादयितुं शक्यः 'अध्यासिता भूमयः' इत्यादौ फलव्यधिकरणव्यापारवाचकत्वात् सकर्मकत्वव्यवहारोऽसम्भव इति शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमित्येव सिद्धान्तीक्रियते।

इयांस्तु विशेषः– नैयायिकैः फलावच्छिन्नव्यापारवाचकत्वं सकर्मकत्व स्वीक्रियतेऽन्यत्र तु भाक्तमेव सकर्मकत्वं स्वीक्रियते। वैयाकरणैस्तु सर्वत्रानुगतमेकविधमेव सकर्मकत्वं शब्दशास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वरूपं स्वीक्रियते।

सन्दर्भाः

१. भट्टोजिदीक्षितविरचितः कारिकामयः ग्रन्थः। उ. वैयाकरणमतोन्मज्जनटीका सं. ललितकुमार त्रिपाठी, भा.वि. संस्थान, वाराणसी, १९९८।

२. पृ.१०४ वैयाकरणभूषणसारः, प्रभादर्पणसहितः चौ.सं. सी.आ.वाराणसी, १९६९

३. उद्धृत पृ. १०५, तत्रैव

४. पृ. २८७ व्युत्पत्तिवादः (सुनन्दानामक हिन्दी व्याख्या सहितः) व्याख्याकारः सम्पादकश्च, डॉ. सच्चिदानन्द मिश्रः, भा.वि. प्रकाशन, वाराणसी, २००१।

५. पृ. ३३ कारकचक्रम् (भवानन्दसिद्धान्तवागीशस्य) प्रका. कलकत्ता, १९३७।

६. पृ. ३१९ व्युत्पत्तिवादः (पूर्वोक्त)

७. पृ. २५ आख्यातवादः सं. प्रबल कुमार सेन, सं. पु. भण्डार कलकत्ता १९७९।

८. पृ. ३५–३७ कारकचक्रम्

९. पृ. ८० वैयाकरणभूषणसारः

१०. द्र. व्युत्पत्तिवादः पृ.२८२–२९२, द्र. कारकचक्रम् पृ.३३, आख्यातवादः पृ.२४।

११. पृ. ८१ वैयाकरणभूषणसारः

१२. पृ. ९८ परमलघुमञ्जूषा सं. हिन्दीसंस्कृत व्याख्यासहित चौ.सं.सी.वाराणसी, १९७४।

१३. पृ. ७२–७३ वैयाकरणभूषणसारः

१४. पृ. ९८ परमलघुमञ्जूषा

तुलनात्मकदृष्ट्या भवानन्दोक्त-कर्मभेदविवेचनम्

अच्युतानन्ददाशः

यथा कर्मणः स्वरूपमधिकृत्य शास्त्रकाराणां मतभेद दृश्यते, तथैव तद्भेदानवलम्ब्य मतभेदोऽपि दृश्यत एव। त्रिमुनिकृतकर्मभेदविचारापेक्षया विस्तरशः कर्मभेदविवचनं तावद् इदं प्रथमतया भर्तृहरिणा कृतमस्ति[1]। ततः परम् अर्वाचीनग्रन्थकृत्सु भवानन्द-कौण्डभट्ट-जगदीश-गदाधर-नागेश-प्रभृतयः सोपपत्तिकं कर्मभेदं निरूपितवन्तः। तत्रभवान् भवानन्दः यद्यपि प्रथमतः भर्तृहर्युक्तदिशा प्राप्य-विकार्य-निर्वर्त्य-भेदेन कर्मणः त्रैविध्यम् अङ्गीकृतवान्, तथापि स्वातन्त्र्येण कर्मणः स्वरूपं निरूप्य ततः धात्वर्थानवलम्ब्य कर्मभेदान् निरूपितवान्। तदितरे सर्वेऽपि शास्त्रकाराः भर्तृहरिमतमेव प्रामुख्येन प्रमाणयन्तः कर्मभेदान् विवेचितवन्तः। प्रथमतस्तावद् भवान्दोक्तकर्मभेदान् निरूप्य ततस्संक्षेपतः भर्तृहरिमतम् उपन्यस्य अन्येषां मतजातं सङ्क्षेपेण उपपाद्यते।

(1) प्राप्यं, (2) विकार्यं, (3) निर्वर्त्यञ्चेति कर्मणः त्रीन् भेदान् श्रीभवानन्दः प्रतिपादयाञ्चकार स्वीये कारकचक्राख्ये ग्रन्थे। तत्रादौप्राप्यं निरूपयति ः-

"संयोगादिरूपक्रियाजन्यफलशालि प्राप्यम्[2]" इति। यथा 'ग्रामं गच्छति' इत्यादौ ग्रामादिः।

ततश्च विकार्यं निरूपयति ः- "क्रिया यद्धर्मनाशकं फलं जनयति तद्विकार्यम्[3]" इति। यथा 'काण्डं लुनाति' इति।

अयमाशयः। यस्य धर्मः यद्धर्मः इति विग्रहेण यद्वृत्तिधर्म इति लभ्यते। तथा च 'आरम्भकसंयोगविरोधि-विभागहेतु--दात्रादिव्यापार' एव लुनात्यर्थः। काण्डावयवानाम् आरम्भक--सयोगरूपो यो धर्मः तद् विरोधि यद् अवयवानां विभागरूपं फलं तज्जनको यः दात्रादिव्यापारः स एव लूञ्--धातोः अर्थः। तेन विभागरूपफलाश्रयत्वात् काण्डावयवानां कर्मत्वं स्यात्। तथा च 'काण्डं लुनाति' इत्यर्थे *'काण्डावयवान् लुनाति' इति प्रयोगस्य प्रामाण्यापत्तिः।

अत्रोच्यते - 'काण्डं लुनाति' इत्यत्र काण्डपदेन लक्षणया काण्डावयवा उच्यन्ते। एवं च अवयवविश्लेशजनिका या क्रिया, सा काण्डस्य आरम्भकसंयोगविरोधि = तन्नाशकं यद् विभागरूपं फलं जनयति, तदाश्रयत्वेन काण्डस्य विकार्यकर्मत्वमुपपन्नम्। अत एव 'काण्डं लुनाति' इति वाक्यात् 'काण्डावयववृत्तिः यः आरम्भकसंयोगविरोधी विभागः तदवच्छिन्नो यः दात्रादिव्यापारः, तदनुकूल-कृतिमान्' इति वाक्यार्थबोधः।

एवं च प्राप्यकर्मणः विकार्यकर्मणश्च 'क्रियानिमित्तत्त्वे सति, क्रियान्वयित्वं' कारकत्वम् उपपन्नम्। तथा च कारकत्वात्, क्रियाजन्यफलाश्रयत्वाच्च तयोः मुख्यं कर्मत्वम् एव।

इदमत्रावधेयम्। भवानन्दः यद्यपि प्रथमत कर्मणः स्वरूपदृष्ट्या प्राप्य-विकार्य--निर्वर्त्य--भेदेन त्रैविध्यं वदति, तथापि धात्वर्थानुरोधेन कर्मणः द्वैविध्यं तस्य अभीप्सितम् इति भाति। तथा हि शास्त्रकाराः धात्वर्थानुरोधेन न केवलं कर्मण अपि तु सर्वेषां कारकाणां स्वरूपं प्रतिपद्यन्ते इति

विश्रुतमेतम्। अत्रापि उक्तरीत्या धात्वर्थं पुरस्कृत्य कर्मभेदाः उच्यन्ते। तथा च धातुर्द्विवि (1)सकर्मकः, (2) अकर्मकश्चेति। सकर्मकाः पुनः धातवः द्विविधाः (1) क्रियाजन्यफलवाच (2)केवलक्रियावाचकाश्चेति। यत्र धातूनां क्रिया फलं चार्थौ। तत्र तादृशफलश्रयेत्वेन मु कर्मत्वमुपपन्नम्। यत्र क्रियामात्रमर्थः तत्र धात्वर्थविषयताश्रयत्वेन कर्मत्वमुच्यते। तच्च गौणं कर्मत इति। अत एव भवानन्दोक्तदिशा धात्वर्थानुरोधेन कर्म द्विविधम् – (1) मुख्यं कर्म (2) गौणं कर्म चे मुख्यं कर्म पुनः द्विविधम् – (1) प्राप्यं कर्म, (2) विकार्यं कर्म चेति। गौणं कर्म तु निर्वर्त्यमेवेति।

भवानन्दोक्तदिशा कर्मभेदविवेचनं निम्नोक्तचित्राकृत्यापि प्रतिपादयितुं शक्यते।



(उभयत्रापि धात्वर्थतावच्छेदकं किंचित् फलमस्ति तच्छालित्वेन कर्मत्वम् इत्यतः तस्य मुख्यं कर्मत्वम्)

(अत्र धात्वर्थतावच्छेदकं फलं किमपि नास्ति, धात्वर्थतानिरूपितविषयताश्रयत्वात् गौणं कर्मत्वम्।)

इदमत्राकूतम्। कारकत्वं नाम 'क्रियान्वयित्वे सति क्रियानिमित्तत्वम्' इति। एतादृ कारकत्वं क्रियातः पूर्वं सिद्धस्य प्राप्यकर्मणः विकार्यकर्मणश्च संभवति। निर्वर्त्यकर्मणस्तु कर व्यापारात्पूर्वम् असिद्धत्वेन तस्य क्रियानिमित्तत्वं न संभवतीति क्रियान्वयित्वमात्रं कारकत्वं त वक्तव्यम्।

'कटं करोति' इत्यत्र धातोः फलावाचकत्वात् कटादेः धात्वर्थतावच्छेदकफलानाश्रयत मुख्यकर्ममध्ये अन्तर्भावो न संभवतीति तस्य गौणं कर्मत्वमुच्यते। तदेतदुपपादयितुं ब्रूते "निर्वर्त्य निष्पाद्यम्[4]" इति। निर्वर्त्यते निष्पाद्यते पूर्वमविद्यमानस्य उपादानेन इति व्युत्पत्त्या निष्पाद्य निर्वर्त्यकर्म इत्युच्यते। तत्रोदाहरणम् – 'कटं करोति', 'घटं करोति' इति। 'कृञ्'–धातोः यत्नः इति नैयायिकाः मन्यन्ते। तस्य फलावच्छिन्नव्यापाराबोधकत्वात् कटादेः तादृशफलानाश्रयत्वाच्च कर्मत्वम्। कृतिविषयत्वाश्रयत्वात् कटादेः कर्मत्वम्। 'कटं करोति' इत्यादौ साध्यत्वेन कृतिविषयत कटादीनां कर्मत्वम् उपपन्नम्। अत एव वीरणादेः उपादानत्वेन विषयत्वेऽपि *'वीरणं करोति' इ

प्रयोगः। तथा हि वीरणाः सिद्धाः एव सन्तः विलक्षणसंयोगविशिष्टाः असिद्धपूर्वं कटमुत्पादयन्ति। अत एव साध्यत्वाख्यविषयता कटे वर्तते इति तदाश्रयत्वेन कटस्य कर्मत्वम्[5]।

तत्रेयं शङ्का उत्पद्यते यद् – यदि धात्वर्थविधेयत्वेन = धात्वर्थसाध्यत्वेन यद्विषयत्वमस्ति तदाश्रयत्वेन निर्वर्त्यकर्मत्वमुच्यते, तर्हि 'घटं पश्यति' इत्यादौ साध्यत्वेन विषयत्वाभावात् अतिरिक्तं तुरीयकर्मत्वं वक्तव्यम्। न त्वेतद् युक्तम्। कर्मणो हि त्रैविध्यमुक्तं न तु चातुर्विध्यम् इति। अपरं च यदि धात्वर्थविषयताश्रयत्वेन निर्वर्त्यकर्मत्वम् उच्येत तर्हि 'कटं करोति' इत्यत्रापि *'वीरणं करोति' इति प्रयोगापत्तिः। वीरणादीनाम् उपादानत्वेन धात्वर्थविषयत्वात्। अत एव केवलं धात्वर्थविषयताश्रयत्वेन निर्वर्त्यकर्मत्वे उक्तदिशा तत्र अव्याप्त्यतिव्याप्तिदोषप्रसक्तिः।

तत्रोच्यते – "मैवम्। उद्देश्योपादानीयविषयतातिरिक्तविषयत्वेन धात्वर्थविषयस्यैव निर्वर्त्यत्वात्[6]" इति।

अयमाशयः। उद्देश्यताख्या या विषयता, उपादानताख्या या च विषयता, ताभ्याम् अतिरिक्ता या धात्वर्थनिरूपितविषयता, तदाश्रयत्वेन निर्वर्त्यकर्मत्वं वक्तव्यम्। 'घटं पश्यति' इत्यत्र दर्शनविषयता उद्देश्यताख्यविषयता उपादानाख्यविषयताभिन्ना वर्तते इत्यतः तादृशविषयताश्रयत्वात् घटस्य निर्वर्त्यकर्मत्वमुपपन्नम्।

इदमत्राकूतम्। सविषयकधातूनां योगे विषयताश्रयत्वेन कर्मत्वमुच्यते। सविषयकधातवश्च ज्ञानेच्छाकृत्याद्यर्थकाः। 'घटं पश्यति' इत्यादौ दृश्–धातुः ज्ञानार्थकः। 'घटम् इच्छति' इत्यादौ इच्छार्थकः; 'घटं करोति' इत्यादौ च कृत्यर्थकः धातुः। कृत्यर्थकधातुयोगे साध्यत्वेन कश्चिद् विषयो भवति, उपादानत्वेन च कश्चिद् विषयो भवति। प्रकृते 'कटं घटं वा करोति' इत्यादौ कटः घटो वा साध्यत्वेन कृतिविषयो। वीरणाः मृत्तिकाश्च उपादानत्वेन विषयाः। *'वीरणं करोति' इति प्रयोगवारणाय उपादानीयविषयताऽन्यत्वं विषयतायाः विशेषणं दीयते।

तत्रायं प्रश्नः। उपादानाख्यविषयताभिन्ना या धात्वर्थविषयता, तादृशविषयताश्रयत्वं निर्वर्त्यकर्मत्वम् इति यद्युच्यते, तर्हि 'भोजनं करोति' इत्यर्थे *'तृप्तिं करोति' इति प्रयोगापत्तिः। तृप्तिरूपफले उपादानाख्यविषयताभिन्नायाः उद्देश्यत्वाख्यायाः धात्वर्थनिरूपितविषयतायाः सत्त्वात्। अतः उद्देश्यत्वाख्यविषयताभिन्ना उपादानीयविषयताभिन्ना च या धात्वर्थनिरूपितविषयता तदाश्रयत्वं निर्वर्त्यकर्मत्वमिति।

निर्वर्त्यकर्म अधिकृत्य प्राचां मतं त्वित्थं दृश्यते। प्राचीननैयायिकाः 'क्रियानिमित्तत्वम् एव कारकत्वम्' इति प्रतिपद्यन्ते। तथा सति 'कटं करोति' इत्यादौ कारकत्वं न स्यात्। कटस्य पूर्वमसिद्धत्वेन क्रियानिमित्तत्वाभावात्। अतः निर्वर्त्यकर्मणः कारकत्वोपपत्त्यर्थम् अवयवे लक्षणा वक्तव्या। एवं च 'कटं करोति' इत्यत्र कटपदेन कटावयवाः वीरणाः लक्ष्यन्ते इत्यतः कटावयवानां क्रियानिमित्तत्वात् कारकत्वमुपपन्नम्। अत्र धातोः किमपि फलं नास्तीत्यतः तदाश्रयत्वाभावात् गौणमेव कर्मत्वम्।

तत्रायं प्रश्नः। यदि लक्षणया कटावयवानां क्रियानिमित्तत्वं स्वीकृत्य 'कटं करोति' इति प्रयोगः उपपाद्यते, तर्हि तथैव क्रियानिमित्तत्वात् कदाचित् *'वीरणं करोति' इति मुख्यप्रयोगः स्यात्। इमामापत्तिं परिहर्तुं 'करोति'–पदसमभिव्याहृत–कर्मवाचकपदस्य अवयवे निरूढलक्षणा स्वीकार्या। अतः 'कटं करोति' इत्यत्र 'करोति'पदसमभिव्याहृतकर्मवाचक–'कट'पदस्य 'वीरण'रूप–अवयवे

निरूढलक्षणा एव। अत्र हि. कटम् उद्दिश्य वीरणविषयिणी कृतिर्दृश्यते। अतः कटोद्देश्यक–वीरणविषयक–कृतिसमये * 'वीरणं करोति' इति प्रयोगापादनं नैव सम्भवति।

अत्रेदं चिन्त्यम्। 'करोति'–पदसमभिव्याहृतकर्मवाचकपदस्य अवयवे निरूढलक्षणा इति नियमं यदि स्वीकुर्मः, तर्हि, 'सुखं करोति', "शुभं करोति कल्याणं मङ्गलं पुष्टिवर्धनम्", 'युवराजः कृतः', 'करिष्ये वचनं तव', 'पाणिम् उरसि कृत्वा', 'नाधर्मे मनः कुरुते', 'गण्डं करोति' इत्यादिषु स्थलेषु सुख–शुभ–कल्याण–मङ्लादीनां स्वावयवे निरूढलक्षणा वक्तव्या एव। न त्वेतेषाम् अवयवत्वेन किञ्चित् प्रसिद्धमस्ति। अत उक्तनियमाङ्गिकारे श्रीभवानन्दः प्राचां मते एतादृशम् अस्वारस्यं चिन्तयित्वा "आहुः[7]" इति पदेन तत्सूचयतीति मन्यामहे।

श्रीभवानन्दः धात्वर्थं पुरस्कृत्य कर्मस्वरूपं विवेचयतीति स्पष्टमेतावता प्रबन्धेन। 'ओदनं पचति' इत्यत्रापि 'पच्' धात्वर्थमवलम्ब्य ओदनस्य विकार्यकर्मणि अथवा प्राप्यकर्मणि अन्तर्भावं दर्शयितुं शक्यते इत्यभिप्रैति। तथा हि 'पच्' धातोः रूपादिपरावृत्तिफलक–अधःसन्तापनादिः अर्थः। रूपादिपरावृत्तिर्नाम तण्डुलानां पूर्वरूपनाशः रूपान्तरोत्पत्तिश्च। तच्च धात्वर्थफलम्। तज्जनकः स्थाल्यधःसन्तापनादिव्यापारः। तेन व्यापारेण तण्डुले तदवयेव वा पूर्वरूपनाशः रूपान्तरोत्पत्तिश्च जायते। अतः 'ओदनं पचति' इति वाक्ये ओदनपदस्य तण्डुले तदवयवे वा लक्षणा कार्या। तथा च धात्वर्थतावच्छेदकरूपादिपरावृत्ति–रूपफलशालित्वात् ओदनस्य कर्मत्वम्। धात्वर्थानुरोधेन तण्डुलस्य पूर्वरूपनाशः रूपान्तरोत्पत्तिश्च यदि विकारस्तर्हि, 'ओदनस्य' विकार्यकर्मणि अन्तर्भावः। अन्यथा पूर्वरूपनाशस्य रूपान्तरोत्पत्तेश्च धात्वर्थतानवच्छेदकत्वे पूर्वरूपनाशपूर्वक–रूपान्तरविशिष्टत्वेन ओदनस्य प्राप्यकर्मणि अन्तर्भावो बोध्य इति श्रीभवानन्दस्य आशयः।

अत्रेदं चिन्त्यम्। 'स्वरूपव्याक्रिया एव पराक्रिया' इति न्यायेन भवानन्दप्रतिपादितः त्रिविधकर्मभेदः सर्वथा परित्याज्य एव। निर्वत्य–विकार्य–प्राप्यशब्दानां व्युत्पन्नमर्थं परित्यज्य स्वमतिविभवेन नूतनमर्थमभिधत्ते भवानन्दः। निर्वर्त्यशब्दस्य निष्पाद्यम् अर्थः इति यद्यपि सः अभिप्रैति तथापि 'घटं पश्यति' इत्यत्र घटस्य निष्पादकत्वाभावेन तस्य निर्वर्त्यकर्मत्वं न केनापि अङ्गीकृतम्। दृशेः ज्ञानसामान्यार्थकत्वे विषयतां विषयितां वा फलमाश्रित्य, ज्ञानविशेषार्थकत्वे तु चक्षुरिन्द्रिय–विषयसंयोगं फलं स्वीकृत्य घटस्य प्राप्यकर्मत्वं सूपपादम्। वस्तुतस्तु पाणिनिमतेन सर्वाणि कर्माणि प्राप्यकर्माण्येव। कर्मसंज्ञाविधायके सूत्रे (पा॰ 1॰4॰49॰) आप्नोतेः सन्नन्तम् ईप्सितमिति शब्दं प्रयुङ्क्ते पाणिनिः। यद्यत्क्रिया प्रकर्षेण प्राप्नोति तत्तत्कर्मसंज्ञकं भवति। 'ओदनं पचति', 'काण्डं लुनाति', 'घटं पश्यति' इति सर्वेषूदाहरणेषु ओदन–काण्ड–घटादीनां सर्वेषां कर्मणां प्रकर्षेण क्रियासम्बन्धत्वात् पदार्थ–क्रियासम्बन्धे जायमाने कुत्रचित् नूतनस्य पदार्थस्य निष्पत्तिः कुत्रचित् विकारः, कुत्रचिन्नैतत्किमपि इति त्वन्यदेतत्। सर्वत्र कर्मणः स्वरूपस्य एकत्वमेव आश्रयणीयम्। विषयविभागस्तु केवलं मन्दबुद्धीनां कृते एव।

न्यायतन्त्रमनुसृत्यैव धात्वर्थतावच्छेदकं फलं किं भवति किं च न भवतीति प्रायशः ब्रूते भवानन्दः। धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति लक्षणस्य प्रायः सर्वत्र अव्याप्त्यतिव्याप्ति–दोषपरिहारेण समन्वयं कर्तुं शक्यते। 'करोति' पदसमभिव्याहारे कर्मवाचकपदेऽवयवे लक्षणा, पतिधातोः अधःसंयोगवाच्छिन्नव्यापारार्थकत्वं स्वीकृत्यापि तस्य अकर्मकत्वम् इत्यादि यद् भावानन्देन प्रतिपादित तन्न कथंचित् विचारपथमारोहतीति तत्र श्रद्धेयम् इति अस्मद्गुरुचरणाः शि॰द॰ जोशीमहोदयाः।

भर्तृहरिमतेन कर्मभेद–विवेचनम्

तत्रभवान् भर्तृहरिः कर्माणि कल्पद्वयेन विभजते। प्रथमकल्पानुसारं कर्माणि प्राप्य–विकार्य–निर्वर्त्यभेदेन त्रिधा, द्वितीयकल्पानुसारं तु उदासीन–द्वेष्य–अकथित– अन्यपूर्वकमिति भेदेन चतुर्धा भवन्ति। एवं च आहत्य कर्माणि सप्तविधान्येव। तत्रेदं ज्ञातव्यम्। भगवतः पाणिनेः "कर्तुरीप्सिततमं कर्म" (पा॰1॰4॰49) इति सूत्रोक्तं कर्म स्वरूपदृष्ट्या प्राप्य–विकार्य–निर्वर्त्य–भेदेन त्रिविधं भवति।

"तथायुक्तं चानीप्सितम्" (पा॰1॰4॰50) इति सूत्रोक्तं कर्म पुनः द्विविधम्, उदासीनं द्वेष्यं चेति। "अकथितं च" (पा॰1॰4॰51) इति सूत्रोक्तं कर्म तु "संज्ञान्तरैरनाख्यातम्" इत्यतः अकथितं कर्म इत्युच्यते। पा॰ 1॰4॰38, 43, 46, 47, 48 इत्यादिभिः सूत्रैः उक्तानि कर्माणि तु अन्य–(संज्ञा)–पूर्वकाणि इति भर्तृहरिः प्रतिपादयति। तथा च यत्र सूत्रकृन्मतानुसारं सम्प्रदानस्य कर्मसंज्ञा, करणस्य अधिकरणस्य वा कर्मसंज्ञा तत्र कर्मसंज्ञायाः करण–सम्प्रदान–अधिकरणसंज्ञा–पूर्वकत्वात् तादृशं कर्म अन्यपूर्वकमित्युच्यते। एवं च तद्रीत्या पाणिनीयसूत्रानुगुण्येन कर्माणि सप्तविधान्येव। तदेतत् सलक्षणं सोदाहरणं च इदानीं विविच्यतेऽधस्तात्।

अनुक्रमाङ्कः/ कर्मभेदश्च	अवान्तरभेदः	पाणिनीय सूत्रम्	तल्लक्षणम्	तदुदाहरणम्
1.निर्वर्त्यम्	–	1.4.49	सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्व प्रचक्षते।। अथवा यदसज्जायते सद्वा जन्मना यत्प्रकाश्यते तन्निर्वर्त्यम्।	कटं करोति। घटं करोति। पुत्रं प्रसूते।
2.विकार्यम्	–	1.4.49	प्रकृतेस्तु (परिणामित्वेन) विवक्षाया विकार्यम्	मृदं घटं करोति।
	विकार्यम्(1)	1.4.49	प्रकृत्युच्छेदसंभूत किञ्चिद्	काष्ठं भस्म करोति।
	विकार्यम्(2)	1.4.49	(प्रकृतौ) किञ्चिद् गुणान्तरोत्पत्त्या	सुवर्णं कुण्डलं करोति।
3.प्राप्यम्	-	1.4.49	क्रियागतविशेषाणा सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद् वा तत्प्राप्यमिति कथ्यते।।	आदित्यं पश्यति। नगरम् उपसर्पति।
5.द्वेष्यम्	-	1.4.50	यच्च कर्तुनीप्सितम्।	विषं भुङ्क्ते। चौरान् पश्यति।

6.अकथितम्	-	1.4.51	संज्ञान्तरैरनाख्यातम्।	गा दोग्धि पयः। अजा ग्रामं नयति।
7.अन्यपूर्वकम्	-	1.4.37	यद्यच्चाप्यन्य(संज्ञा)पूर्वकम् (सम्प्रदानस्य कर्मसंज्ञा)	क्रूरम् अभिक्रुध्यति।
		1.4.43	(करणस्य कर्मसंज्ञा)	अक्षान् दीव्यति।
		1.4.46	(आधारस्य कर्मसंज्ञा)	ग्रामम् अधिशेते।
		1.4.47	(आधारस्य कर्मसंज्ञा)	ग्राममभिनिविशते।
		1.4.48	(आधारस्य कर्मसंज्ञा)	ग्रामम् उपवसति सेना।

तथा च सर्वमेतद् भर्तृहरिकारिकासु द्रष्टव्यम्[8]।

आचार्यः कौण्डभट्टोऽपि[9] इमामेव भर्तृहरिप्रदर्शितां सरणीमवलम्ब्य कर्मणः सप्तविधतां प्रतिपादितवान्। इतश्च तत्र न कोऽपि विशेषः दृश्यते इति तद्विस्तरं न विवृण्मः।

अत्रेदमवधेयम्। भवानन्दोक्तदिशा 'घटं पश्यति' इति निर्वर्त्यं कर्म। भर्तृहरिमतेन अन्येषां च मतेन एतत् 'प्राप्यं' कर्म एव। 'सुवर्णं कुण्डलं करोति' इत्यादौ भर्तृहरिमतानुसारं विकार्यं कर्म। भवानन्दोक्तरीत्या तु तत् निर्वर्त्यकर्मण्येव अन्तर्भवति।

भवानन्दीयं "क्रिया यद्धर्मनाशकं फलं जनयति तद् विकार्यम्" इति विकार्यकर्मणः लक्षणं तावद् भर्तृहरेः "प्रकृत्युच्छेदसंभूतं (विकार्यम्)" इत्यनेन लक्षणेन कथंचित् साम्यं वहतीति वक्तुं शक्नुमः न तु तत् "गुणान्तरोत्पत्तौ" इत्यनेन समम्। अतः 'सुवर्णं कुण्डलं करोति' इति भवानन्दमतानुसारं निर्वर्त्ये कर्मण्येव अन्तर्भवतीति स्वीकार्यम्।

गदाधरोक्तदिशा कर्मभेदविवेचनम्

श्रीगदाधरभट्टाचार्यास्तु कर्मणः त्रैविध्यं प्रतिपादितवन्तः (1) प्राप्यं (2) प्रकृतिः, (3) विकृतिश्चेति[10]। (1) तत्र प्राप्यं कर्म तावत् 'क्रियाजन्यफलशालि'। यथा 'ग्रामं गच्छति' इत्यादौ ग्रामादिः। 'घटं पश्यति' इत्यादौ घटादिः[11]। (2) क्रियानिष्पाद्यं यत्तत् विकृतिकर्म इत्युच्यते। यथा 'ओदनं पचति', 'माल्यं करोति', 'कटं करोति' इत्यादौ ओदन–माल्य–कटादि विकृतिकर्म इत्युच्यते। तत्र 'ओदनं पचति' इत्यत्र ओदनस्य तण्डुलादिरूपं प्रकृतिभूतं द्रव्यं विनाश्य ओदनादेः निर्वर्तनम्। इत्यत्र माल्यस्य प्रकृतिभूतं कुसुमादिकम् अविनाश्यैव सन्दर्भादिरूपविशेषणनिष्पादनेन विशिष्टस्य माल्यादेः निर्वर्तनम्। 'कटं करोति' इत्यत्र कटस्य च काशादिरूपधर्मिणम् अविनाश्य तत्रैव कटादिरूपधर्मिनिष्पादनम्। क्रियायाः ईदृशं च कर्म प्रकृतेः असमभिव्याहारस्थले निर्वर्त्यम् इत्युच्यते।

तत्रेयं शङ्का। 'तण्डुलान् ओदनं पचति', 'कुसुमानि स्रजं करोति', 'काशान् कटं करोति' इत्यादौ प्रकृतिसमभिव्याहारस्थले निर्वर्त्यते निष्पाद्यते यदिति व्युत्पत्त्या, ओदनादेः यद्यपि निर्वर्त्यता अस्ति, तथापि तद्व्यावृत्तमेव पारिभाषिकनिर्वर्त्यत्वम्।

तदेतद् –

"सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।

यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।"

इति भर्तृहरिकारिकां प्रमाणयन्तः समर्थयन्ति गदाधरभट्टपादाः। एवं चोक्तेषु उदाहरणेषु ओदन–स्रक्–कटादेः प्रकृति–असमभिव्याहारस्थले विकारकर्मण्येव अन्तर्भावः।

प्रकृतिरूपं कर्म च क्रियया वस्त्वन्तरनिष्पत्तये पूर्वभावविशिष्टस्य यस्य असत्त्वरूपो विकारो निर्वाह्यते तत्. यथा 'तण्डुलान् ओदनं पचति', 'कुसुमानि स्रजं करोति', 'काशान् कटं करोति' इत्यादौ तण्डुल–कुसुम–काशाः प्रकृतिकर्माण्येव।

अयमभिप्रायः। क्रियया पूर्वभावविशिष्टस्य यस्य द्रव्यस्य असत्त्वं निर्वाह्यते तत्प्रकृतिकर्म इत्युच्यते। 'पूर्वभावविशिष्टम्' इत्यत्र पूर्वभावः = कार्यावस्थाविरहरूपः। 'तण्डुलान् ओदनं पचति' इत्यत्र पाकक्रियया पूर्वभावविशिष्टस्य तण्डुलस्य असत्त्वं सम्पाद्यते। यतः तण्डुलरूपद्रव्यनाशादेव ओदनरूपकार्यं निर्वर्त्यते। तथा च पूर्वभावविशिष्टस्य तण्डुलस्य असत्त्वसम्पदिका पाकक्रिया। काशकुसुमविषये तु पूर्वभावस्यैव विशेषणस्य क्रियया असत्त्वं सम्पाद्यते, विशेष्यभूत–काशकुसुमादिः तिष्ठत्येव। अथापि विशेषणस्य असत्त्वात् विशेषणविशिष्टस्य काशकुसुमादेः असत्त्वम्। अर्थात् सन्दर्भविरहरूपपूर्वभावविशिष्टकुसुमादेः कटावस्थाविरहरूपपूर्वभावविशिष्टस्य काशादेश्च प्रकृति–कर्मत्वमेव।

गदाधरोक्तदिशा प्रकृतिविकृतिकर्मणोः स्वरूपं सङ्क्षेपेण इत्थं भवति। 'कुसुमानि स्रजं करोति' इत्यादौ 'कुसुमं' प्रकृतिकर्म, 'स्रक्' च विकृतिकर्म एव। अस्मिन् प्रसङ्गे अधिकं तु व्युत्पत्तिवादे[12] एव द्रष्टव्यम्।

अयमत्र सङ्क्षेपः। प्रायः गदाधरभट्टः भर्तृहरिमतमेव अनुसरति, परं कर्मभेदसंज्ञाः भेदेनाभिधत्ते। भर्तृहरिमतेन 'काष्ठं भस्म करोति' इत्यत्र काष्ठं विकार्यकर्म, गदाधरमतेन तु प्रकृतिकर्म। 'मृदं घटं करोति' इत्यत्र भर्तृहरिमतेन 'घटः' निर्वर्त्यकर्म, गदाधरमतेन तु विकृतिकर्म। विकार्यनिर्वर्त्यकर्मणोः गदाधरमतेन एकैव विकृतिकर्म इति संज्ञा। भर्तृहरिमतेन प्रकृतिकर्मणः न स्वातन्त्र्येण किंचित्संज्ञा वर्तते इत्यलं पल्लवितेन।

---

[1] वाक्यपदीयम् (III). 7. 45-51

[2] कारकचक्रम्, श्रीभवानन्दसिद्धान्तवागीश, वाराणसी, 1942, पृ. 35

[3] तत्रैव पृ. 36.

[4] तत्रैव पृ. 36.

[5] cf. "कटार्थेषु वीरणेषु व्यूह्यमानेष्विति भाष्यम्। 'कट करोति' इति निर्वर्त्यस्य कटस्य कर्मत्वम् अनुपपन्नम्। कारकाधिकारीयत्वात् कर्मसंज्ञायाः। क्रियानिमित्तस्य च कारकत्वात्। असिद्धस्य च क्रियायाः पूर्वं निमित्तभावायोगात् तस्मात्तादर्थ्यनिमित्तादेव कटशब्दः कटार्थेषु वीरणेषु व्यूह्यमानेषु वर्तते। वीरणानां वा रच्यमानानाम् अस्ति कटक्रियापूर्वभावित्वेन निमित्तभाव इति" **न्यायवार्त्तिकतात्पर्यटीका** वाचस्पतिमिश्रविरचिता. Vol I&II C.S.S.O., VARANSI, 1925. p. 476

[6] कारकचक्रम्। तत्रैव पृ. 36.

[8] निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।
सञ्ज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।
सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।
प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्मशास्त्रे प्रदर्शितम्।।
यदसज्जायते सद्वा जन्मना यत्प्रकाशते।
तन्निर्वर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम्।
प्रकृत्युच्छेदसम्भूतं किञ्चिद् काष्ठादिभस्मवत्।
किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवद्।।
क्रियागतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद् वा तत्प्राप्यम् इति कथ्यते।।
(वा॰प॰ III. 7॰ 45– 51)

[9] द्र. **वैयाकरणभूषणसारः**. p. 159-165.

[10] **व्युत्पत्तिवादः**, वाराणसी, 1976. पृ. 141.

[11] 'घटं पश्यति' इत्यत्र दृश्–धातोः केवलज्ञानार्थकत्वेऽपि तज्जन्यफलस्य विषयतायाः आश्रयः 'घट' इति 'क्रियाजन्यफलशालित्वरूपं प्राप्यकर्मत्वं' घटस्य अक्षतमेव'। **व्युत्पत्तिवादः**।

[12] **व्युत्पत्तिवादः**, वाराणसी, 1976. पृ. 141–144,

द्र. **विभक्त्यर्थनिर्णयः**.पृ. 126 – 130. 153.

वाक्यार्थमीमांसा

दशरथचौधरी

ननु किमिदं वाक्यं यदर्थमीमांसा सम्प्रति विवेचनीया वरीवर्ति। प्रश्नेऽत्र सर्वेषां शास्त्राणामैकमत्यमिदं यद् 'पदसमूहो वाक्यम्' इति। किन्तु वाक्यस्यैव लक्षणे क्रियमाणे "गौरश्वः पुरुषो हस्ती शकुनिर्मृगः" इति पदकदम्बकस्यापि वाक्यत्वं स्यात्। न चेष्टमिदं वाक्यलक्षणमत्रेति विभाव्य व्याहृतं विचक्षणैर्यत् "वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चयः" इति। न केवलं पदोच्चय एव वाक्यमपितु यत्र परस्परमन्वयस्य योग्यतादयोऽपि यदि स्युस्तदेव तत्र वाक्यत्वं शक्यते वक्तुं नान्यथेति।

भट्टनारायणेनापि एतदेव तथ्यमेवं व्याहृतम्—

अत्राकांक्षा च योग्यत्वं सन्निधिश्चेतितत् त्रयम्।
वाक्यार्थावगमे सर्वैः कारणत्वेन कल्प्यते।।

मानमेयोदयः१००/९२

शब्दैः सन्निहितत्वेन बोधितत्वं हि पदार्थानां सन्निधिरुच्यते। अतः सन्निहित—त्वाभावात् शब्दबोधितत्वाभावाच्च द्वेधा सन्निध्यभावो भवति। तत्र भिन्नकालोच्चारितयोः "गामानय" इति पदयोः सन्निहितत्वाभावात् अनन्वयः। 'गां बधान" इत्यत्र बन्धनापेक्षस्य दृश्यमानस्यापि अश्वस्य शब्दबोधितत्वाभावादेवानन्वयः। अतः शब्दप्रतिपन्नानामेवान्वय इति नियमः सिद्ध्यति। आकाङ्क्षा प्रतिपत्तुर्जिज्ञासारूपा। यद्यपीयमिच्छारूपत्वेनात्मनिष्ठैवेति शक्यते वक्तुं तथापि अस्याः पदोच्चयधर्मत्वमिति बोध्यम्। स्वनिष्ठविषयितानि—रूपितविषयतावत्वसम्बन्धेन इच्छायाः पदोच्चये वर्तनात्। पदार्थानां परस्परसम्बन्धे बाधाभावो योग्यता। सा चेयं योग्यता यद्यप्यर्थवर्तिनी वर्तते तथापि स्वनिष्ठवाच्यता—निरूपित— वाचकतासम्बन्धेन पदोच्चये उपचर्यते। अतः सिद्धमिदं यत् आकांक्षा योग्यता सन्निधियुक्तः पदोच्चय एव वाक्यम्।

उपर्युक्त विवेचनेन सिद्धमिदं यत् वाक्यं पदसमूहात्मकं भवति। अस्यां स्थितौ आवश्यकमिदं यत् वाक्यघटकानां प्रत्येकं पदानामर्थाः स्युर्विदिताः पूर्वं, तत एव वाक्यर्थबोधो नान्यथेति। कस्माच्चिदपि शब्दात् कस्याप्यर्थस्य बोधस्तावन्न भवति यावत् तदर्थस्योपस्थितिः तस्मात् शब्दान् न जायते। एवं तस्मात् शब्दात् तदर्थस्योपस्थितिरपि तावन्न जायते यावत् तदर्थनिरूपिता शक्तिः तस्मिन् पदे गृहीता न भवेत्। एवञ्च पूर्वं शक्तिग्रहस्ततः पदार्थोपस्थितिः, ततः शाब्दबोध इत्यस्ति शक्तिग्रहपदार्थोपस्थितिशाब्द–बोधानां पौर्वापर्यक्रमः। तत्र यत्प्रकारकः यद् विशेष्यकः शक्तिग्रहस्तादृशी एवोपस्थितिस्तथा शाब्दबोधोऽपि जायते तादृश एव। अत एव घटत्वप्रकारकघटविशेष्यकार्थनिरूपित–शक्तिं गृहीतवतो जनस्य ''अयं घटः' इति वाक्यात् घटत्वप्रकारकघटविशेष्यक एव शाब्दबोधो भवति। न भवति तत्र मनागपिव्यतिक्रमः। उपस्थितेः शक्तिज्ञानप्रयोज्यत्वेन घटपदं श्रुतवतो जनस्य एक सम्बन्धिज्ञानमपरसम्बधिस्मारकं भवतीति नियमाद् आकाशोपस्थितौ जातायामपि न भवति तत्राकाशविषयकः शाब्दबोधः। आकाशस्य वृत्यजन्योपस्थितिसत्वात्।

पदेन पदार्थस्योपस्थितिर्भवति अतएव जायते शाब्दबोधोऽपि। तेन परिकल्प्यते पदपदार्थयोरस्ति कश्चन सम्बन्धो यद् वशात् उपस्थितो भवति पदार्थस्तत् पदनिष्ठशक्तिस्य। स च पदपदार्थयोः कीदृशः? तत् स्वरूपञ्च किमिति विषये वर्तते मतभेदो विवेचकानाम्। तत्र नैयायिकमतानुसारम् 'इदं पदमेतदर्थविषयकबोधजनकं भवतु'' इत्याकारिका अथवा 'अयमर्थः एतद् पदजन्यबोधविषयो भवतु' इत्याकारिका वा पदविशेषिकाः अर्थविशेषिका वा इच्छा एव पदपदार्थयोः सम्बन्धः। किन्तु इच्छा तु आत्मनिष्ठो धर्मो न तु पदंपदार्थयोः धर्म इति नायं धर्मः पदपदार्थयोः सम्बन्ध इति कृत्वा वैयाकरणाः तादात्म्यमेव पदपदार्थयोः सम्बन्ध इति प्रत्यपीपदन्। तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। भेदसहिष्णुरभेद एव तादात्म्यम्। अत एव अग्निशब्दोच्चारणे न मुखदाहापत्तिः, न वा गुड उत्युक्ते मुखे माधुर्यापत्तिरपि। एतत् सम्बन्धानुसारमेव पदं श्रुतवतो भवति समुपस्थितिरर्थस्य।

यत्र शब्दार्थयोः सम्बन्धोऽयं कार्यकारी न भवति, तत्र शब्दार्थयोर्लक्षणा नामकं सम्बन्धान्तरं परिकल्प्यते। गंगायां घोषः इत्यादौ लक्षणाप्रभा वा विदितचर एव स्थित। लक्षणास्वरूपेऽपि विदुषां मतभेदः। नैयायिकास्तु शक्यसम्बन्धमेव लक्षणां प्राहुः। गंगायां घोषः इत्यत्र शक्यप्रवाहसमीपस्तीरो बुध्यते लक्षणयेति। तीरे घोष इत्यर्थः सम्पद्यते तत्र।

वैयाकरणाश्च तात्स्थ्यात् तादधर्म्यात्' तत् साहचर्यात्, तत् सामीप्याच्च अतस्मिन् तदधर्मारोप एव लक्षणेति वदन्ति। अत एव गंगात्वाभाववति तीरे गंगात्वारोपं विधाय क्रियते तत्र शाब्दबोधः। मीमांसकाश्च—

मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे।
अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।।

इत्युक्त्यनुसारं प्रतीतिर्ज्ञानमेव लक्षणेति वदन्ति। अभिधालक्षणाभ्यामतिरिक्ता व्यङ्ग्यार्थबोधिका व्यञ्जनावृत्तिरपि स्वीकृतास्ति। अनया रीत्या शब्दशक्तिं स्वीकृत्य तत्तदर्थबोधः क्रियते शास्त्रलोकयोः । स च शब्दार्थः कः? इति प्रश्नेऽपि मतभेदो दृश्यते शास्त्रेषु वैयाकरणाश्च जातिव्यक्तिलिंगसंख्याकारकाणि पदार्था इति वदन्तः पञ्चकं प्रातिपदिकार्थं स्वीकुर्वन्ति। नैयायिकाश्च "व्यक्त्याकृतिजातयः पदार्थाः" इति सूत्रानुसारं व्यक्तिं जातिम् आकृतिञ्च पदार्थान् वदन्ति। मीमांसकाश्चजातिरेव पदार्थः इति स्वीकुर्वन्ति। आलंकारीकाश्च संकेतो गृहयते जातौ गुणद्रव्यक्रियासु चेति वदन्तो जातिशब्दाः गुणशब्दाः क्रियाशब्दाः यदृच्छाशब्दाश्चेति चतुष्टयी शब्दानां प्रवृत्तिरिति वदन्ति।

महता वैयाकरणेन भर्तहरिणा वाक्यपदीये कृतो गरीयान् विचारः शब्दार्थविषये। अस्मिन् लघुकलेवरके निबन्धे तत्सर्वस्योपरिविचारो नास्ति संभव इति भर्तृहरिकृतः शब्दार्थसम्बन्धविचारोऽत्र संक्षेपतः प्रस्तूयते। वाक्यपदीयस्य द्वितीयकाण्डे चतुर्विंशतिपञ्च—वंशतिषड्विंशतिश्लोकेषु पदार्थस्य द्वैविध्यम् अपोद्धारपदार्थः स्थितलक्षणपदार्थश्च, अन्वाख्येयशब्दः प्रतिपादकशब्दश्च, एषां कार्यकारणभावसम्बन्धः योग्यभावश्च सम्बन्धस्तत्र प्रतिपादितः। तत्र अपोद्धारपदार्थः शब्दस्य योगार्थः पाचकपाठकादयः। स्थितलक्षणपदार्थः रूढ्यर्थः मणिनुपूरादयः। तत्रापोद्धारपदार्थेन सह पदस्य कार्यकारणुभाव—सम्बन्धः। स्थितलक्षणपदार्थेन प्रतिपादकशब्दस्य योग्यतालक्षणः सम्बन्धः। एषां सम्यग् ज्ञानेन धर्मपुरस्सरं बोधो भवतीति तत्र प्रतिपादितम्।

एतावता विवेचने पदपदार्थसम्बन्धांश्च संक्षेपतः प्रस्तुत्य सम्प्रति वाक्यार्थोपरि क्रियते विचारः। तत्र वाक्यमनेकपदघटितं भवतीति पूर्वमेवोक्तम्। यथा चैत्रो ग्रामं गच्छति इति एकं वाक्यम्। अपरमनेकपदघटितः समासोऽपि भवति। यथा राज्ञः पुरुष' इति विग्रहे निष्पन्नो 'राजपुरुषः' इत्येकं पदम्। इदमेकमपि पदं पदद्वयघटितमस्ति। तत्र भवतीयं जिज्ञासा यत् वाक्ये पदशक्त्यतिरिक्ता काचित् शक्तिस्तत्र वर्तते न वा? पदार्थातिरिक्तोऽन्योप्यर्थः

कश्चन तत्र भासते न वा? अस्यां स्थितौ तत्र तावन्नैयायिका वदन्ति यत् वाक्ये नास्ति पदशक्त्यतिरिक्ता काचिदपि शक्तिः। अर्थनिरूपिता शक्तिः पदे एव। पदमेव शक्तम्। वाक्यघटकानि निखिलपदानि सन्ति सार्थकानि। एवञ्च पदशक्त्यैव निर्वाहे वाक्ये समासे वा न स्वीकरणीया काचित् शक्तिः। तदुक्तं – वाक्ये शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नास्ति। न चैवं 'राजपुरुषः' इति समासे प्रतीतिपथमवतीर्णस्य सम्बन्धस्य बोधः कथं स्यात् विना समुदायशक्तिमिति चेत् – पदार्थद्वयसंसर्गस्य आकांक्षाभास्यत्वेन तत्राकांक्षाभास्य स्वत्वसम्बन्धेन राजवान् पुरुषः इत्येव तत्र बोधः। तथा च स्वत्व–सम्बन्धावच्छिन्न–राजत्वावच्छिन्न–प्रकारतानिरूपित–पुरुषत्वावच्छिन्न–विशेष्यताक एव शाब्दबोधः। न च येषां मते संसर्गस्य प्रकारत्वं तदनुसारं कथं निर्वाहः पदशक्तिं विनैति वाच्यम्? तत्र राजपदस्य राजसम्बन्धिनि लक्षणया तेन पुरुषस्याभेदान्वये राजसम्बन्ध्य–भिन्नः पुरुषः इत्येव तत्र बोधः।

न च समासघटकपदानां सार्थकत्वे 'राजपुरुषः' इत्यत्र राजपदार्थस्य बाही–केन गोसम्बद्धस्येति पदार्थेन सहान्वयो दुर्वार इति वाच्यम्। सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो नेति सिद्धान्तस्य स्वीकारेणादोषात्। एतेन सिद्ध्यति यत् संसर्ग एव वाक्यार्थः । तस्य च भानमाकांक्षाभास्यम्।

वाक्यार्थविषये इयमेव प्रणाली स्वीकृता अभिहितान्वयवादिना कुमारील–भट्टेनापि। किन्तु एतन्नये पदार्थद्वयस्य संसर्गबोधनार्थं तात्पर्यानामिका वृत्तिः स्वीकृताऽस्ति इयं वृत्तिः वाक्यनिष्ठा/तदुक्तं विश्वनाथेन दर्पणे–

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्यार्थं तदर्थन्तु वाक्यं तद्बोधकं परे।।

एतन्नये च वाक्यार्थस्तात्पर्यार्थः। तदुपस्थापिका च तात्पर्या वृत्तिः। अयमेव वादः अभिहितान्वयवाद नाम्ना ख्यातः। अयमेवार्थो भट्टनारायणेन मानमेयोदये एव व्यलेखि–

वाक्यार्थं हि गुरुः कार्यमखण्डं शङ्करोऽब्रवीत्।
संसर्गापरपर्यायं विशिष्टं ब्रूमहे वयम्।। मानमेयोदय १९२/२४

गुरुः प्रभाकरोऽन्विताभिधानं मन्यमानो वाक्यार्थं कार्यरूपं मन्यते। आचार्यः शङ्करः अखण्डार्थ एव वाक्यार्थ इति मनुते। वयं भाट्टास्तु संसर्ग एव वाक्यार्थ इति ब्रूमहे।

अयमत्राभिप्रायः प्रभाकरः प्रत्येकं पदस्य शक्तिं कार्यान्विते पदार्थे एव स्वीकरोति। कार्यताबोधस्तु लिङ्गादिसमभिव्यवहार एव। 'गामानय' इत्युक्ते सति इदमेव प्रतीयते यत् अत्रत्यं गोपदं तस्यैव गोः वाचकं यत् आनयनान्वितमानीयमानं वा वर्तते। एवमानयपदमपि तस्या एव आनयनक्रियाया वाचकं या सम्पाद्यते।। ''अश्वमानय'' इत्यादावावापोद्वापाभ्यां यः खलु प्रत्येकं पदार्थबोधः सम्पद्यते सोऽपि अन्वयं परित्यज्य नैव भवति। अतोऽन्वयांशं परित्यक्तुं नैव शक्यते। न चैवं पदेभ्यः शुद्धपदार्थबोधो नैव स्यात् इति वाच्यम्? पदेन पूर्वं शुद्धार्थस्य स्मरणं भवति। ततः स्मारितोऽर्थः इतरान्वितो भूत्वा पदैरभिधीयते। अतः पदाभिधेय एव अन्वितरूपो वाक्यार्थो न तु पदगम्यः। वाक्यार्थो लक्षणवेद्यो न भवतीति भावः। यदि वक्यार्थो लक्ष्यो भवेत् तदा प्रमाणान्तरोपस्थापितार्थस्यापि वाक्यार्थेऽन्वयः स्यात्। किन्तु न भवति एवं कदाचित्।

किन्तु गुरुमतानुसारं कार्यान्विते शक्तिस्वीकारे कार्याताबोधकलिङ्गादावभावस्थले 'नीलो घटः' सदृशे वाक्ये बोधो नैव स्यात्। तस्मान्नेदं मतं समीचीनम्।

आचार्यशङ्करः अखण्डार्थ एव वाक्यार्थः इति स्वीकुरुते। ''विज्ञानमानन्दं ब्रह्म'' इत्यत्र त्रयाणमपि पदानामेकस्मिन् अखण्डब्रह्मणि एव तात्पर्यमिति तदभिमतम्। किन्तु एतदपि न युक्तं, यतो हि ''आनन्दं ब्रह्मणो विद्वान्'' ''स एको ब्रह्मण आनन्द'' इत्यादि श्रुतिभिः भिन्नविभक्तिघटिताभिर्भेदस्यैव प्रतिपादनं क्रियते न तु एकस्याखण्डार्थस्य। सुषुप्तौ विज्ञानाभावो विज्ञानस्य नित्यतां निराकुरुते। अत्र च श्रुतिः प्रमाणम् 'अवेदयन्नेवाहमियन्तं कालमस्वापरम्' एवञ्चाखण्डवाक्यार्थोऽपि नोपपादयितुं शक्यते।

महीयते व्याकरणदर्शनप्रभा

श्रीकरुणासिन्धुदास:

विगते अब्दशतके संस्कृतव्याकरणदर्शनं भूरिश: समृद्धिमगादित्यत्र नास्ति संशयलेश:। इयं सा शताब्दी यत्र पाश्चात्यदर्शनसंसर्गात् संस्कृतवाङ्गमयनिहिता तत्त्वमुक्तावली विभातितरां लोकेषु। स्पर्धमाने पाश्चात्त्यवाग्दर्शने भातरवाग्दर्शनं स्वे महिम्नि राजते वर्धते च विजयेन। आङ्ग्ल–शर्मण्यादिभाषानिबद्धानि निबन्धानां शतानि ग्रन्थाश्च प्रमाणयन्ति तद्वैभवम्, स्थापयन्ति च भर्तृहरिवचनम् –

प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनै:।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता ।। इति।।

Encyclopaedia of Indian Philosophies इति महाग्रन्थस्य Harold G. Coward तथा K.Kunjunni Raja इति आचार्यवर्यसम्पादिते पञ्चमे खण्डे (खी.१९९१) तत्रभवतां George Cardona महोदयानां कृतौ Recent Researches in Pāṇinian Studies इति ग्रन्थे (खी. १९९९) Saroja Bhate तथा Johannes Bronkhorst इति सम्पादकद्वयेन उपस्थापितस्य Bhartṛhari Philosopher and Grammarian इति ग्रन्थस्य (खी. १९९४) अन्ते Yves Ramseier कृत– Bibliography of Bhartṛhari इति पञ्जीसंकलने च सर्वेषामेषामभिसन्दर्भाणां समुल्लेख उपलभ्यते। विशिष्यन्ते चात्र निबन्धकारा गौरीनाथशास्त्री, विष्णुपदभट्टाचार्य:, Harold G. Coward, शिवरामदत्तात्रेय जोशी, विमलकृष्णमतिलाल:, वशिष्ठनारायणझा, माधव– देशपाण्डे:, रामाज्ञा पाण्डेय:, Jan E. M. Houben, अशोक आक्लुजकर: तन्द्रा पट्टनायक इत्यादय:। ग्रन्थपाठपर्यायलोचने च यत् नितरां सौष्ठवमासादितम् तत्र रघुनाथशर्मकृतो वाक्यपदीयपाठभेदनिर्णय इति भागद्वयात्मको ग्रन्थो (खी. १९८०, खी. १९९१) मानम्। अपि च सन्ति मूलग्रन्थानां नूतनानि संस्करणानि।

यथाहि वाक्यपदीय–द्वितीयकाण्डम् आङ्गलानुवादेन (खी.१९७७) टिप्पण्या च सह के.ए. सुब्रह्मण्य आयारमहोदयेन सम्पादितमुपलभ्यते। समग्रं वाक्यपदीयं च जयदेवभाईशुक्लमहाभागेन गुर्जरभाषानुवादटिप्पणसहितम् (खी.१९८४) प्रकाशमयांत्। वैयाकरणभूषणस्य समासशक्तिनिर्णयं सम्प्रति (खी.१९९५) वनमाली विश्वालमहाभागो विस्तरशः पर्यालोच्य अनूदितवान्। भूषणसारस्य स्फोटनिर्णयः जोशीमहोदयेन, नामार्थनिर्णयो माधवदेशपाण्डेमहोदयेन लकारार्थनिर्णयश्च जयश्रीगुणेमहोयया आङ्गलभाषयानूद्य सविमर्शमालोचिताः। प्राचीनाश्च टीकादयः प्रकाशं लभन्ते स्म।

तथाहि भूषणसारस्य ब्रह्मदत्तद्विवेदिकृते संस्करणे (खी. १९८५) दर्पणटीका स्थापिता। वाक्यपदीयद्वितीयकाण्डस्य सुब्रह्मण्यआयारकृते संस्करणे (खी. १९८३) पुण्यराजकृता टीका अपरा च वृत्तिः सन्निवेशमलभताम्।

तदिदं सर्वं वैयाकरणसिद्धान्तमूलस्य दाढ़र्याय प्रकल्पते। अल्पेष्वपि मूलग्रन्थेषु सारतस्तन्त्वभूयस्त्वं विलसति। लभते च प्रतिष्ठां व्याकरणदर्शनम्।

इह खलु भारते यथा व्याकरणं तथा न्यायमीमांसादिशास्त्राण्यपि शब्दप्रमाण–पद–वी–समालम्बनमुखेन स्व–स्वं–वाग्दर्शनं प्रस्तुवन्ति। वरीवर्ति च सर्वत्र खण्डनमण्डन–शैलीति किमप्येकमाश्रित्य सर्वेषां सिद्धान्ताः सविमर्शम् अवबोद्धुं शक्यन्ते। तदेवं संस्कृतव्याकरणदर्शनं प्राचीनकालादारभ्य भारतीयवाग्दर्शनप्रतिमास्वरूपं बिभर्ति। महाभाष्ये खलु तत्कालीनवाक्तत्त्वम् निःशेषम् पदमलभत। वाक्यपदीयं च वागर्थतत्त्वरत्नाकर इत्यलं विस्तरेण। कथमन्यथा द्वितीयकाण्डस्यादौ वाक्यस्य कृते अष्ठौ लक्षणानि तत्र प्रसरेयुः। ''वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायदर्शिनामि''ति साधूक्तं नाम। ततः फणिभाषितभाष्याब्धेर्यः शब्दकौस्तुभ उद्धृतस्तदनुयायिनी वैयाकरणमतोन्मज्जनीति कारिकावलीं व्याख्याया कौण्डभट्टेन वैयाकरणभूषणं सारश्चेति द्वयम् उपनिबद्धम्। न्यायवेदान्त मीमांसामतोद्धारमार्गेण। नागेशकृतिषु वैयाकरणसिद्धान्तमञ्जूषा–लघुमञ्जूषा–परमलघुमञ्जूषा–ग्रन्थेषु मतान्तरनिरासेन व्याकरणपक्षस्थापनायां नव्यन्यायपरिगृहीता वाक्परिभाषाशैली चकास्ति इति तु अन्यदेतत्। जगदीशभट्टाचार्यकृता शब्दशक्तिप्रकाशिका, गदाधरकृतौ शक्तिवाद–व्युत्पत्तिवादौ यदा न्यायपक्षं बिभ्रति, भवानन्दकृतं कारकचक्रं जयकृष्णकृता शब्दार्थसारमञ्जरी चेति द्वयं तु खण्डशो न्यायालम्बि सदपि अन्ततो व्याकरणपक्षमध्यास्ते।

परं तारानाथतर्कवाचस्पतिकृता शब्दार्थरत्नावली तावत् पाणिनीयदर्शनमेवा–धिकरोति स्म।

सत्सु एतादृशेषु आकरसदृशवागृदर्शनग्रन्थेषु टीकाटिप्पणीव्याख्यानसमारोहो न कथं पदं कुर्वीत? तथाहि खृष्ठीयविंशशताब्द्यां नोपलभ्यते यद्यपि भूरिशः मूलरचना, टीकादिकं तु अविरलमस्ति। तत्र पूर्ववत् संस्कृतमयी टीका यथा रचितास्ति, हिन्दीवांला–प्रभृतिभाषानिबद्धं विवरणम् अपि वर्तते। तथाहि–

क. महाभाष्यपस्पशाव्याख्यानाय समजनि

१. सुरेन्द्रनाथदाशगुप्तकृता आङ्गलानुवादसहिता विवृतिः,

२. दण्डिस्वामिदामोदराश्रमरचितं वङ्गभाषामयं व्याख्यानम्,

३. दाशगुप्तोनामकसंघमित्रया कृतं वङ्गभाषया विवरणमेकम् इत्यादि।

ख. वाक्यपदीयमधिकृत्य कृता व्याख्याग्रन्थास्त्वेवम् –

१. समग्रं वाक्यपदीयं व्याख्यातुं रघुनाथशर्मणा रचिता अम्बाकर्त्री व्याख्या (प्रथमकाण्डे खी. १९७६, द्वितीय खी. १९८०, तृतीये वृत्तिसमुद्देशभागे खी. १९७७, भागान्तरे च खी. १९९७), प्रथम काण्डे

२. सूर्यनारायणशुक्लकृते भावप्रदीपः संस्कृतमयः रामगोविन्दशुक्लकृता हिन्दीव्याख्या च (खी. १९८४)

३. शिवशङ्करेण अवस्थीत्युपनामकेन कृतं हिन्दीविवरणम्,

४. विष्णुपदभट्टाचार्यविरचिता वङ्गभाषामयी विवृतिरनुवादश्च।

ग. वैयाकरणभूषणस्य कृते मनुदेवभट्टाचार्यकृता रूपालीति टिप्पणी। भूषणसारे –

१. दर्पणटीकामतिरिच्य ब्रह्मदत्तद्विवेदिकृता हिन्दीभाषमयी व्याख्या (खी. १९९५),

२. प्रभाकरमिश्रकृता संस्कृतेन प्रभाकरी टीका, हिन्दीव्याख्या च प्राभाकरी (खी. १९८२)

३. आद्याप्रसादमिश्रकृता हिन्दीव्याख्या सावित्री च (खी. १९८८)।

घ. लघुमञ्जूषाग्रन्थस्य कृते संस्कृतमय्या दुर्बलाचार्यकृत–कुञ्जिकया सह रामप्रसादत्रिपाठिकृता हिन्दीव्याख्या सरला इति (खी.१९९०)।

परमलघुमञ्जूषार्थ तु

१. जयशंकरलालत्रिपाठिकृता भावप्रकाशिकेति संस्कृतटीका, बाल–बोधिनीति हिन्दीव्याख्या च

२. वंशीधरमिश्रकृता संस्कृतमयी वंशीव्याख्या, हिन्दीभाषामयं विवरणश्च (खी. १९५७)

ङ जयकृष्णरचितसारमञ्जरीप्रकटनाय कालीपदतर्काचार्यप्रणीता संस्कृत–मयी सारदीपिका व्याख्या (खी. १९२१)

न केवलमिदं व्याख्यावाङ्मयं मूलभावप्रकाशनम् अपि तु आगन्तुकभावानां संगत्या पक्षान्तरनिरासेन च सुतरां तत्पोषकम्। तत्र अम्बाकर्त्री खलु प्रकाशमात्रमेव कृतेयं कृतिरुत्तमा.. स्थेयादाचन्द्रतारकम् इति यशोऽलभत। भर्तृहरिहेलाराजपुण्यराजवचांसि अनया सविमर्शम् विशदीकृतानि। तद् यथा, आख्यातशब्दः, वाक्यमिति प्रसङ्गे एवमत्र निर्णीतम्।

'आख्यातशब्दो वाक्यमिति वादिनाम् आख्यातशब्द एव वाक्यमिति नाभिप्रायः.. सुप्तिङन्तचये वाक्यत्वव्यवहारस्य सर्वजनीनस्यापलापप्रसङ्गात्। किन्तु क्वचित् आख्यातशब्दोऽपि वाक्यम्, यत्र कारकशब्दप्रयोगं विना केवलाख्यातशब्दप्रयोगेऽपि वाक्यार्थवगतिः। यथा पिधेहीति। (पृ.२) इति।

अभिहितान्वयवादमधिकृत्य अत्रैवमुक्तम्–

'पदमेव शक्तं, न तु वाक्यम्। वाक्यार्थभूतः पदार्थानां संसर्गस्तु आकाङ्क्षाभास्यः। आकाङ्क्षा च तत्तच्छाब्दबोधं प्रति नियतः, पदानां समभिव्याहारविशेषः। अभिहितयोः शक्त्योपस्थापितयोः पदार्थयोरन्वय आकाङ्क्षाभास्य इति ये वदन्ति तेऽभिहितान्वयवादिनः। .... एवं चाभिहितान्वयवादो नैयायिकानाम्। तत्र च संसर्गस्याकाङ्क्षाभास्यत्वं व्युत्पत्तिवादादौ, प्रपञ्चितम्।' इति (पृ.३)

अन्विताभिधाने पुनः कार्यान्विते इतरपदार्थान्विते वा स्वार्थे पदानां शक्तिरित्य–न्वयरूपः संसर्गोऽपि शक्तिभास्य एव। तत्र अन्वयत्वेनान्वयसामान्यं शक्तिभास्यम्, तादात्म्या–दिरूपः सम्बन्धविशेषस्तु वाक्यलक्षणया। विशेषेण चावधेयमिह अम्बाकर्त्रीवचनम्–

'ये तु वदन्ति न भाट्टा अन्विताभिधानवादिन इति तेषां मते 'संसृष्टे क्रियायां चान्विताभिधानम्', 'यस्माद् भावनाक्रिययोः पर्यायता प्रायशो लभ्यते' इति हरिवाक्ययोः का गतिः, भावना लिङर्थत्वेन वाक्यार्थ इति भट्टाभिप्रायात्। इत्यादि।

वाक्यप्रसंगे 'आख्यातं साव्ययकारकविशेषणं वाक्यम्' (महाभाष्ये २/२/१ सूत्रीय वार्तिकम् ९) इति 'एकतिङ् वाक्यम्' (तत्रैव वार्तिकम् १०) इति च वार्तिककारीयं

शास्त्रमात्रोपयोगि पारिभाषिकं लक्षणद्वयं, तथा 'अर्थैकत्वादेकं वाक्यम्–(जै. २/१/४६) इत्यादि लौकिकलक्षणमुल्लिख्य सर्वमेतत् पदसङ्क्षानपक्षे अन्तर्भवतीति दर्शितम्। अपि चोक्तम्– 'यत् पुनर्भवता भर्तृहरिणा स्वोपज्ञवृत्तावुक्तम्– 'उदाहरणमात्रमेतत्, अन्यान्यपि वाक्यलक्षणानि दर्शयिष्यति इति, तद् वार्तिककारीयवाक्यलक्षणादेरष्वष्टसु सम्भवन्तम–प्यन्तर्भावं स्फुटतयाऽनपेक्ष्येति मन्तव्यम्' इति। अम्बाकर्त्रीमते वाक्यपदीये 'अत्रोद्दिष्टा वाक्यविकल्पा अव्याकृतस्वरूपा न सुबोधाः। अत्र च ग्रन्थेऽग्रे तेषां व्याकृतिर्व्यवहिता विप्रकृष्टा नैकत्र सुलभा च।' (पृ.६) अतएव 'वाक्यविकल्पानां स्वरूपमात्रप्रतिपादनपरः संक्षिप्तः स्याद्वादरत्नाकरग्रन्थः संगृह्यते' रघुनाथशर्मणा।

वाक्यार्थमाश्रित्य यत् पक्षषट्कं प्रदर्शितं वाक्यपदीये प्रतिभा, संसर्गः, संसर्ग–वशान्निराकाङ्क्षो विशेषावस्थितः पदार्थः, संसृष्ट एवार्थः, क्रिया, प्रयोजनं चेति, तत्र विधिनियोगभावनास्तु न गृहीताः। भट्टमते तु वाक्यार्थः भावना। सा च क्रिया इति तत्रैवान्तर्भावसम्भवः। 'विधिनियोगौ तु लिङ्लोट्कृत्यान्तेषु एव वाक्येषु अर्थौ इति सर्ववाक्यविषयत्वादिह... अनादृतौ।' एवं समाधाय अम्बाकर्त्रीकारेण ततः विज्ञानवादिबौद्ध–मतेन व्याकरणमतस्य तुलनं कृतम्। तथाहि 'शाक्याभिमतस्य वाक्यार्थस्य प्रतिभायां तदभिमतस्य वाक्यस्य च बुद्ध्यनुसंहतावन्तर्भावेण न तदभिमतयोस्तयोरसंग्रहोऽत्र वेदितव्यः।' (पृ.१५) इति। 'अयन्तु विशेषः – प्रतिभाया गोचरो वाक्यार्थो बहिरस्ति वस्तुभूतः, विज्ञानाकारविशषस्तु वाक्यार्थो नास्ति बर्हिर्वस्तुभूत इति। अतएव प्रतिभासादरत्व–मुक्तम्' (पृत्र.१५)। वाक्यवाक्यार्थयोरध्यास–वाच्यवाचकभाव–कार्यकारणभाव–संकेतलक्षणाः सम्बन्धाः सम्प्रदायेषु सिद्धा इति उल्लिख्य तावद् अभिहितम्– 'वाक्यकाण्डे अध्यास– मेव वाक्यवाक्यार्थयोः सम्बन्धं दर्शयिष्यति। पदकाण्डे तु तृतीयं सर्वानिवा–भिधास्यति' (पृ. १७) इति।

तदेवं प्रतिविषयम् आभाति यद् अम्बाकर्त्रीसौष्ठवम् स्थालीपुलाकन्यायेन तत् परीक्ष्य निरूपितम् विष्णुपदभट्टाचार्येण। अतएव तदीयवाक्यपदीयब्रह्मकाण्डविवरण बहुत्र सा सबहुमानमुद्धृता राजते।

भूषणमधिकृत्य मनुदेवभट्टाचार्यकृता रूपालीति टिप्पणी विशेषवैशिष्ट्यभाक् प्रतीयते। तथाहि भूषणे व्याख्यातानां कारिकाणां किं नामधेयं कश्च कर्तेति प्रश्ने एषा टिप्पणी सयुक्तिन्यासं सिद्धान्तमुपस्थापयति वैयाकरणमतोन्मज्जनम् इति कारिकात्मकग्रन्थस्य नाम, तत्कर्ता च श्रीभट्टोजिदीक्षितः इति। श्रीवनमालिमिश्रकृतो यो ग्रन्थः समाननामा क्वचिदुल्लिख्यते, स तु 'बृहद्वैयाकरणभूषणसारस्य भूषणस्य वा व्याख्यानं मात्रमेव।

तेनेह 'मूलस्य कारिकामयग्रन्थस्य तट्टीकाटीकायाश्च भिन्नकर्तृत्वेऽपि समानं नाम इति। (पृ.३३१) समञ्जसं पश्यति रूपालीकृत्। तृतीया कर्मणि (पा.६/२/४८) इति सूत्रार्थनिर्णयावसरे अवधातोरर्थानुल्लिख्य तत्रभवतो वोपदेवस्य मतं तेनाङ्गीकृतम् व्याजहार खलु तत्रभवान् वोपदेव इति। अप्रथमाविभक्त्यर्थे बहुव्रीहेर्व्याख्यायां जगदीशभट्टाचार्यस्य मतमेवमुद्धृतम्–

'बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन द्योतकः।
निरूढ्या लक्षणया स्वांशज्ञापकशब्दवान्।।
अस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदाभेदसुबन्तेन साकाङ्क्षं नाम विग्रहः।। (पृ. २०३)

इति। नञर्थनिर्णयावसरे 'नोपेयात्' इत्यादिषु 'नञ्सहितेषु... निवर्तना–निवारणा–निषेधप्रतिषेधाः लिङर्थः' इति सुष्ठु निर्णीतम्। अनेकशब्दे न नञर्थो बहुत्र विचार्य मल्लिनाथदिशा (पृ.२२७–२३१) सिद्धान्तितः। सिद्धान्तस्त्वेवम्– 'अनेके इति बहुवचनम् असाध्वेवेति तत्रत्यप्रदीपोद्द्योतसारः' इति। उपपदविभक्तेः कारकविभक्तिर्बलीयसीति परिभाषार्थं निर्णीय अत्र उक्तम् परिभाषा एषा अन्तरङ्गन्यायमूला स्वतन्त्रा वेत्यन्यत् इति। तत्र 'द्वितीयादयः सर्वा अपि विभक्तयः कारकोपपदभेदेन द्विविधा। प्रथमा तु कारकविभक्तिरेव' इति। (पृ. १९८)। कारकविभक्तित्वं चेह क्रियाजनकार्थकविभक्तित्वमेवाङ्गीकृतम्।

को नाम भाव इति प्रश्ने बहवः पक्षाः सम्भवन्ति। भावः अभिप्रायः, पदार्थः, धात्वर्थः। भवः = विद्यमानः। भवने = उत्पत्तौ। इत्थम्भूतः = कञ्चित् प्रकारं प्राप्तः। भूष्णुः = एधमानः। भूतिः = समृद्धिः इति। नामालिङ्गानुशासने 'भावः सत्तास्वभावभिप्राय–चेष्टात्मजन्तुषु' इति, नानार्थरत्नमालायां च –

'भावः पदार्थसत्तायां क्रियाचेष्टात्मयोनिषु।
विद्वल्लीलास्वभावेषु भूत्यभिप्रायजन्तुषु।।'

इति। चात्र मानम् आकलितम्। (पृ. २५५–७) स्फोटविषये चैवमाह रूपालीकृत्–वाक्यश्चासौ स्फोटश्चेति वाक्यस्फोटः। स्फोटः वाचकः। वाक्यस्फोटः = वाक्यं वाचकम् इत्यर्थः।... स्फुटत्यर्थोस्माद् अनेन वेति स्फोटः वाचकः।.. ते चाष्टौ।' इति।

निपातानां द्योतकत्वविचारे श्रीविश्वेश्वरसूरीकृतेर्व्याकरणसिद्धान्तसुधानिधेर्मतं सबहुमानमत्र उद्धृतमस्ति। शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव इत्यादौ ऊस्रसदृशैः शरैरिति बोधो द्योतकत्वपक्षे एव सम्भवतीति असत् मन्यते तत्र। 'सादृश्यस्य एव आश्रयत्व–

सम्बन्धेन शरेषु प्रकारत्वात्। अन्यथा इवादिपदोपादाने श्रौती उपमा, सदृशादिपदप्रयोगे तु आर्थी इति काव्यमीमांसकसिद्धान्तविरोधात्। तत्र 'चादयो वाचकाः, प्रादयस्तु द्योतक इति मिश्रमतम् इतरेषाञ्च मतमुल्लिख्य शाकटायन–गार्ग्य–यास्कादिवचनं पर्यालोच्य उपसर्गाणां स्वसम्बन्धेनार्थबोधकत्वम् निपातानां तद्वैपरीत्यम् उदाहृतम् (पृ. २५१–२५३)। निपातार्थनिर्णये रूपालीकृतां प्रयासोऽयम् सश्रद्धमुल्लेखमर्हति।

वंशीधरमिश्रकृता वंशीव्याख्या न केवलं परमलघुमञ्जूषाबोधे नितरां सहायकं सम्पादयति, लघुमञ्जूषापरमलघुमञ्जूषयोर्मते पार्थक्यञ्च दर्शयति। तथाहि वृत्तिनिरूपणे 'पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरर्याया। तद्ग्राहकञ्च इतरेत–राध्यासमूलकं तादात्म्यं, तदेव सम्बन्धः' इति परमलघुमञ्जूषा। लघुमञ्जूषायान्तु तदेव सम्बन्धः इति नास्ति, परन्तु 'तच्च सङ्केत इत्युक्तम्। इह वंशीवचनं प्रतीयते– 'अत्रापि सम्बन्ध इत्यस्य स्थाने सङ्केत इत्येव पाठ्यम्।... अथवा मदुक्तार्थ एव कार्यः। मञ्जूषायां सुबर्थवादे क्वचित्तादात्म्यस्य सम्बन्धत्वं परमतवासनयोक्तम्। सम्बन्धत्वाभावेऽपि तादात्म्यस्य सम्बन्धग्राहकत्वं नानुपपन्नं वृद्धव्यवहारादिवद् इति दिक्।' इति

अपाणिनीयव्याकरणसम्प्रदायेषु वाग्दर्शनमधिकृत्य जयकृष्णविरचिता शब्दार्थसार–मञ्जरी परां ख्यातिमगात्। खृष्टीय १९२१ तमे अब्दे।

'श्रीकालीपदशर्मायं तर्काचार्योपनामकः।
व्याख्यां प्रतनुते सारमञ्जर्याः सारदीपिकाम्।।'

वाक्यार्थबोधपर्यालोचने एषा व्याख्या विशिष्यते नाम। तन्मते 'तात्पर्यन्तु वक्तुरिच्छा एव। तज्ज्ञानस्य कारणत्वे वक्ता यमर्थम् उद्दिश्य शब्दं प्रयुक्तवान् तदर्थस्यैव बोध इति नानियमः। तात्पर्यग्राहकप्रकरणादीनां तत्तदर्थप्रतिपत्तिहेतुत्वकल्पनन्तु अननुगमदोषमेव निरस्तम् इति। नैयायिकास्तु तात्पर्यज्ञानार्थम् अवश्यं प्रकरणादिज्ञानस्यापेक्षणेन प्रकरणादिज्ञानमेव प्रयोजकमाहुरिति संक्षेपः।' (पृ.२३–२४)।

कारकविचारे क्वचित् न्यायमतं क्वचिच्च व्याकरणमतं सारमञ्जर्यामालम्बित–मस्ति। तथाहि कर्मत्वं नाम परसमवेतक्रियाजन्यफलशालित्वमङ्गीकृतम्, करणत्वं तु साधकतमत्वमेव। कारकत्वं च क्रियानिमित्तत्वम्। तर्काचार्यस्त्वेवं व्याख्याति– 'करोति साक्षात् परम्पराया वा क्रियामनुकूलयति इति कारकम्। .... कारकपदमत्र न क्रियानिमित्तमात्रपरं किन्तु कारकपदप्रतिपाद्यपरम्।... तदुक्तं कौमारे क्रियानिमित्तं कारकं लोकतः सिद्धम् इति'। निमित्तमिह प्रयोजकं जनकं वा भवितुमर्हति। तद् यथा कार्याव्यवहितप्राक्क्षणे सत्त्वाभावात् कर्मणः क्रियाकारणत्वनिर्वाहो यद्यपि न स्यात् तथापि 'उद्देश्यत्वमात्रेण

प्रयोजकत्वरूपमिति निमित्तपदस्य प्रयोजकमात्रपरता'। 'करणस्य तु संयोगादिव्यापारं द्वारीकृत्य कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्तित्वात् मुख्यमेव जनकत्वलक्षणं निमित्तत्वम्। सम्प्रदानस्य अनुमत्यादिप्रकाशनद्वारा क्रियां प्रति निमित्तत्वं, तदपि जनकत्व–लक्षणमेव। .... अपादानस्यापि तथात्वं, वृक्षादेः स्वसत्त्वेनैव क्रियां प्रत्यनुकूलत्वात्, यदि वृक्षादयो न स्युस्तदा कुतो वा पर्णादिकं विभज्येत। एवमधिकरणमपि। देवदत्तः कटे आस्ते इत्यादौ देवदत्तादेः स्थितिं प्रति कारणीभवत् कारकसंज्ञां भजते।' इति।

तदेवं तर्काचार्यदृष्ट्या 'वैयाकरणोक्तं कारकलक्षणं सर्वत्र सोपपत्तिकम्' स्थितम्। क्रियानिमित्तस्य कारकत्वे अङ्गीकृते फलात्मकक्रियायां मुख्यतया निमित्तभूता व्यापाररूप–क्रियापि कारकेषु गण्येत इत्याशङ्कय तत्रभवता सारदीपिकाकृता एवं समाहितम्– 'तत्तत्क्रियाभिन्नत्वे सति क्रियानिमित्तत्वं कारकत्वमिति वाच्यम्' इति। कारकेषु सर्वत्र प्रयोजकश्च अवान्तरव्यापार अतएव तत्र निर्णीतः। तथाहि–

'कारकान्तरप्रवर्तनव्यापारः कर्तृतायां प्रयोजकः, क्रियाजनकाव्यवहित–व्यापारः करणत्वप्रयोजकः क्रियाफलेनोद्देश्यत्वव्यापारः कर्मत्वे, कर्तृकर्मव्यवहितक्रिया–धारणव्यापारश्च अधिकरणत्वे, प्रेरणानुमत्यादिव्यापारः सम्प्रदानत्वे, अवधिभावोऽपगमव्यापारः अपादानत्वे प्रयोजक इति। (पृ.४०)।

पीठे स्थित्वा गृहे स्थाल्यामोदनं पचति इति स्थले अधिकरणानां तु एवं सङ्गति–

स्थितिक्रियायाः परम्परया कर्तृद्वारा आश्रयत्वेन पीठस्य, गेहस्य तु विक्लित्त्य–नुकूलव्यापाररूपक्रियायाः कर्तृद्वारा आश्रयत्वेन, स्थाल्यास्तु फलीभूतविक्लित्तिरूपक्रियायाः कर्मद्वारा आश्रयत्वेन अधिकरणत्वम् अनुसन्धेयम्' इति (पृ.५४)। 'औपचारिकस्थलेऽपि औपश्लेषिकेणैव अर्थसिद्धिस्तर्काचार्याणां सम्मता।

एवं विन्दुषु सिन्धुदर्शनन्यायेन विगतशताब्द्यां व्याकरणदिशा वाग्दर्शनचर्चायाः समुन्नतिः परीक्षितुम् शक्यते। हिन्दीवांलादिभाषाबद्धेषु व्याख्याग्रन्थेषु च तदभ्युपगमः सुगमः। किमिह वैशिष्ट्यमभिनवं किमपि उपलब्धमिति पृच्छा चेत् ब्रूमः– उक्तानुक्त–दुरुक्तार्थव्यक्तकारि यथेदं व्याख्यानवाङ्मयं, तथा संसर्गाद् भिन्नैर्देशीयैर्देशान्तरीयैश्चा–गमदर्शनैर्विभामयञ्च। केवलम् अबुधानां प्रबोधाय नायमुद्यमः प्रकल्पते, परन्तु शास्त्रतात्पर्य–निरूपणद्वारा शिवेतरक्षतये शास्त्रार्थप्रवृद्धये च। ध्रुव एवैष मार्गो येन महीयते व्याकरणदर्शनप्रभा।

सन्दर्भा:

१ Coward, Harold G. and K. Kunjunni Raja, Encyclopaedia of Indian Philosophies, Vol. V, First Edition, Delhi, 1990.

२. Bhate, Saroja and Johannes Bronkhorst (ed.)- Bhartṛhari Philosopher and Grammarian, First Indian Edition, Reprint, Delhi, 1997.

३. शुक्ल, सूर्यनारायण एवं रामगोविन्द शुक्ल (ed.) – महावैयाकरण–श्रीभर्तृहरिविरचितं वाक्यपदीयम् (ब्रह्मकाण्डम्), १९८४

४. अवस्थी, शिवशङ्कर – भगवद्भर्तृहरिविरचितं वाक्यपदीयम्.. (ब्रह्मकाण्डम्) वाराणसी, १९९०

५. खान्दुरी, सत्यनारयणशास्त्री (ed.) वाक्यपदीयम् (ब्रह्मकाण्डम्), १९८७

६. शर्मा, रघुनाथ – वाक्यपदीयम् (प्रथमकाण्डम्), १९७६

७. शर्मा, रघुनाथ – वाक्यपदीयम् (द्वितीयकाण्डम्), १९८०

८. शर्मा, रघुनाथ – वाक्यपदीयम् (वृत्तिसमुद्देश:), १९७७

९. शर्मा, रघुनाथ – वाक्यपदीयम् – १९६७

१०. भट्टाचार्य, मनुदेव (ed.) श्रीमत्कौण्डभट्टविरचितं बृहद्वैयाकरणभूषणम् वाराणसी, १९८५

११. द्विवेदी, ब्रह्मदत्त, (ed.) वैयाकरणभूषणसार: वाराणसी, १९८५

१२. मिश्रा, प्रभाकर (ed.) वैयाकरणभूषणसार:, वाराणसी, १९८२

१३. मिश्र, आद्याप्रसाद, वैयाकरणभूषणसार:, वाराणसी, १९८८.

१४. त्रिपाठी, रामप्रसाद, वैयाकरणसिद्धान्तमञ्जूषा, वाराणमी, १९९०

१५. त्रिपाठी, जयशङ्करलाल, (ed.) परमलघुमञ्जूषा, वाराणमी, १९८५

१६. मिश्र, वंशीधर, (ed.) वैयाकरणसिद्धान्तलघुमञ्जूषा, गया, १९५७

१७. तर्काचार्य, कालीपद (ed.) सारमञ्जरी, कलिकाता, १९२१

व्याकरणप्रस्थाने बुद्धिसत्ख्यातिवादः

धर्मेन्द्रकुमारसिंहदेव:

ख्यातिवादस्य परिचय:

'ख्या'–प्रकथने–धातोस्क्तिन्–प्रत्ययेन 'ख्याति'–शब्दो निष्पद्यते। कोश–ग्रन्थानुसारेण ख्यातिपदं प्रसिद्धिं, कीर्तिम्.... अर्थं ग्राहयति। परन्तु दर्शनशास्त्रेषु ख्यातिपदमिदं प्रमाप्रमारूपज्ञानमात्रस्य वाचकम्। अपि चेदं 'ख्याति'–पदं ख्यातिवादपरम्परासु सविकल्पक–प्रत्यक्षार्थेषु विचारणीयतामर्हति। अर्थात् विवेकपर्याय: ख्यातिशब्दो व्यवहारज्ञानपरिधिषु सविकल्पकं प्रत्यक्षरूपमर्थम् अर्पयति। सविकल्पकेनैव प्रत्यक्षेण प्रामाण्यं निश्चीयते। यतो निर्विकल्पकं ज्ञानं प्रमा वा अप्रमा वेति वक्तुं नैव शक्यते। यथा हि–

न प्रमा नापि भ्रम: स्यान्निर्विकल्पकम्। (न्यासु. १३५)

अत: दर्शनशास्त्रेषु सविकल्पकं प्रत्यक्षम् आधारीकृत्य प्रचलितमतसमुदाय: ख्यातिवाद इत्युच्यते। यत्रेन्द्रियजन्यभ्रमात्मकज्ञानस्य व्याख्या प्रामुख्यं भजति। यतो भ्रमनिरासेन हि प्रमात्वस्य निर्णय: सम्भवति।

अत्रेदं वक्तव्यमुचितम् – सर्वेष्वपि ख्यातिवादेषु प्रायो भ्रमस्यैव निरूपणं क्रियते येन सम्यक्ख्याति: स्पष्टीभवति। परं नेदं मन्तव्यम् ख्यातिशब्दो भ्रमपर्याय इति। ख्यातिर्नाम सविकल्पक–प्रत्यक्षज्ञानमात्र–बोधिकेत्यर्थ:।

ख्यातिवादस्य प्रकारा:

दर्शनप्रस्थाने पञ्चख्यातिवादा अतिप्रसिद्धं गता:–

आत्मख्यातिरसत्ख्यातिरख्याति: ख्यातिरन्यथा
तथाऽनिर्वचनख्यातिरित्येतत् ख्यातिपञ्चकम्।।
योगाचारा माध्यमिकास्तथा मीमांसका अपि।
नैयायिका मायिनश्च पञ्च ख्याती: क्रमाज्जगु:।। (न्यायकोशे)

अर्थात् योगाचारा आत्मख्यातिं, माध्यमिका असत्ख्यातिं, मीमांसका अख्यातिं नैयायिकाश्च अन्यथाख्यातिं मन्यन्ते। ननु अत्यल्पमिदमुच्यते दर्शनेषु प्रसिद्धेषु ख्यातिवादप्रकारभेदेषु निम्नोक्तेषु पञ्चैव ख्यातिवादा इति वचनं चिन्त्यम्। तथाहि–

दर्शनानि		ख्यातिवादाः
चार्वाकदर्शने		अख्यातिवादः/निर्विषयख्यातिवादः/निरालम्बनख्यातिवादः
जैनदर्शने		विपरीतख्यातिवादः
बौद्धदर्शने	शून्यवादे	असत्ख्यातिवादः
	विज्ञानवादे	आत्मख्यातिवादः/स्वख्यातिवादः/विज्ञानकारख्यातिवादः
	सर्वास्तिवादे	अन्यथाख्यातिवादः
न्यायदर्शने		अन्यथाख्यातिवादः
वैशेषिकदर्शने		विपरीतख्यातिवादः
सांख्यदर्शने		सदसत्ख्यातिवादः/प्रसिद्धार्थख्यातिवादः
योगदर्शने		सदसत्ख्यातिवादः/प्रसिद्धार्थख्यातिवादः
मीमांसादर्शने	(कुमारिले)	अन्यथाख्यातिवादः/अलौकिकख्यातिवादः/विवेकख्यातिवादः
	(प्राभाकरे)	यथार्थख्यातिवादः/अख्यातिवादः
	(मण्डने)	अभेदख्यातिवादः
वेदान्तदर्शने	अद्वैते	अनिर्वचनीयख्यातिवादः
	द्वैते	अन्यथाख्यातिवादः
	विशिष्टाद्वैते	सत्ख्यातिवादः
	शुद्धाद्वैते	अन्यख्यातिवादः
दाक्षिणात्य–शैवदर्शने		अन्यथाख्यातिवादः
प्रत्यभिज्ञा–शैवदर्शने		संकुचितख्यातिवादः (अख्याति+सत्ख्यातिः)
व्याकरण–दर्शने		बुद्धिसत्ख्यातिवादः

प्रस्तुतेऽस्मिन् शोधपत्रे वैयाकरणानां बुद्धिसत्ख्यातिवाद एव विषयत्वेन गृहीतः।

बुद्धिसत्ख्यातिवादस्य परिचयः

कस्तावद् बुद्धिसत्ख्यातिवादः? अत्रोच्यते – बुद्धौ सद् बुद्धिसत्। बुद्धिसत् ख्यातिः बुद्धिसत्ख्यातिः, तां वदति यः सिद्धान्तः सोऽयं बुद्धिसत्ख्यातिवादः। अत्रा

सारः। बाह्यपदार्थोऽपि बुद्धौ सत्तावान् तिष्ठति। स एव बाह्यपदार्थो बुद्धौ सत्तावान् सदेव प्रत्यक्षीभवति। अर्थात् सर्वं घटपटादिकं वस्तुजातं पूर्वं बुद्धिसदेव पश्चाद् बहिः प्रतीयत इत्यर्थः। शशशृङ्गम् आकाशकुसुमम् .... आदिरसदेव बुद्धिसद् भवति, येन तस्य शाब्दव्यवहारः सम्भवति। कार्यमपि उत्पत्तेः प्राक् बुद्धिसद् भवति। भ्रमोऽपि नाम बुद्धिसदेव विषयीभवतीति वैयाकरणानां स्थापना।

बुद्धिसत्ख्यातिवादस्य परम्परा प्रयोजनीयता च

यद्यप्ययं वैयाकरणानां सिद्धान्तस्तथापि उपनिषत्सु एतद्–विषयको विचार–श्चरितार्थतां भजति यत्र स्वप्नदृष्टस्य वर्णनं मित्थं दृश्यते–

न तत्र रथा न रथयोगा भवन्ति। अथ रथान् रथयोगान् पथः सृजते। न तत्रानन्दा मुदः प्रमुदो भवन्ति। अथानन्दान् मुदः प्रमुदः सृजते। न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति। अथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते। त हि कर्ता।

(बृहदारण्यक. ३.४.३.१०)

अर्थात् बहिरविद्यमाना रथानन्दादयः स्वप्नसृष्टिकर्तारो भवन्ति। अत्रेदं ज्ञातव्यम्। स्वप्नसृष्टिः सर्वथा बुद्धिसत् भवति। अर्थात् स्वप्नस्य दृश्यता–भोग्यता–स्वरूपो बुद्धावेव घटते।

पाणिनीये वैयाकरणदर्शने बुद्धिसत्तां विहाय नान्या गतिः। सन्धि–कार्येषु वर्णानां पूर्वापरव्यवस्था बुद्धिसत्ताम् आश्रित्यैव सम्भवति, क्षणध्वंसिनां वर्णानां पौर्वापर्यानुपपत्तेः। नाटकादिषु कंसं हन्ति, हतवान्, हनिष्यतीति प्रयोगेष्वपि बुद्धिसत्ता प्रतीयते। बुद्धिसत्त्रेव कंसादयः कारकत्वं लभन्ते। अन्यथा अतीतानां कंसादीनां कारकत्वमपि विप्रतिसिद्धं स्यात्। तेन हि नाटकादिविषयेषु बुद्धिसत्ख्यातिं स्वीकुर्वता भगवता पतञ्जलिनोक्तम्–

''उत्पत्तिप्रभृति आ विनाशाद् ऋद्धर्व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयन्ति।

महाभाष्यम्, पासू. ३.१.२६

महाभाष्यीयं तथ्यमिदं कारिकाबद्धेन भर्तृहरिराह—

शब्दोपहितरूपांश्च बुद्धेर्विषतां गतान्।
प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यन्ते।।

(वाक्यपदीयम् ३.७.५)

अपि चात्र कार्यकारणसम्बन्धो बुद्धिसन्नेव व्यवहारभाग् भवति। शब्दार्थानां पौर्वापर—सम्बन्धोऽपि बुद्धिसन्नेव सम्भवति। यथाह पतञ्जलिः—

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्वन्नीतिः।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्य्यम्।।

(महाभाष्यम्, पासू. १.४.१०९)

भर्तृहरिणापि शब्दार्थसम्बन्धविषयिणी बुद्धिसत्ख्यातिः प्रस्तूयते—

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते।।

(वाक्यपदीयम् १.८४)

सिद्धान्तमेनम् अग्रेसारयन् नव्यवैयाकरणो भट्टो नागेशो बुद्धिसत्ख्यातिं प्रस्तौति। शब्दार्थविवेचनं प्रक्रम्य भट्टनागेशः प्राह—

शक्योऽर्थोऽपि बुद्धिसत्तासमाविष्ट एव न तु बाह्यसत्ताविष्टः। बुद्धिसतो बाह्यसत्ता—तद्भाव—बोधनाय 'अस्ति नास्ति' इति प्रयोगः। किं च शशशृङ्गं नास्ति, अङ्कुरो जायते' इत्यतो.....बुद्धिसन्नङ्कुरो बाह्यरूपेण जायत इत्यर्थः।

(लघुमञ्जूषा, पृ.२०३)

शशशृङ्गमपि बुद्धिसत्तासमाविष्टं सद् बहिर्नास्तीति व्यवहारं प्रतिपद्यते। कार्यविषयेऽपि—

कार्यमुत्पत्तेः प्राङ्नाशोत्तरं चासदपि बुद्धिविषयतयातु सिद्धम् ।

(तत्रैव, पृ. २०४)

अग्रे च भट्टनागेशेन नैयायिकानाम् अन्यथाख्यातेः अद्वैतिनाम् अनिर्वचीनय—ख्यातेश्च समालोचना कृता विद्यते। परमत्र विस्तरभिया तन्नोल्लेख एव श्रेयः। एवमेव एतत् सर्वं बुद्धिसत्ख्यातिवादस्यैव महिमानं व्यनक्तीति।

बुद्धिसत्ख्यातिवादस्य विशेषार्थः

वस्तुतो बुद्धिसत्ख्यातिवादस्य विशेषतया निरूपणं महाभाष्ये पतञ्जलिना कृतं वर्तते। यथा सूत्रस्य शाटकं वय – इति भाष्यकृताम् उपस्थापना एतद्विशदयति–

> कश्चित् कञ्चित् तन्तुवायमाह– 'अस्य सूत्रस्य शाटकं वय' इति। स पश्यति, यदि शाटको न वातव्यः, अथ वातव्यो न शाटकः, शाटको वातव्यश्चेति विप्रतिषिद्धम्, भाविनी खल्वस्य संज्ञाभिप्रेता, स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद् भवतीति।
>
> (महाभाष्यम्, पासू.१.१.४४)

अत्रायं निष्कर्षः। कार्यकारणसम्बन्धः, कार्यकारणस्य एकत्रावस्थितिः, कार्यकारण–सम्बन्धस्य प्रतीतिर्वा बुद्धावेव भवति। बुद्धावेव तस्य सत्ता भवति। सैव तस्य ख्यातिरिति।

अपि च, रज्जौ सर्पस्य भ्रमो जायते। परन्तु यो नाम सर्प न जानाति न बुध्यते, तस्य तद्विषयको भ्रमोऽपि न जायत इति। यस्य बुद्धौ प्रागेव सर्पस्य सत्ता भवति तस्यैव रज्जौ सर्पः प्रतीयते। अर्थात् प्रागेव बुद्धौ भ्रमविषयकपदार्थस्य सत्ता अपेक्षिता। सिद्धान्तमेनं विना न भ्रमस्य न प्रमायाः न कस्यापि प्रतीतिः सम्भवतीति वैयाकरणानामुद्घोषः।

तथा च, यो नाम गां न जानाति, तस्य गौः इति नाम्ना प्रमा नैव जायते। 'गौरयम्' इति सत्तानुबिद्धं ज्ञानं नैव सम्भवति। सविकल्पकं ज्ञानं नैव उत्पद्यते। सविकल्पकेन ज्ञानेनैव व्यवहारो जायते। तावता सविकल्पज्ञानस्य भानं न स्यात् यावता बुद्धौ गोत्वस्य गोश्च विद्यमानता न स्यात्। सर्वादौ विशेषणस्य ज्ञानं भवति। विना विशेषणं सविकल्पज्ञानस्य नैव सम्भवः। यथा चोच्यते–

'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते'– इति सिद्धान्तः।

प्रथमतया यदा बालो गां पश्यति। तदा स तं न जानाति, हस्तम् उत्थाप्य पृच्छति। कश्चन उत्तरयति – 'गौरयम्'। तत्र बालो गोव्यक्तिं पश्यति, गोव्यक्तिं जानातीति प्रतीयते, तन्न। इयं भ्रान्तिः। स बालो गोव्यक्तिना सह गोत्वं जातिमपि अवगच्छति। अतः अन्यत्र अपरां गां पश्यन् बालस्तामपि 'गौरयम्' इति वदति। यदि गोत्वजातिम् अजानन् बालः अपरां गां कथं गौरिति वदेत्। अपि च प्रथमं गोव्यक्तिं यावत् ज्ञानं सीमितं स्यात्। परन्तु सा गोत्वजातिरपि बुद्धौ तिष्ठति।

यदि गाम् अजानन् बालः अपरं पशुं जानाति तदा तस्य पशुत्वावच्छेदकं ज्ञानं भवेत्, न गोत्वम्। गोत्वं प्रति 'गौरयम्' इति शब्दशो ज्ञानम् अपेक्ष्यते। यावता शब्दतो ज्ञानं न स्यात् तावता सविकल्पकं ज्ञानमपि न सम्भवेत्। तत्सविकल्पकं ज्ञानं शब्दानुबिद्धं भवति। अतः प्रागेव बुद्धिस्थाः शब्दार्था भवति। अन्यथा प्रत्यभिज्ञा न स्यात्।

उपसंहारः

विंशशतकस्य मूर्धन्यो वैयाकरणो बच्चूलालोऽवस्थी 'वादत्रयी'– ग्रन्थे प्रथमतया 'बुद्धिसत्ख्यातिवाद' इति नाम्ना व्याकरणदर्शनस्य सिद्धान्तमेनं साङ्गोपाङ्गं विवेचनं कृत्वा प्रतिष्ठापयति। यद्यपि 'बुद्धिसत्ख्यातिवाद' इति नाम्ना वैयाकरणशास्त्रेषु कुत्रापि नायाति तथापि सम्पूर्णं तथ्यमिदं विमर्श्य बुद्धिसत्ख्यातिवादस्य प्रतिष्ठा करणीया इति अवस्थिपादाः। इत्थं वैयाकरणानां बुद्धिसत्ख्यातिवादः ख्यातिवादपरम्परायां महिमानं भजतीति।

तदन्तविधिः

बालशास्त्री

ननु व्याकरणशास्त्रीयसंज्ञातिरिक्ताः सूत्रघटकाः शब्दाः स्वस्वरूपमात्रबोधका इत्यर्थकस्य 'स्वं रूपं शब्दस्याशब्दसंज्ञा' १.१.६८ इति सूत्रस्य विद्यमानत्वे 'सर्वादीनि सर्वनामानि' १.१.२७ इति सूत्रेण सर्वादिगणे अपठितानां परमसर्व–परमविश्वादि–शब्दानां सर्वनामसंज्ञाया अभावेन परमसर्वे, परमविश्वे इत्यादौ 'जशः शी' ७.१.१७ इति सूत्रेण कथं शीभावः, परमोच्चैः परमनीचैः इत्यादीनां स्वरादिगणे पाठाभावेन 'स्वरादिनिपातमव्ययम्' १.१.३७ इत्यव्ययत्वाभावाद् 'अव्ययादाप्सुपः' २.४.८२ इत्यनेन कथं सुपो लुक्, स्वाढ्यङ्करणम् इत्यत्र स्वाढ्योपपदे 'आढ्यसुभगस्थूलः' ३.२.५६ इत्यनेन कथं कृञः ख्युन्प्रत्ययः, अभयङ्कर इत्यत्र 'मेघर्तिभयेषु कृञः' ३.२.४३ इत्यनेन अभयशब्दे उपपदे कथं खच्प्रत्ययः, एवम् 'अतिभवती' इत्यस्य उगिदरूपप्रातिपदिकत्वाभावाद् 'उगितश्च' ४.१.६ इत्यनेन कथं ङीप्, परमस्वसा, परमदुहिता इत्यादौ 'न षट्स्वस्रादिभ्यः' ४.१.१० इत्यनेन ङीपो निषेधश्च कथमिति चेत्, श्रूयताम्–

स्वं रूपं शब्दस्येत्यस्य बाधकेन 'येन विधिस्तदन्तस्य' १.१.७१ इति संज्ञासूत्रेण तत्र तत्र सूत्रेषु तदन्तविधिना तदन्तानामपि तेषां शब्दानां बोधसम्भवेन तत्तत्कार्याणां तत्र संभवात्।

ननु कः खल्वस्य सूत्रस्यार्थः? यदि 'यस्य विधिः स तदन्तस्य संज्ञा, अर्थात् बोधकः' इत्यर्थस्तर्हि 'इको यणचि' ६.१.७७ इति सूत्रे अनेन इकः इत्यस्य तदन्त–बोधकत्वप्राप्तौ इगन्तसमुदायस्य 'सुधी' इत्यादेः सम्पूर्णस्य स्थाने यणापत्तिः स्यात्। 'अलोन्त्यस्य' १.१.५२ इत्यनेन इक एव स्थाने यणादेशसम्पादनेनेष्टसिद्धावपि अनेकालादेशविधायके 'एचोयवायावः' ६.१.७८ इत्यादौ अलोन्त्यपरिभाषाया अप्रवृत्त्या सर्वादेशप्रसक्तेर्दुर्वारत्वेन दोषसद्भावात्। यदि व्याकरणस्मृतेः साधुत्वबोधनपरत्वाद् 'अयाद्यादेशघटितश्च प्रयोगः साधुः' इत्येवं साधुत्वबोधनपर्यन्तं सूत्रस्य व्यापारात् साधुत्वविधिमाश्रित्य अयाद्यादेशतोपि तदन्तविधौ, 'एजन्तस्य अयाद्यन्ता आदेशाः स्युरित्यर्थेन दोषा निवार्यन्ते, तर्हि 'आद्गुणः' ६.१.८७ इत्यत्र तदादितदन्तविध्योरुभयोरप्युपस्थितौ

'अकारान्तादजादौ परत: पूर्वपरयो स्थाने गुण:' इत्यर्थेन उपेन्द्र:, शीतोदकम् इत्यादौ अवर्णान्तसमुदायस्य अजादिसमुदायस्येति उभयो: स्थाने गुणापत्तौ प्रयोगविरूपतापत्ति-र्दुष्परिहारा स्यात्। न च निर्दिश्यमानपरिभाषया निस्तार:। स्थानषष्ठ्यनिर्देशात्तस्या अत्र प्रवृत्ते: सम्भवाभवात्। अत एव अलोन्त्यपरिभाषाया अपि नात्रावसर:। 'एक: पूर्वपरयो:' ६.१.८४ इत्यधिकारसूत्रस्थपूर्वपरपदोत्तरविद्यमानषष्ठ्या तु 'आद्गुण:' ६.१.८७ 'वृद्धिरेचि' ६.१.८८ इत्यादौ अवर्णस्य अवर्णान्तस्य चेत्युभयोर्बोधसम्भवेन तस्या: साधारणीत्वान्नात्र तद्बलाज् 'जराया जरस्' ७.२.१०१ इत्यादिवन्निर्दिश्यमानपरिभाषया अभिलषितरूपसिद्धे: सम्भावनापि।

किं च 'अलोन्त्यस्य' १.२.५२ इति सूत्रेऽपि तदन्तविधिप्रवृत्तौ 'पथिमथ्यृभुक्षामात्' ७.१.८५ इति सूत्रेण कदाचित् 'पथिन्' इति समुदायस्य कदाचिच्च 'थिन्' इत्यस्य अलन्तसमुदायस्य वा आकारादेशप्रसंगे अस्य आकारादेशस्य अल्मात्रस्थानिकत्वाभावाद् अनल्विधाविति स्थानिवद्भावनिषेधाप्रवृत्तौ 'स्थानिवदादेश:' १.१.५६ इति स्थानिवद्भावापत्तौ हलन्तबुध्या 'हल्ङ्याभ्यो दीर्घात्' ६.१.६८ इत्यनेन 'पन्था:', 'द्यौ:', 'स:' इत्यादौ सुलोपापत्ते:।

नन्वेवम् सर्वत्र 'अलोन्त्यस्य' १.२.५२ इति सूत्रेणैव सर्वेषामपि एकालनेकाला-देशानां सम्पूर्णस्थानिकत्वे सिद्धे 'अनेकाल्शित् सर्वस्य' १.१.५५ इति सूत्रारम्भसामर्थ्यान्ना-त्रालोन्त्यसूत्रे तदन्तविधिरिति कल्पनेन नेमे पूर्वोक्ता दोषा: सम्भवन्तीति चेन्न। अनेकाल् आदेश: सम्पूर्णस्यैव स्थाने भवेदिति ज्ञापनार्थं तस्यावश्यकत्वात्। अन्यथा 'प्रशस्यस्य श्र:' ५.३.६० इति सूत्रेण विधीयमान: श्रादेश: कदाचित् शस्यस्थाने, कदाचित् स्यस्थानेऽपि स्यात्। एवमेव 'ज्य च' ५.३.६१ इति सूत्रेण 'वृद्धस्य च' ५.३.६२ इति सूत्रेणापि विधीयमानयोरादेशयोरनभीष्टस्थानिकत्वापत्या विभिन्नरूपतापत्तिर्दुष्परिहारा स्यात्।

'नच निजौ चत्वार एकाच:' इति 'एकाचो द्वे प्रथमस्य' ६.१.१ इति सूत्रस्थभाष्याभिप्रायानुसारं 'लिटि धातोरनभ्यासस्य' ६.१.८ इति सूत्रेण क्रमात् प्रत्येकमेकाचं प्राप्तस्य द्वित्वस्य वृक्षप्रचलनन्यायेन 'निज्' इति समुदाये एव प्रवृत्तिर्न तु 'नि'+'इज्'+'इ' इत्यादौ यथा, तथा श्र,ज्याद्यादेशानामपि वृक्षप्रचलनन्यायेन अलोन्त्यपरिभाषयापि समुदायस्यैवादेशसम्भवे 'अनेकाल्शित्सर्वस्य'तिसूत्रीयवैयर्थ्यस्य स्थिरतया तत्सामर्थ्यान्ना-लोन्त्सूत्र तदन्तविधिरिति सिद्धमिति न पूर्वोक्ता: सन्ति दोषा इति वाच्यम्।

अलोन्त्यस्येत्यत्र तदन्तविध्यप्रवृत्तावपि 'इको यणचि' ७.१.७७ इत्यादौ तदन्तविधिप्रसक्तौ अन्तरङ्गबहिरङ्गभाववैपरीत्यापत्त्या स्योनः, स्योना इत्यादिरूपाणामसिध्यापत्तिः। तथा हि तन्तुसन्तानार्थकात् षिवुधातोः औणादिके न प्रत्यये 'सिव् न' इत्यवस्थायां 'लोपो व्योर्वलि' ६.१.६६ इति प्राप्तं वलोपमपवादत्वात्, अङ्गसम्बन्धिनीमिग्लक्षणां लघ्वीमुपधामार्धधातुकं चाश्रित्य प्रवर्तमानं 'पुगन्तलघूपधस्य च' ७.३.८६ इति इकारस्य गुणं च वकारान्ताङ्गानुनासिकप्रत्ययमात्रसापेक्षतया अन्तरङ्गत्वात् प्रबाध्य 'च्छ्वोः शूडनुनासिके च' ६.४.१९ इत्यनेन ऊठि, सिऊन, इत्यवस्थायां प्रकृतिप्रत्ययोभयसापेक्षलघूपधगुणापेक्षया सिऊ, इति प्रकृतिमात्रसापेक्षस्य यणोन्तरङ्गत्वाद् यणि, 'सार्वधातुकार्धधातुकयोः' ७.३.८४ इति गुणे, सुबन्तकार्ये च सति सिध्यति 'स्योनः' इति रूपम्। 'इको यणचि' ६.१.७७ इत्यत्र तदादि–तदन्तविध्योः, प्रवृत्तौ तु इकारान्तस्य 'सि' इत्यस्य अजादौ ऊन इति परे यण् भवतीत्यर्थेन ऊन इत्यस्य यणि निमित्तत्वं, गुणे तु न मात्रप्रत्ययस्य निमित्तत्वमिति यणपेक्षया गुणस्यान्तरङ्गत्वात् सि इति इकारस्य लघूपधगुणे स्योन इति इष्टरूपसिद्धिरिति भावः। तथा च महाभाष्यम् स्योनः, स्योना। (अत्र) 'अन्तरङ्गलक्षणस्य यणादेशस्य बहिरङ्गलक्षणो गुणो बाधकः प्रसज्येत। ऊनशब्दमाश्रित्य यणादेशो न शब्दमाश्रित्य गुणः'। इति।

तथा च तदन्तविधिसूत्राभावे परमसर्वे, परमविश्वे, परमोच्चैः, परमनीचैः इत्यादि प्रयोगाणामसिद्धिः। तदन्तविधिस्वीकारे च उपेन्द्रः, ब्रह्मौदनः, स्योनः, इत्यादिप्रयोगाणां सिध्यभावः इति उभयतः पाशारज्जुरिति चेदत्रोच्यते–

येन विधिरिति सूत्रे विधीयते असौ विधिः इति 'उपसर्गे घोः किः' ३.३.९२ इति सूत्रेण कर्मणि किप्रत्ययः। येन इत्यत्र 'कर्त्तृकरणयोस्तृतीया' २.३.१८ इतिसूत्रेण करणेऽर्थे तृतीया, न तु कर्तरि, 'कर्तृकर्मणोः कृति' २.३.६५ इति षष्ठ्या बाधात्। नापि हेतौ, कारकविभक्तेर्न्याय्यत्वात्। किप्रत्ययेन कर्मण उक्तत्वाच्च नात्र 'उभयप्राप्तौ कर्मणि' २.३.६६ इत्यस्यावकाश। कारकेषु कर्त्तृकारकं करणकारकम् इति द्वे एव कारके व्यापारवती भवतः, नान्यानि कारकाणि। तत्र कर्ता प्रकृतधात्वर्थप्रधानीभूतव्यापारवान् भवति, करणं च तृतीयावाच्यव्यापाराश्रय इति विवेकः। तथा हि रामो बाणेन रावणमवधीत् इत्यत्र हन्धात्वर्थप्राणवियोगानुकूलो व्यापारो रामे, तृतीयावाच्यवेगाख्यव्यापारो बाणे। तथाचोक्तमभियुक्तैः 'व्यापारवदसाधारणं कारणं करणम्' इति। स च तृतीयावाच्यो व्यापारः प्रकरणादिना यथायथं यथायोगं तत्र तत्र निधार्यते।

तथा च येन इति करणतृतीयान्तेन गौणलक्षणया विशेषणमुच्यते। तृतीयया विशेषणं पारतन्त्र्यं वा लक्ष्यते इति दीक्षितोक्तिस्तु 'न विभक्तौ लक्षणा' इति सिद्धान्तन्नादर्तव्येति केचित्। विशेषणस्य इतरव्यावर्तनरूपो भवति व्यापारः। विशेष्ये सत्येव विशेषणं भवतीति विशेष्यविशेषणयोः समनियतत्वाद् विशेष्योप्यत्र सन्निधाप्यते। विशेष्यस्य सन्निधापनं क्वचित् साक्षान्निर्देशेन, यथा 'ईदूदेद्द्विवचनं प्रगृह्यम्' १.१.११ इत्यत्र द्विवचनमित्यस्य, क्वचिच्छब्दाधिकाराद् यथा 'एरच्' ३.३.५६ इत्यत्र 'धातोः' ३.१.९१ इत्यस्य, क्वचिच्च आक्षेपाद्यथा 'इको झल्' १.२.९ इत्यत्र सन्प्रत्ययेन धातोः इत्यस्येति त्रिभिः प्रकारैर्जायते। कर्त्ता चात्र प्रसिद्धत्वादाचार्यो भगवान् पाणिनिर्लभ्यते।

तदेवं आचार्यो येन करणभूतेन विशेषणशब्देन यस्य विशेष्यभूतस्य शब्दस्य कार्य विधत्ते स विशेषणीभूतः शब्दः तदन्तस्य, अर्थात् स विशेषणीभूतः शब्दः अन्ते यस्य तादृशस्य विशेष्यान्तशब्दसमुदायस्य संज्ञा, नाम बोधको भवतीति सूत्रार्थः संवृत्तः। अत्र सूत्रे 'स्वं रूपं शब्दस्याशब्दसंज्ञा' १.१.६८ इति सूत्रात् 'स्वम्' इत्युवर्त्तते, इति स्वस्यापि बोधकः। तदेवं चेयम्, जेयम् केयम् इत्यादिषु एयम् इत्यत्र च 'अचो यत्' ३.१.९६ इति यत्प्रत्ययसिद्धिर्निबाधा। तथा च भाष्यम्— 'अन्येन चान्यस्य विधिर्भवति। तद्यथा देवदत्तस्य समाशं (भोजनं) शरावैरोदनेन च यज्ञदत्तः प्रतिविधत्ते। संग्रामं हस्त्यश्वरथ—पदातिभिः। एवम् इहाप्यचा धातोर्यतं विधत्ते।' 'अत इञ्' ४.१.९५ इत्यत्र 'अकारेण प्रातिपदिकस्य इञं विधत्ते'। इति।

सति गमके पूर्वोक्तप्रकारत्रयेणानुपस्थितमपि 'शब्दस्वरूपं' 'तदादिं' वा समाना—धिकरणं विशेष्यमादाय जायते तदन्तविधिर्यथा 'सर्वादीनि सर्वनामानि' १.१.२७, 'ष्यङः सम्प्रसारणम् पुत्रपत्योः' ६.१.१३ इत्यादौ। 'प्रयोजनं' सर्वनामाव्ययसंज्ञायामि'ति वार्त्तिकस्य गमकतया सर्वनामसंज्ञायाम्, अव्ययसंज्ञायां च शब्दादनुपस्थितमपि शब्दस्वरूपं विशेष्यमादाय तदन्तविधिसत्वेन सर्वादिगणपठितान्तशब्दस्वरूपाणां, स्वरादिगणपठितान्तशब्दस्वरूपाणां तत्तत्संज्ञासिद्ध्या परमविश्वे, परमसर्वे, परमोच्चैः परमनीचैः इत्यादिप्रयोगसिद्धौ नावशिष्यते क्वापि बाधा। एवमेव ष्यङः सम्प्रसारणमित्यत्रापि 'प्रत्ययग्रहणे यस्मात्सविहितस्तदादेः' इति परिभाषायाः गमकत्वेन तदादिपदोपस्थितौ तद्विशेष्यकत्वेन तदन्तविधौ ष्यङन्तं यत्तदादि इत्यर्थे सति पूर्वपदं विशेष्यमादाय पुनः तदन्तविधौ ष्यङन्तं यत्तदादि तदन्तं यत्पूर्वपदम् इत्युपसर्जनस्थले अर्थे जाते कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः इत्यादौ सम्प्रसारणसिद्धिः अतिकारीषगन्ध्यपुत्रः इत्यत्र सम्प्रसारणाश्च सिध्यति। अनुपसर्जनस्थले तु 'स्त्रीप्रत्यये

चानुपसर्जनेन' इति तदादिनियमप्रतिषेधाद् परमकारीषगन्धीपुत्रः इत्यत्र सम्प्रसारणं भवत्येव, परमकारीषगन्ध्या इत्यस्य ष्यङन्तत्वस्य सर्वसम्मतत्वात्।

'इको यणचि' ७.१.७७, 'एचोयवायावः' ६.१.७८ इत्यादौ तु न कथंचिदपि विशेष्यस्य कस्यचिदपि सन्निधिरिति नास्य तदन्तविधिविधायकस्य 'येन विधिरिति' सूत्रस्यावसरः इति नात्र पूर्वोक्तानां दोषानामवकाशः इति सर्वं निरवद्यम्।

'विशेषणविशेष्यभावे कामचारः' इति सिद्धान्तात् 'उतश्चप्रत्ययादसंयोगपूर्वात्' ६.४.१०६ इति अत्र 'असंयोगपूर्वात्' इति उकारस्य विशेषणं, न तु प्रत्ययस्य। उक्तासंयोगपूर्वत्वविशिष्टिस्य प्रत्ययावयवोकारस्य अङ्गं प्रतिविशेषणत्वेन तदन्तविधौ असंयोगपूर्वो यः प्रत्ययावयवोकारः तदन्तादङ्गात्परस्य हेर्लुक् इत्यर्थे सति आप्नुहि, शक्नुहि इत्यादौ नातिव्याप्तिः। एवमेव 'उदोष्ठ्यपूर्वस्य' ७.१.१०२ इत्यत्रापि ओष्ठ्यपूर्वस्य इति ॠतः इत्यस्य विशेषणं न तु ॠदन्ताङ्गस्य धातोः, तथा च तदन्तविधिसत्वे ओष्ठ्यपूर्वो य ॠत् तदन्ताङ्गस्य धातोः इत्यर्थे सति न संकीर्णम्, संगीर्णम् इत्यादावति-व्याप्तिः नापि च निपूर्ताः पिण्डा इत्यदावव्याप्तिश्च।

तदन्तविधिरयं संमासविधौ, उगिद्वर्णग्रहणवर्जप्रत्ययविधौ च न प्रवर्तते। तथा च 'द्रितीया श्रितातीतपतित' २.१.२४ इत्यनेन कष्टं परमश्रितः इत्यादौ समासो न भवति। न च सूत्रनडस्यापत्यं सौत्रनाडिः इत्यत्र 'नडादिभ्यः फक्' ४.१.९९ इत्यनेन नाडायनः इतिवत् फक्प्रत्ययश्च भवति। अनुशतकादित्वादत्र उभयपदवृद्धिः।

तदन्तविधिसंकोचे बीजन्तु 'उगिद्वर्णग्रहणवर्जम्' 'समासप्रत्ययविधौ प्रतिषेधः' इति वार्तिकद्वयमेव। इदं वार्तिकद्वयं विशेष्यविशेषणभावव्यत्यासे तात्पर्यग्राहकम् एव।

प्रत्ययविधित्वेऽपि 'उगितश्च' ४.१.६ इत्यत्र तदन्तविधिर्भवत्येवेति प्रातिपदिकं विशेष्यमादाय तदन्तविधौ, उगिदन्तं यत्प्रातिपदिकं तस्मात् ङीप् इत्यर्थेन अतिभवती इत्यादावपि ङीप् सिध्यति। 'अत इञ्' ४.२.९५ इत्यस्यापि प्रत्ययविधायकत्वेपि वर्णग्रहणात् अत्रापि, प्रातिपदिकं विशेष्यमादाय तदन्तविधिर्जायते इति दाक्षिः, प्लाक्षिः, इत्यादावपि इञ्प्रत्ययसिद्धिः। 'मेघर्तिभयेषु कृञः' ३.२.४३ इत्यत्र, 'आढ्यसुभगस्थूलः' ३.२.५६ इत्यत्र च कर्म विशेष्यमादाय भयशब्दं, आढ्यादिं च विशेषणं कृत्वा तदन्तविधौ कर्मार्थबोधके भयान्तशब्दे उपपदे, कृञः खच् प्रत्ययो भवति, कर्मार्थबोधकेषु आढ्याद्यन्तशब्देषूपपदेषु कृञः ख्युन् प्रत्ययः स्याद् इत्यर्थेन अभयंकरः, स्वाढ्यंकरणम् इत्यादिप्रयोगाणां सुखसाध्यता स्पष्टैव। तथा च श्री कैयटः – भयादिभिः कर्म विशेष्यते। इति।

भट्टनागेशास्तु अभयंकर इति भाष्यप्रयोगाद् भाष्योक्तिं गमिकां मत्वा शब्दस्वरूपं विशेष्यमादायात्र तदन्तविधिं ब्रुवते। तथा हि लघुशब्देन्दुशेखरः– 'येन विधिरिति–सूत्रस्थभाष्यप्रामाण्याच्छब्दरूपं विशेष्यमादाय तदन्तविधिरत्रेति बोध्यम्' इति। 'नेदमदसोरकोः ७.१.११ इतिसूत्रघटकाकोरितिपदज्ञापितेन 'तदेकदेशभूतं तद्ग्रहणेन गृह्यते' इति वचनेन सर्वके विश्वके इत्यादौ अकच्प्रत्ययविशेष्टेऽपि सर्वनामत्वेन शीभावो निर्बाधः।

महाभाष्ये तदन्तविधेः बहूनि खलु प्रयोजनानि प्रदर्शितानीति अधिकजिज्ञासुभिः ततोऽवगन्तुं शक्यन्ते इत्यलमियता।

समानाक्षरसंज्ञाविषये किञ्चत्

निर्मला कुलकर्णी

१.०.० उपोद्धात:

'समानाक्षर' इति संज्ञा शिक्षाप्रातिशाख्यादिग्रन्थेषु प्रसिद्धा। अ, इ, उ, इ. स्वरसंध्यभावयुक्ता: स्वरा: समानाक्षरसंज्ञया वर्णिता:। ते **Monophthongs** इति आङ्ग्लभाषायां कथ्यन्ते। स्वरद्वयसंधिरूपत्वाभावत्वं समानाक्षरत्वम् इति तैत्तिरीयप्रातिशाख्यास्य टीकायाम् उक्तम्। तथापि प्रतिप्राति–शाख्यं समानाक्षराणां गणनं भिद्यते। किं कारणं भवेदस्य गणनभेदस्य इत्येव अस्य पत्रस्य विषय:। स च निम्नोक्तरीत्या विशदीकृत:

१. विविधेषु ग्रन्थेषु 'समानाक्षर' – संज्ञावर्णनम्

२. वर्णने भिन्नता तस्याश्च कारणम्

३. निष्कर्ष:

१.१.० समानाक्षरसंज्ञावर्णनम् – समानाक्षरसंज्ञाया: वर्णनानुरूपं ग्रन्थानां विभागद्वयं भवितुमर्हति।

१. प्रथमो विभाग :– अ) प्लुतानां वर्जनं, ऋवर्णस्य अथवा ऋलृवर्णयो: अन्तर्भावश्च, प्रथमविभागस्य लक्षणम्। 'अष्टौ समानाक्षराण्यादित:' इत्युक्त्वा 'अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, इत्यष्टौ स्वरा: समानाक्षरसंज्ञया व्यपदिश्यन्ते ऋग्वेदप्रातिशाख्ये[1], (ऋ प्रा) वाजसनेयिप्रातिशाख्ये[2] (वा प्रा), शौनकीय चतुराध्यायिकायां[3] च। आ) अस्यैव उपविभागे अष्टाध्याय्या: टीकाग्रंथा:, अन्ये कातन्त्रादय: व्याकरणसंप्रदायग्रंथा: अन्तर्भवन्ति। उपर्युक्तेषु अष्टसमाना–क्षरेषु ते लृवर्णस्य ह्रस्वदीर्घे द्वे रूपे परिगणयन्ति। 'दश समाना:' इति व्याख्यानुसारेण।

२. द्वितीय: विभाग: – अस्मिन् विभागे तैत्तिरीयसम्प्रदयस्य अन्तर्भाव: कर्तुं शक्यते तैत्तिरीयप्रातिशाख्यं (तैप्रा)[4] पारिशिक्षा[5] च। अस्य विभागस्य

प्रथमविभागापेक्षया भिन्नैव सरणिः। प्लुतानाम् अन्तर्भावः, ऋलृवर्णयोः च वर्जनम् इति वैशिष्ट्यम् अस्य विभागस्य। 'अथ नवादितः समानाक्षराणि' इत्युक्त्वा अ,आ,आ३, इ, इ, ई३, ऊ, ऊ, ऊ३ इति नवानां स्वराणां परिगणनं कुर्वन्ति। एवम् –

प्लुतानां वर्जनम्	ऋ/लृयोः अन्तर्भावः	प्लुतानाम् अन्तर्भावः/ ऋलृयो वर्जनम्
लृकारस्य वर्जनम् १. ऋ.प्रा. २. तै.प्रा. ३. शौच	लृकारस्य अन्तर्भावः ऋक्तंत्रविवृतिः पाणिनेः टीकाग्रंथाः अन्ये व्याकरणसंप्रदायाः	तै. प्रा. पारिशिक्षा

१.२.० भेदस्य कारणम् –

१. प्लुतस्वराणां गणनं किमर्थम्?

वस्तुतः, समानाक्षरसंज्ञा संध्यक्षर (diphthongs) संज्ञा विरोधित्वेन उपयोजिता। स्वरस्वरूपस्य वर्णनमेव तस्याः उद्देशः। अतः 'स्वरद्वय-संधिरूपत्वाभावत्व' इत्येव युक्तं लक्षणम्। तच्च प्लुतस्वरेषु सिद्ध्यति। तत्र केवलं मात्राणां संख्या भिन्ना। सन्धिश्च नास्ति। ह्रस्वापेक्षया प्लुतवर्णस्य मात्रासंख्या भिन्ना। अतः सः 'समानाक्षरम्' एव। अतएव तैत्तिरीयप्रातिशाख्ये तेषां गणना 'समानाक्षरेषु' कृता।

किमर्थं प्रथमविभागस्थैः ग्रन्थैः ते विवर्जिताः? यद्यपि, समानाक्षर-संज्ञायाः संध्यभावः एव प्रवृत्तिनिमित्तम्, तथापि नैकवारं एषा संज्ञा सवर्णदीर्घ-संधिप्रकरणे एव प्रयुक्ता। प्लुतानां च संधिः नास्ति। अतः ते विवर्जिताः। अस्मिन् विषये टीकाकाराः अपि एवम्–

१. उवट – "इह तु तेषां प्लुतानां ग्रहणं न संभवति, प्रयोजनाभावात्, सवर्णदीर्घत्वं च संज्ञाकरणे प्रयोजनम। न च सवर्णदीर्घत्वं उक्तानां प्लुतानां संभवति। अतः प्लुताः न गृह्यन्ते।"

२. अनतभट्ट:[७] –''प्लुतानां नियतानां वक्ष्यमाणत्वात् संज्ञाया: अकार्यार्थत्वाद् अग्रहणम्।''

३. बालशिक्षा[८] – ''समानादन्योऽसवर्ण:''

अत एव 'समानाक्षरविधि:' 'समानकार्यम्' इति शब्दा: 'सवर्णकार्यम्' इति अनूदिता: पाणिनिसंप्रदाये एवम्–

कात्यायन:[९] – वर्णौकदेशा: वर्णग्रहणेन चेत् संध्यक्षरे समानाक्षरविधिप्रति–षेध:'। शिव. ३ वा ४।

पतञ्जलि:[१०] :– वर्णैकदेशा: वर्णग्रहणेन चेत् संध्यक्षरे समानाक्षराश्रयो विधि: प्राप्नोति स प्रतिषेध्य:। अग्ने इन्द्र, वायो उदकम्। अक: सवर्णे दीर्घ: इति दीर्घत्वं प्राप्नोति।

प्रदीप:[११] – समानशब्देन पूर्वाचार्यनिर्देशादकोऽभिधीयन्ते। 'दशसमाना:' इति वचनात्। तेन समानकार्यं प्राप्नोतीत्यर्थ:।

उद्योत:[१२] – समानकार्यम् अग्रूपसमानकार्यमित्यर्थ:। सवर्णकार्यमिति पाठे सवर्णदीर्घरूपकार्यम् इत्यर्थ:।

एवं समानाक्षरसंज्ञा सवर्णदीर्घसंधिविषये प्रयुक्तवात् प्लुतानाम् अग्रहणम्।

तैत्तिरीयप्रातिशाख्ये तावत् सुसूत्रता दृश्यते। प्रथमं तावद् समानाक्षराणि परिगणय्य अनन्तरं –'द्वे द्वे सवर्णे ह्रस्वदीर्घे' (१.३) इत्युक्त्वा प्लुता: सवर्णात् परिवर्जिता:। 'दीर्घं समानाक्षरे सवर्णपरे' (१०.२) इति सवर्णदीर्घत्वं च उक्तम्।

२. ॠऌयो: वर्जनम् –

संधिरूपत्वाभावत्वमेव समानाक्षराणां लक्षणम्। यद्यपि ॠ, ॡ इत्येते वर्णो न स्वरद्वयसंधिस्वरूपौ तथापि ते, र, ल, व्यञ्जनमिश्रितौ एव। तैत्तिरीयप्रातिशाख्यं तौ 'पृक्तौ' इति वर्णयति। अत एव प्राय: तयो: समानाक्षरेषु गणनं न कृतम्। टीकाकारास्तु एवम्–

अ. उपयोगानुगुण्यत्वम् – तैत्तिरीयशाखायां ॠऌयो: सवर्णसन्धि: न दृश्यते। अत: तेषाम् अग्रहणम् इति मतं त्रिभाष्यरत्नस्य[१३]। ''आचार्यस्तु उपसर्गसंज्ञावत् उपयोगानुगुण्यान् नवानामेव आह।'' मम तु मतम्–

समानाक्षरसंज्ञाया: सवर्णदीर्घसन्धि: इति प्रयोजनम् अन्येषां प्रातिशाख्यानां, न तु तैत्तिरीयसम्प्रदायस्य। अपरं च, ऋलृवर्णयो: सवर्णदीर्घसन्धि: न केवलं तैत्तिरीयशाखाया: वैशिष्ट्यम्, अपि तु सर्वस्यापि वैदिकवाङ्मयस्य।

२. ऋलृवर्णयो: विवर्जनस्य अन्यदपि कारणमुक्तं वैदिकाभरणकारेण[१४] रूपद्वय–सद्भावत्वम् इति। 'ऋकारादीनां स्वरद्वयसंधिरूपत्वाभावेऽपि रूपद्वयसद्भावात् एषा संज्ञा न युक्ता।'' नाम ऋलृवर्णानां प्लुतत्वं नास्ति, अत: ते वर्जिता:। भाषिकसूत्रम्[१५] इत्येको ग्रन्थ: शतपथब्राह्मणसम्प्रदायस्य। तस्मिन् 'अवर्णधा–रणा:' इत्येका संज्ञा वर्णिता। यो वर्ण: अवर्ण: इव ह्रस्व:–दीर्घ–प्लुतरूपात्मको भवति स वर्ण: अवर्णधारण:' इति उक्तम्। अस्य ग्रन्थस्य टीकाकृत् महास्वामी विशदी–करोति –''अवर्णस्य धारणा: अवर्णधारणा:। अस्ति पदं मात्राकालं, द्विमात्राकालं, त्रिमात्राकालम् इति। अकारादय: पञ्चवर्णा: अष्टादशधा भिद्यन्ते इत्यर्थ:''..........

अत एव प्राय: ये ये वर्णा: अवर्णधारणा: मता: प्रातिशाख्यै: ते ते समानाक्षरेषु निविष्टा:। तथापि अन्यो कोऽपि ग्रन्थ: इदं मतं कथं न पुरस्करोति इति तु शङ्कास्पदमेव।

१.३.० निष्कर्ष: – मम तु इदं मतम्। स्वरद्वयसंधिरूपत्वमेव समानाक्षरत्वम् इति तत्त्वं तैप्रा. संपूर्णतया अनुसरति। अत एव प्लुतानाम् अन्तर्भाव:, ऋलृवर्णयो: च वर्जनं तयो: व्यञ्जनपृक्तत्वात्। एवं केवलं अ, इ, उ वर्णा: तेषां दीर्घप्लुतरूपाणि च समानाक्षराणि।

अन्येषां ग्रन्थानां ''सवर्णदीर्घत्वमेव संज्ञाया: प्रयोजनम्। यत्र यत्र सवर्णगणनभेद: तत्र तत्र समानाक्षरगणनभेद:। अत एव प्लुतानां वर्जनम्।''

संदर्भा:

१. वर्मा, वीरेन्द्र कुमार, ऋग्वेद प्रातिशाख्यम् (संपा.उवटाचार्याणां टीकासमेतम्), काशी विश्वविद्यालयम्, बनारस, १९७०।

२. रस्तोगी, इन्दु ''शुक्लयजु:प्रातिशाख्यम्'' (संपा.) चौखम्बा संस्कृत सीरिज, वाराणसी, १९६७।

३. क्हिटनी, डब्ल्यू.डी. The Atharvaveda Prātiśākhyam, (पुनर्मुद्रणम्) (संपा.) चौखम्बा संस्कृत सीरिज, वाराणसी, १९६२।

४. आर्. शामशास्त्री, एस्.के. रंगाचार्य, ''तैत्तिरीयप्रातिशाख्यम्'' त्रिभाष्यरत्न–वैदिकांभरणसमेतम्' (संपा.) मोतीलाल बनारसीदास दिल्ली, १९८५।

५. Sanskrit Texts on Phonetics, (reproduced) लोकेशचन्द्र New Delhi, १९८१ ।

६. उपर्युक्तम्

७. मिश्र, युगल किशोर, (ed) ''ज्योत्स्नावृत्ति on the शुक्लयजु: प्रातिशाख्यम्'' बनारस, १९८९।

८. प्रा. माधवदेशपांडे महोदयैः स्वीये ''सवर्णविषयके प्रबन्धे उद्धृता।

९. वेदव्रत The Vyākaraṇamahābhāṣyam with Pradeepa & Udyaota, १०, ११ और १२ (ed) Rohtak, १९६२।

१३ उपर्युक्तम्।

१४. उपर्युक्तम्।

१५. चौबे, बी.बी. ''भाषिकसूत्रम्'' (संपा.) Punjab University Indological Series, 4, VVR9 Hoshiarpur, १९७५।

रप्रत्याहारविषये शाब्दिकानां मतान्तराणि

सौ.भाग्यलता पाटसकर:

ईदृशी समस्याऽत्र

१. पाणिनि: धातुपाठे क्लृप् इति धातुर्न परिगणित:।

२. वैदिकभाषायां तु अस्य धातो: मूलरूपात्मकानि, गुणात्मकानि च रूपाणि उपलभ्यन्ते अचीक्लृपत्, चाक्लृप्त, कल्पते, कल्पताम्। तथा च भाषायामपि कल्पनीयम् इत्यादीनि गुणात्मकानि, क्लृप्तीत्यादीनि च मूलरूपात्मकानि रूपाणि प्रयुज्यन्ते।

३. स्वयं पाणिनिना सूत्रयेषु क्लृप् इति धातु: प्रयुक्त: तद्यथा– अ) लुटि च क्लृप: (१.३.९३) इत्यनेन क्लृप् धातो: लुटि, स्ये परत: (नाम लृङि) सनि परतश्च परस्मैपदं वा विहितम्[1]।

आ) तासि च क्लृप: (७.(वैजल–कारिकाया:) अवदानम्२.६०) इत्यनेन तासि सकारादौ आर्धधातुके च परत: इडागम: प्रतिषिद्ध:।[2] एवं कल्प्ता, कल्प्स्यति, अकल्प्स्यत् चिक्लृप्सति इति रूपाणि प्राप्यन्ते।

इ) ऋदुपधाच्चाक्लृपिचृते: (३.१.११०)। अनेन क्लृप् धातो: ण्यत् प्रत्यर्पित: (क्यप् निषिध्य)। अनेन कल्प्यम् इति रूपं सिध्यति।

अत्रायं प्रश्न: धातुपाठे अवर्तमानस्य अस्य क्लृप् धातो: प्रसङ्गवशात् प्राप्तो गुण: केन सूत्रेण साधनीय:?

अत्र भट्टोजिमहोदयेन

उरणरपर: (१.१.५१) इत्यस्मिन् सूत्रे 'र' इति प्रत्याहारत्वेन स्वीकृत:। तदर्थं पुन: लण् इति षष्ठे माहेश्वर–सूत्रे अकार: अनुनासिकत्वेन प्रतिज्ञात:। तथा च उ: इति उ: इति सूत्रस्थम् ऋकारस्य षष्ठ्यन्तं रूपम् ''ऋलृवर्णयो: मिथ: सावर्ण्यं वाच्यम्'' इत्याश्रित्य ऋकारलृकारयो: स्वीकृतम्। एवमस्यायासस्य को लाभ इति चेत् तत्रोच्यते।

यथा ऋकारस्य गुणः अर् तथा ऌकारस्य गुणः अल् इति। एवं भट्टोजिमतानुसारेण क्लृप् इत्यस्य कल्प् इति गुणात्मकं रूपं सरलतयाऽऽपादनीयम्। अस्य व्याख्यानस्य सूत्रान्तरेण संबन्धः

अष्टाध्याय्यां सूत्रान्तरं वर्तते। कृपो रो लः (८.२.१८) इति। कृप् इति धातुरव–यवषठ्या निर्दिष्टः इति स्पष्टमत्र। तदत्र धातुपाठे कृप दौर्बल्ये चुरादिः, कृपि दौर्बल्ये चुरादिः अपि च कृप् सामर्थ्ये इति भ्वादिः इत्येते कृपू रूपिणो धातवः निर्दिष्टाः। सूत्रानुसारेण तत्रस्थस्य रेफस्य लकारो भवति। कुतोऽत्र रेफस्य प्राप्तिरिति चेत् यदा सार्वधातुकार्धधातुकेयोः परतः गुणस्य संभवः तदा गुणस्य प्राप्तिः। तदा कर्प्–इति प्राप्ते सति समनन्तरमेव रो लः इत्यस्य प्रवृत्त्या कल्प् इति रूपं लभ्येत इति दृश्यते सूत्र–कृतोऽभिप्रायः।

अनेन इदमापद्यते यत् उपरिनिर्दिष्टेषु बहुविधेषु रूपेषु कल्प् इति यद्गुणरूपमङ्गं तत् वस्तुतः कृप् इति धातोः अपि च क्लृप् इति यन्मूलरूपात्मकमङ्गं वर्तते तस्यापि सिद्धिः 'कृपो रो लः' इत्यस्मादेव तदर्थं व्याख्यानमेव शरणम्।[३] इति प्रश्नोऽवतिष्ठते[४]। वृत्तिकारेण उरण्परः इत्यत्र रेति प्रत्याहारो न निर्दिष्टः[५] तथापि आद्गुणः (६.१.८७) इत्यस्य वृत्तौ तवल्कारः खट्वल्कारः इत्युदाहरणद्वयं दत्त्वा ऌकारस्य स्थाने योऽण् तस्य लपरत्वमिष्यते इत्युक्तम्। अणो लपरत्वं तदैव चरितार्थं भवति यदा ऋऌवर्णयोः सावर्ण्यं स्वीक्रियते[६]।

अथ वृत्तिकारः – ''लण्'' (माहेश्वरसूत्रम्) सूत्रे लकारे त्वनुनासिकः प्रतिज्ञायते। तेन ''उरण्परः'' इत्यत्र रेति प्रत्याहरग्रहणात् लपरत्वमपि भवति इति विशेषतः प्रतिपादयति, तथापि प्रत्याहाराणां यदा समुच्चयेन सङ्ग्रहं करोति तदायं रप्रत्याहारमुपेक्षते।[७]

अथ स्वीकृते रप्रत्याहारे काश्चन विप्रतिपत्तयः–

(अ) स्वीकृते रप्रत्याहारे 'कृपो रो लः' इति अचरितार्थं भवेत्।

(आ) 'अतो ल्रान्तरस्य' ७.२.२ इत्यत्र तथा च 'रलो व्युपधाद्धलादेः संश्च' १.२.२६ इत्यत्र च रेफ–लकारयोः पृथक्त्वेन निर्देशः नोपपद्यते।

(इ) 'लण्' सूत्रस्थेनाकारेणान्ये प्रत्याहाराः किमर्थं न साधिताः यथा यण् इत्यस्य कृते येति?

(ई) क्लृप् इत्यङ्गमप्राप्तुं 'कृपो रो लः' इत्यत्र महान् प्रयासः आदर्तव्यो भवति। यत्र च ऋकारस्य स्थाने ऌकारः इति यदुक्तं तद् व्यवस्थानुसारि न दृश्यते, यतो

हि 'ब्रुवो वचिः[८]', 'अस्तेर्भूः[९]' इत्येवं स्थान्यादेशभावेन धात्वन्तरं प्रतिपादयन् सूत्रकारः अत्रापि किमर्थं तामेव सरणीं नानुसरति इति न ज्ञायते।

उ. अन्ततः कृप्–धातुः निर्दिष्टः तथापि कर्प् इत्यात्मकानि रूपाणि भाषायां नोपलभ्यन्ते प्रत्युत कल्प्, क्लृप्, इत्यात्मकानि रूपाणि सन्ति तथापि तादृशो धातुर्नास्ति, केयं विप्रतिपत्तिः?

अतः नागेशभट्टेन 'र' इति प्रत्याहारः न स्वीकृतः। तत्र निर्वाह ईदृशः। लण्सूत्रस्थाकारस्येत्संज्ञाविषये शेखरकारोऽयं प्रतिवदति किञ्चास्येत्संज्ञके बहुपु यणपदघटित–सूत्रेपु अर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत्[१०]। अपि च समस्यान्तरमिदम्–

लण्सूत्रस्थोऽकारः केन सूत्रेण इत्त्वं लोपं चापद्येत ? 'उपदेशेऽजनुनासिक इत्[११]' इत्यनेन इति। अस्मिन् सूत्रे अच्प्रत्याहारः कदा सिध्येत्। इति चेत् 'हलन्त्यम्[१२]' इत्यनेन चकारस्य इत्संज्ञायां प्राप्तायाम् तथा च 'आदिरन्त्येन सहेता[१३]', इत्यस्मिन् प्रवृत्ते सति। एवं 'हलन्त्यम्' इत्यस्य प्रवृत्तिः प्रथममपेक्ष्यते। तस्य प्रवृत्तिकाले तु लण् सूत्रस्थ–स्याकारस्येत्संज्ञा न प्राप्ता येन इत्यपि इतोऽकारस्य समावेशः स्यात् यश्च व्यवस्था–विरोधि। अतः लण्सूत्रे अकारेण अनुनासिकेन न भाव्यम्।

अस्तु तर्हि नागेशादिभिः रप्रत्याहारो नादृतः तथापि ऋकारस्य गुणत्वेनाल् वृद्धित्वेन च आल् साधयितुं तेन भाष्यकाराणां वचनं समाश्रितम् यत्स वक्ति "वस्तुतः रप्रत्याहाराभावेन रपर इत्यस्य स्थाने लपर इति पठनीयम् इति लपरत्वं वक्ष्यामि इति तुल्यास्यसूत्रभाष्याल्लभ्यते।[१४]

एवं यैः रप्रत्याहारत्वेन न स्वीकृतः तेषां कृतेऽपि लृकारस्य गुणवृद्ध्यवाप्त्यर्थं किञ्चिद् युक्त्यन्तरं समालम्बनीयम्। अपि च 'कृपो रो ल' इत्यत्रापि ऋकारावयवस्य लृकार इत्यर्थे स्वीक्रियमाणे[१५] पुनः अकृपेताम्, अकृपन्तेत्यादीनां रूपाणां सिद्धिर्दुवारा।

एवं स्वीकृते वा तिरस्कृते वा[१६] रप्रत्याहारे उभयथापि विप्रतिपत्तिः। तथा च 'कृपो रो ल' इत्यस्य विषयविभागोऽपि न स्पष्टः। एवं समस्यामुपस्थाप्य तत्र किञ्चित् सूचयितुमिच्छामि। तदर्थम्–

१. ऋकारलृकारविषये विमर्शः कर्तव्यः

२. क्लृप् कृप्–इत्येतयोः धात्वोः धातुपाठसूत्रपाठ–व्यवहारेषु स्थितिः द्रष्टव्या।

३. लृकारस्य गुणवृद्धी अपरिहार्या वा, इत्येते विषयाः परामर्शयितव्याः।

१. ऋकारलृकारविषये किञ्चित्

ऋग्वेदप्रातिशाख्यानुसारेण उभावपि जिह्वामूलीयौ[७]। तैत्तिरीयप्रातिशाख्यानुसारेण उभावपि दन्तमूलीयौ[८] अथर्वप्रातिशाख्यपरंपरायामेतौ जिह्वामूलीयौ परिगणितौ[९] वाजसनेयी प्रातिशाख्यानुसारेण तौ भिन्नस्थानीयौ ऋकारो जिह्वामूलीयः लृकारो दन्त्य इति च[१०]। एतस्मात् स्पष्टमिदं यत् कदाचित् ऋकारलृकारौ समानस्थानीयत्वात् (समानप्रयत्नौ तौ वर्तेते एव) सवर्णौ स्तः यदधिकृत्य कात्यायनेन ऋलृवर्णयोः सवर्णविधिरित्युक्तम्। पाणिनेस्तूभौ भिन्नस्थानीयावित्यभिमतम्। यतः माहेश्वरत्सूत्रे ऋलृ स्वंतन्त्रत्वेन परिगणितौ अपि च हयवरट्। लण्। इत्यत्रापि स एव क्रमः आदृतः। नियमतः तौ विविक्ततरौ इति पाणिनिना ज्ञातपूर्वम् एव। तथा च लृकारः सन्दिग्धोच्चारणः तथा ऋकारसदृशोच्चारणः इति अनुभूतमपि। अनेनाभिप्रायेण तेन "ऋदुपधाच्चाक्लृपिश्रुतेः" ३.३.११० इत्यत्र सादृश्यार्थकः नञ् कलृपः कृते प्रयुक्तः[११]। ऋदुपधसदृशः क्लृप्धातुः (यथा अनिक्षुः शर इति।) तत्रापि सदृशतमः कृप् धातुः यः कृपू इति उदितः धातुपाठे परिगणितः। अत एव रुदित्वात् विकल्पेन प्राप्तः इट्[१२] तासि च क्लृपः इत्यनेन निषिद्धः।

अयम् लृकारः ऋकाराद् भिन्नः सन्नपि समानप्रवृत्तिकः इति उदाहरणान्तरादपि स्फुटं भवति। प्राकृतभाषायां यथा ऋकार इकारे परिणमति तथा लृकारोऽपि इल्–(?)–कारे परिणमते। यथा उत्तरस्मिन् काले तौ समानप्रवृत्तिकौ एवं ततः प्रागपि तौ समान–धर्माणौ इति अनुमितं भाषाशास्त्रविद्भिः[१३]। अश्रुतिधराभ्यां रेफलकाराभ्यामुभौ अपि तौ संश्लिष्टौ[१४]। अतः कदाचित् सधर्माणौ कदाचिच्च विधर्माणौ दृश्येते। तयोः ऋकारः प्रचुरप्रयोगः लृकारस्तु कलृपिस्थ एवाल्पिष्ठप्रयोगः। सोऽपि वैदिकभाषायां केषुचिदेव पदेषु वर्तमानोऽपि तन्माध्यमेन प्रभूतप्रसारः आसीत्।

धातुपाठे सूत्रपाठे च लृकारः

सत्येवं धातुपाठे परिगणिते क्लृपि लृकारो भाषाप्रयोगविषय इति आपद्येत। अपि च ते एव धातुपाठे निर्दिष्टाः येषां स्वरूपं निःसन्दिग्धम्, अर्थतः पूर्णम्, अपि च रूपान्तराणि निर्मातुं सुक्षमम्।[१५] क्लृपो न तादृशः लृकारस्य सन्धिग्धरूपत्वात् नैव प्रयोगाक्षमत्वात्। कल्प् इति रूपं तु धातुपाठे परिगणितुं न शक्यते यतो हि धातुपाठे मूलरूपाणि एव (गुणवृद्धिविहीनानि) एव परिगणितानि इति दृश्यते। तद् यथा[१६] चिनोति, चेष्यति, चयनम्, अचैषीत्, चाययते इत्यत्र चि इतिरूपं धातुत्वेन स्वीकृतम्। एवमेव

कृशति, कृष्ट, चकर्ष, कर्षण कार्षि, कार्ष्मन् इत्येतेभ्यः पदेभ्यः कृश् इति धातुरूपं निकृत्तम्। एवं क्लृप् इति धातुत्वेन स्वीकर्त्तुं न शक्यते कल्प् इति तु व्यवस्थानुसारि नास्ति। अत एव सादृश्यबलात् कृप् इति धातुत्वेन स्वीकृतः॰कृपो रो लः इत्यनेन कल्प् इति रूपात्मकानां पदानां निर्वाहः कृतः। अतः "ऋ इत्यस्य लृ स्यात्" इत्यर्थस्य प्रयोजनं न स्फुटीभवति तदत्र विदुषां पुरस्तादुपस्थापितः। यतो हि संहितायां ब्राह्मणेषु च कृप्–युक्तानि रूपाण्युपलभ्यन्ते कानिचन तेषु यथा– कृपयसे कृपयध्वे, कृपयमाण, अकृपेताम्, चकृपे इति। ऋकारावयवस्य लृकारावयवः इत्यर्थे स्वीकृते एतेषां रूपाणां निर्वाहः कठिनतरो भवेत्। क्लृप्. इति तु यः पुनः निर्देशः सूत्रेषु तेन कृतः सः सौत्रत्वेन मन्तव्यः। तस्यापि गुणरूपं कल्प् इत्येव प्रसङ्गवशादापतितम् इति स्वीकरणे न कापि हानिर्दृश्यते।

अधुना लृ इत्यस्य गुणवृद्धिविषये किञ्चित्

उरणरपः इत्यनेन ऋइत्यस्य अर्, आर्, इर्, उर् इत्येते आदेशाः पाणिनिना संसूचिताः कुत्रचित् सर्वेऽपि प्रयुक्ताः। तत्रैव लृं इत्यस्य किमर्थं न पठिता इति चेत्? तदित्थम् लृविषये एतादृशमादेशवैविध्यं नास्ति। भाषायामेव नावशिष्टोऽयं कुतोऽस्य रूपविविधता। तथा च अयम् लृकारः न कदापि पदान्तत्वं भजते इति प्रातिशाख्यैः निरीक्षितम्[२७] न वा तेन आरभमाणः अकृत्रिमः कश्चन शब्दः। सर्वथैव केवलमुप–धास्थानभागयम्। यदा उपधागुणः अपेक्षितः तदा कृप्सादृश्यात् कर्प् इति तस्य गुणः कर्तव्यः। ततोऽनन्तरं रेफस्य लकारः कर्तव्यः एवम् लृकारस्य अल् इति रूपं परम्परया उपलभेत न साक्षात्। धातुरूपे वृद्धेरवसरो नास्ति।

अथ कृत्रिमे रूपे पाणिनेरभिप्रेतेऽनभिप्रेते वा लृ इत्यस्य आद्गुणः इत्यनेन प्राप्तः गुणः कथं समर्थनीयः इति द्रष्टव्यम्– तव + लृकारः इत्यत्र अकार–लृकारयोः अकार एव गुणरूप एकादेशः लभ्यते, तथापि अर् सादृश्यात्, स्थानतः आन्तरतम्यबलात् स लपरो भवेदिति कृत्वा कदाचित् पाणिनिना नोक्तः स्यात्।

अल्पप्रयोगविषयस्य अपि च भाषातः निष्कासितप्रायस्य लृकारस्य माहेश्वरसूत्रे परिगणने किं वा प्रयोजनं मुनेरिति विमृशामः। संस्कृते लृकारः अन्तःस्थत्वेन परिगणितः। अच्सदृशः सोऽपि अनुनासिकाननुनासिकभेदेन द्विधा। एवं तस्य स्वरीभावाक्षमत्वम् अर्धस्वरत्वं तु स्फुटमेव। अत एव संप्रसारणधर्माऽयं मूलत.। अपठिते लृकारे तस्य

संप्रसारणक्षमत्वमपि अनुक्तं स्यात्। तत्परिहर्तुम् लृकारस्य पाठोऽनिवार्य इति मतः स्यात् पाणिनिना। तेन च "इग्यणः संप्रसारणम्"। इति सूत्रमपि सङ्गच्छते। ततश्च लृ इति स्वरस्तेनानुबन्धत्वेन सप्रयोजनं स्वीकृतः। अपठिते लृकारे तस्यानच्त्वात् सूत्रपाठे "पुषादिद्युताद्यलृदितः परस्मैपदेषु" ३.१.५५ इत्यत्र यणभावः कथं सिध्येत्[२८]।

तदित्थं संगृह्यते

१. पाणिनेः पुरस्तात् कृप्—कलृप्—कल्प् इत्यङ्गात्मकानि छन्दसि भाषायां च प्राप्तप्रयोगाणि रूपाणि आसन्।

२. तत्र च लृ इति स्वरः तदानीन्तनायां भाषायां लुप्तप्रायः। यत्र कुत्रचित् प्रयुक्तः तत्र सन्दिग्धोच्चारणः एवं मुमूर्षुरिव आसीत्।

३. अयं सन्दिग्धस्वभावः लकारः ऋकारेण सादृश्यं वहन्नासीत्

४. अतः क्लृप् धातुः पाणिनिना कृप इति स्वीकृतः केवलं प्रसङ्गापेक्षः अन्यथा मूलतः सौत्रोऽयं धातुः।

५. एवं क्लृपं कृपं मत्वा गुणः प्राप्तव्यः "कृपो रो लः" इत्यनेन तस्य लत्वं साधनीयम्।

६. "आद् गुणः," "उपसर्गादृति धातौ" इत्यादिभिः सूत्रैः प्राप्यमाणे गुणवृद्धी पाणिनिना नानुमिते लृकारस्य भाषातः नष्टप्रायत्वात्।

७. तथापि प्राप्तव्ये चेत् अर् आर् इति सादृश्यात् स्थानतः आन्तरतम्यात् अल् आल् इति प्राप्तुं शक्येते इति कृत्वा उपेक्षिते मुनिना।

८. ऋलृवर्णयोः सावर्ण्यम् नाभिप्रेतं तस्य तथापि कुत्रचित् इति तु स्वीकृतम्।

९. "कृपो रो लः" इत्यत्र ऋकारस्य लकारः इत्येतादृशस्य अव्याख्यानस्य आवश्यकता नास्ति।

१०. र्प्रत्याहारस्यापि आवश्यकता नास्ति।

टिप्पण्यः

१. यदा परस्मैपदं तदा कल्पता, कल्स्यति, अकल्प्स्यत्, चिक्लृप्सति इति रूपाणि। आत्मनेपदे सति कल्पिता, कल्पिष्यते, अकल्पिष्यत चिकल्पिषते इति रूपाणि।

२. अस्मिन् सूत्रे गमेरिट् परस्मैपदेषु ७.२.८८ इत्यस्मात् परस्मैपदेषु इत्यनुवर्तते।

न वृदभ्यश्चतुर्भ्य: इत्यस्मात् 'न' इति अनुवर्तते। सेऽसिचि कृतचृतच्छृदतृदनृत: इत्यस्मान् से इति अनुवर्तते। तदयं सूत्रार्थ: कृप उत्तरस्य तासे: सकारादे-श्चार्धधातुकस्य परस्मैपदेषु इडागमो न भवति

३. यद्यपि वृत्तिकार: कृपे: धातो: रेफस्य लकारादेशो भवतीति विवृणोति सूत्रं प्रथमत: तथापि अनन्तरं रेति श्रुतिसामान्यमुपादीयते इत्यपि वक्ति। र इति केवल: वर्ण: अपि च ऋकारेऽपि कश्चन रेफांशो वर्तते। तदुभयं मनसि कृत्वा श्रुतिसामान्यमिति शब्द: प्रयुक्त:। एवम् ऋकारस्थो भवतु वा केवलो भवतु वा रेफस्य लादेश इत सूत्रार्थ उपपद्यते। कृप् इत्यस्य गुणे कृते वृद्धौ वा कृतायाम् 'उरण्रपर:' इत्यनेन रेफ: प्राप्नोति तस्य लत्वं भवति इति सूत्रस्य प्रथमोऽर्थ:। यदा तु गुणाभावे वृद्ध्यभावे ऋइत्येव वर्ण: तिष्ठति तदा तत्रस्थस्यापि रेफस्य ल:। अत्रापि श्रुतिसामान्यमाश्रित्य वृत्तिकार: सूचयति यत्समग्रस्य ऋकारस्य ऌकारो भवति। अनेन क्ऌप् इति रूपस्य निर्वाह: कृतस्तेन। तदयं वक्ति अनेन लुटि च क्ऌप: इति निर्देशा उपपद्यन्ते।

४. परम्पराया: कृते अयं प्रश्न: नास्ति यत: कृपो रो ल: इति तथा च रप्रत्याहार: इति द्वौ स्वतन्त्रौ विषयौ। तन्मतानुसारेण कृप् इति एक एव धातु, तस्य कल्प् क्ऌप् इति अङ्गरूपाणि, तदर्थं कृपो रो ल:। तथा च आद् गुण:, वृद्धिरेचि, उपसर्गादृति धातौ इत्येतै: सूत्रै: प्राप्यमाणे गुणवृद्धी निर्वोढुं र इति प्रत्याहारोऽपेक्ष्यते।

५. उ: स्थाने अण् प्रसज्यमान एव रपरो वेदतिव्य:। कर्ता, हर्ता, गिरति, द्वैमातुर:। अत्र लपराणि उदाहरणानि न सन्ति इति विशेषतो ध्येयम्।

६. स्वीकृते एव सावर्ण्ये उ: ऋकारऌकारया: कृते भवति। ततश्च लपरत्वस्य आवश्यकता समुदेति। तच्चान्द्रे सूत्रितं ऋकोऽणोरलौ इति।

७. एकस्मान्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमा स्यु:।
ज्ञेयौ चयौ चतुर्भ्यो र: पञ्चभ्य: शलौ षड्भ्य:।

८. ब्रुवो वचि: २.४.५३ ब्रुवो वचिरादेशो भवत्यार्धधातुक विषये।

९. अस्तेर्भू: २.४.५३ अस्तेर्भूरित्ययमादेशो भवति आर्धधातुके। इत्यादि

१०. "परे त्वस्यानुनासिकत्वे अतो लान्तस्य इति सूत्रे पाणिनिर्लकारं नोच्चारयेत् प्रत्याहारेणैव निर्वाहात्। किञ्च अस्येत्संज्ञकत्वे बहुषु यणपदघटितसूत्रेष्वर्द्ध-मात्रालाघवानुरोधेन यत्प्रत्याहारेणैव व्यवहरेत्।। पृ.२८

महामहोपाध्यायनागेशभट्टविरचित: लघुशब्देन्दुशेखर: व्याख्याकार: आचार्य–ब्रह्मदत्त द्विवेदी, सुशील प्रकाशन, मुरारका संस्कृत कॉलेज चौक, पटना।

११. १/३/२ उपदेशेऽनुनासिकोऽजित्संज्ञ: स्यात्।

१२. १/३/३ उपदेशेऽन्त्यं हल् इत् स्यात्।

१३. १/१/७१ अन्त्येनेता सहित: आदि: मध्यगानां स्वस्य च संज्ञा स्यात्।

१४. "यदि तर्हि ऋकारग्रहणेन लृकारग्रहणं संनिहितं भवति, उरण्रपर: लृकारस्यापि लपरत्वं प्राप्नोति। लृकारस्य लपरत्वं वक्ष्यामि। तच्चावशं वक्तव्यम्। असत्यां सवर्णसंज्ञायां विध्यर्थम्। तदेव सत्यां रेफबाधनार्थम् भविष्यति।" तुल्यास्येति सूत्रभाष्ये।

१५. "र" ल इति श्रुतिसामान्यत्वेन स्वीकृत्य सर्वैरयमर्थो ज्ञात:।

१६. रप्रत्याहरं स्वीकुर्वाण: काशिकाकार: (तथापि न परिगणित:), तस्य न्यास–पदमञ्जरीकारौ व्याख्यातारौ, भट्टोजिदीक्षित: तस्य बालमनोरमातत्त्वबोधिनीकारौ व्याख्याकारौ, शब्दकौस्तुभकार:, कैयट: च रप्रत्याहारं तिरस्कुर्वाणा: पतञ्जलि:, नागेश:, वैद्यनाथपायगुण्डे च ऋलृवर्णयो: सावर्ण्यम् कात्यायनात् प्रभृति वैद्यनाथपायगुण्डे यावत् सर्वैर्मतम्। तथापि ऋलृवर्णयो: सावर्ण्यं सूत्रकारस्य तु नाभिमतमिति कैयट:। कृपो रो ल:। ऋकारस्य लृकार:, रेफस्य च लकार इत्यर्थ: सर्वैरादृत:।

१७. ऋग्वेदप्रातिशाख्यम् १.४१ ऋकारलकारावथ षष्ठ उष्मा जिह्वामूलीया: प्रथमश्च वर्ग:।

१८. तैत्तिरीयप्रातिशाख्यम् २.१८ उपसंहततरे च जिहवाग्रमृकार–ऋकार–लृकारेषु वर्स्वेषु उपसंहरति।

१९. अथर्वप्रातिशाख्ये साक्षान्निर्देशो न लब्ध: तथापि तस्य व्याख्याकारो वक्ति – जिह्वामूलीयम् ऋवर्णस्य कवर्गस्य च भाष्यते यच्चैव जिह्वामूलीय: लृवर्णश्चेत् स्मृत:।

२०. ऋ लौ जिह्वामूले। वाजसनेयीप्रातिशाख्ये १.६५, लृलसिता दन्ते। तत्रैव १.६९।

२१. तत्सादृश्यं तदभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्था: षट् प्रकीर्तिता:।।

२२. ७.२.४४ स्वरतिसूतिसूयतिधूञूदितो वा। इत्यत्र ऊदितां कृते इट् विकल्पितः।
कृपू च ऊदित परिगणितः।

२३. द्रष्टव्यम्–"युभातः संस्कृतं प्रति" लेखकः– डॉ गजानन बालकृष्ण पलसुले
प्रकाशन– राष्ट्रिय संस्कृत संस्थान १९७९ पृ. २२, ४६।

२४. बाजसनेयी प्रातिशाख्यम् ऋलृवर्णे रेफलकारौ संश्लिष्टावश्रुतिधरावेकवर्णौ।

२५. तदर्थम् द्रष्टव्यम्– The Sanskrit Dhatupāṭhas : A Critical Study'
लेखकः डॉ.ग.बा. पलसुले University of Poona. 1961 P. 163.

२६. तत्रैव पृ. १६८।

२७. वाजसनेयीप्रातिशाख्यम् १.८७ स्वरांश्च लृकारवर्जम्। अस्मिन् सूत्रे पूर्वसूत्रात्
पदान्तीयः इति अनुवर्तते।
अथर्वप्रातिशाख्यम् १.५ अनृकारः स्वरः पद्यः।

२८. ऋलृक्। माहेश्वरसूत्रम् २ इत्यत्र लृकारग्रहणस्य प्रयोजनम् काशिकाकारेण
इत्थं प्रतिपादितम्– लत्वविधानाद् यानि पराण्यच्–कार्याणि तानि लृकारे यथा
स्युः। कानि पुनस्तानि "प्लुतः स्वरितो द्विर्वचनम्" इति।

पाणिनीयव्याकरणे धातुभ्यो विहितानां प्रत्ययानां तदाश्रितानामङ्गानां च विज्ञानम्

दीक्षितपुष्पा

अष्टाध्याय्याः तृतीय–चतुर्थ–पञ्चमाध्यायाः प्रत्ययाध्यायाः सन्ति। एषु त्रिष्वेवाध्यायेषु प्रत्ययानां विधानमस्ति। ते च प्रत्यया द्विविधाः। धातुभ्यो विहिताः, प्रातिपदिकेभ्यो विहिताश्च। प्रातिपदिकेभ्यो विहिताः प्रत्ययास्त्रिविधाः। स्त्रीप्रत्ययाः, सुप्प्रत्ययाः, तद्धितप्रत्ययाश्च। एते सर्वे प्रत्यया अष्टाध्याय्याश्चतुर्थे पञ्चमे चाध्याये वर्तन्ते।

धातुभ्यो विहिताः प्रत्ययाः पुनश्चतुर्धा। तिङ्प्रत्ययाः, कृत्प्रत्ययाः, विकरण–प्रत्ययाः, धातुप्रत्ययाश्च। एते सर्वे प्रत्यया अष्टाध्याय्यास्तृतीयाध्याये वर्तन्ते।

अत्र तृतीयाध्यायस्य प्रत्यया एव सम्यग् विभज्य व्याख्यायन्ते।

धातुभ्यो विहिताः तृतीयाध्यायस्य प्रत्ययाः तिङ्प्रत्ययाः कृत्प्रत्ययाः विकरण–प्रत्ययाः धातुप्रत्ययाश्च सन्ति।

अष्टाध्याय्यास्तृतीयाध्याये द्वौ धात्वधिकारौ स्तः। तत्र प्रथमः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' (पा. ३.१.२२) इत्यस्मात्सूत्रादारभ्य, (पा. ३.१.९०), इति सूत्रं यावत् प्रवर्तते। अस्मिन् धात्वधिकारे केवलं धातुप्रत्यया, विकरणप्रत्ययाश्च सन्ति।

द्वितीयो धात्वधिकारः 'धातोः' (पा. ३.१.९०) इत्यस्मात्सूत्रादारभ्य, (पा. ३.४.११७), इति सूत्रं यावत् प्रवर्तते। अस्मिन्नधिकारे तिङ्प्रत्ययाः कृत्प्रत्ययाश्च सन्ति। तत्रायं विवेकः –

धातुप्रत्ययाः – अष्टाध्याय्यां 'प्रत्ययः' (पा.३.१.१) इत्यस्मात्सूत्रादारभ्य, (पा.३.१.३२), इति सूत्रं यावद् धातुप्रत्ययाः सन्ति।

इमे द्विविधाः। आर्धधातुकाः / सार्वधातुकार्धधातुकभ्यां भिन्नाः।

विकरणप्रत्ययाः – अष्टाध्याय्यां 'स्यतासी लृलुटोः' (पा. ३.१.३३) इत्यस्मात्सूत्रादारभ्य, (पा. ३.१.९०), इति सूत्रं यावद् विकरणप्रत्ययाः सन्ति।

इमे द्विविधाः। सार्वधातुकसंज्ञका, आर्धधातुकसंज्ञकाश्च।

कृत्प्रत्ययाः – अष्टाध्याय्या द्वितीयो धात्वधिकारः 'धातोः' (पा. ३.१.९०) इत्यस्मात्सूत्रादारभ्य, (पा. ३.४.११७), इति सूत्रं यावत् प्रवर्तते। अस्मिन् द्वितीये धात्वधिकारे ये लकारप्रत्यया, लस्थानीयास्तिङ्प्रत्ययाश्च सन्ति, तान् प्रत्ययान् विहाय येऽवशिष्टाः प्रत्ययाः सन्ति, तेषामेव प्रत्ययानां 'कृदतिङ्' इत्यनेन सूत्रेण कृत् संज्ञा भवति। इमेऽपि द्विविधाः। सार्वधातुकसंज्ञका, आर्ध धातुकसंज्ञकाश्च।

'धातोः' (पा.३.१.९१) इत्यस्मात्सूत्रादारभ्य, (पा.३.४.७६), इति सूत्रं यावत् कृत्प्रत्यया लकारप्रत्ययाश्च सन्ति।

अत्रायं विवेकः कर्तव्यः – 'धातोः' (पा.३.१.९१) इत्यस्मात्सूत्रादारभ्य, (पा.३.४.७६), इति सूत्रं यावत् कृत्प्रत्यया लकारप्रत्ययाश्च वर्तन्ते। तत्र लकारप्रत्ययानां स्थाने तिङादेशा भवन्ति। अतस्तान् लकारप्रत्ययान् वर्जयित्वा ये प्रत्यया अत्रावशिष्यन्ते, तेषामेव 'कृदतिङ्' (पा.३.१.९३) इत्यनेन सूत्रेण कृत्संज्ञा भवति। कृत्प्रत्ययेषु यत्, ण्यत्, क्यप्, तव्यत्, तव्य, अनीयर्, इत्येतेषां प्रत्ययानां कृत्यसंज्ञापि भवति।

तिङ्प्रत्ययाः – अष्टाध्याय्यास्तृतीयाध्यायस्य चतुर्थपादान्ते 'लस्य' (पा.३.४.७७) इति सूत्रादारभ्य (पा. ३.४.११७) इति सूत्रं यावदापादान्तं लाधिकारो वर्तते। अत्र ये सन्ति प्रत्ययास्ते तु लकाराणां स्थाने भवन्ति। यद्यपि लकारा दश सन्ति किन्तु लिङो द्वैविध्येन, लेटश्च द्वैविध्येन ते द्वादशविधा भवन्ति। अस्मिन्नधिकारे प्रथमतः दशानां लकाराणां स्थानेषु 'लस्य'(पा.३.४.७७) इत्युक्त्वा 'तिप्–तस्–झि–सिप्–थस्–थ–मिब्वस्–मस्–तातां–झ–थासा–थां–ध्वमिड्–वहि–महिङ्' (पा.३.४.७८) इत्येते अष्टादशतिङ्प्रत्ययाः विधीयन्ते –

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	तिप्	तस्	झि
म. पु.	सिप्	थस्	थ
उ. पु.	मिप्	वस्	मस्

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	त	आताम्	झ
म. पु.	थास्	आथाम्	ध्वम्
उ. पु.	इड्	वहि	महिङ्

एतेषां लादेशानां तिङ्प्रत्ययानां स्थाने पुनर्ये आदेशा भवन्ति, तेऽप्यस्मिन्नेव लाधिकारे वर्तन्ते।

यथा – थासः से, (पा.३.४.८०) एरुः, (पा.३.४.८६) आमेतः, (पा.३.४.९०) मेर्निः, (पा.३.४.८९) तस्थस्थमिपां तान्तन्तामः, (पा.३.४.१०१) इत्यादयः। एते तिङादेशा अपि तिङ्पदवाच्या एव। अपि च सप्तमाध्यायस्य प्रथमे पादेऽपि तिङादेशाः सन्ति। परन्तु तेऽङ्गमुद्दिश्य विहिताः। इत्थञ्चाष्टादशतिङ्प्रत्ययाः यदा अङ्गमनुद्दिश्य आदेशं प्राप्नुवन्ति तदा लाधिकारस्थैः सूत्रैरादेशा भवन्ति। यदा तिङ्प्रत्यया अङ्गमुद्दिश्य आदेशं प्राप्नुवन्ति तदा सप्तमाध्यायस्य प्रथमपादस्थैः सूत्रैरादेशा भवन्ति। इत्थञ्चाष्टादश–तिङ्प्रत्यया एव नानालकारेषु नानाकारा भवन्ति।

इमेऽपि द्विविधाः। सार्वधातुकसंज्ञका, आर्धधातुकसंज्ञकाश्च।

यद्यपि लिङो द्विविधत्वाल्लेटश्च द्विविधत्वाल्लकारा द्वादश, तेषां सर्वेषां स्थानेष्वेवैत अष्टादश तिङ्प्रत्यया भवन्ति, अतः 'तिङ्शित्सार्व धातुकम्'(पा.३.४.११३) इत्यनेन सूत्रेण सर्वेषां लादेशानां तिङ्प्रत्ययानां सार्वधातुकसंज्ञैव भवितुमुचिता; तथापि लट्, लोट्, लङ्, विधिलिङ्, इत्येतेषां चतूर्णां लकाराणामादेशभूतास्तिङ्प्रत्यया एव सार्वधातुकत्वेनावसीयन्त इति वक्ष्यते। लेटः स्थाने यदा 'लेटोऽडाटौ' (पा.३.४.९४) इत्यनेन सूत्रेणाडाटौ भवतस्तदापि लेडादेशास्तिङ्प्रत्यया सार्वधातुका एव। इत्थञ्च पञ्चसु लकारेष्वेव ते तिङ्प्रत्ययाः सार्वधातुका भवन्ति। अवशिष्टेषु सप्तसु लकारेषु तेषामार्धधातुकत्वमेवेत्यग्रे वक्ष्यते। इदानीं धातुभ्यो विहिताः सर्वे प्रत्ययाः पृथक्कृत्वा उच्यन्ते, येन तेषां सार्वधातुकत्वमार्धधातुकत्वं वावगम्येत।

सार्वधातुकखण्डम्

सार्वधातुकतिङ्प्रत्यया:

यदाप्यङ्गमदन्तं भवति, तदा लट्–लोट्–लङ्–विधिलिङ्–लकाराणां कृते इम प्रत्यया भवन्ति।

(भ्वादि–दिवादि–तुदादि–चुरादिगणस्था धातवो यदा स्वस्वविकरणै: संयुज्यन्ते, तदाङ्गमदन्तम् एव भवतीति तेषां लट्–लोट्–लङ्–विधिलिङ्–लकाराणां रूपाणि कर्तुमिमे प्रत्यया: संयोज्या:) अत एते प्रथमगणसमूहस्य प्रत्यया: सन्ति

लट् लकारस्य प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ति	त:	अन्ति
म. पु.	सि	थ:	थ
उ. पु.	मि	व:	म:

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ते	इते	अन्ते
म. पु.	से	इथे	ध्वे
उ. पु.	ए	वहे	महे

लोट् लकारस्य प्रत्यया:

परस्मैपद

प्र. पु.	तु, तात्	ताम्	अन्तु
म. पु.	० तात्	तम्	त
उ. पु.	आनि	आव	आम

आत्मनेपद

प्र. पु.	ताम्	इताम्	अन्ताम्
म. पु.	स्व	इथाम्	ध्वम्
उ. पु.	ऐ	आवहै	आमहै

लङ् लकारस्य प्रत्ययाः

परस्मैपद

प्र. पु.	त्	ताम्	अन्
म. पु.	स् (:)	तम्	त
उ. पु.	अम्	व	म

आत्मनेपद

प्र. पु.	त	इताम्	अन्त
म. पु.	थाः	इथाम्	ध्वम्
उ. पु.	इ	वहि	महि

विधिलिङ् लकारस्य प्रत्ययाः

परस्मैपद

प्र.पु.	इत्	इताम्	इयुः
म.पु.	इः	इतम्	इत
उ.पु.	इयम्	इव	इम

आत्मनेपद

प्र.पु.	ईत	ईयाताम्	ईरन्
म.पु.	ईथाः	ईयाथाम्	ईध्वम्
उ.पु.	ईय	ईवहि	ईमहि

यदाप्यङ्गमनदन्तं भवति, तदा लट्–लोट्–लङ्–विधिलिङ्–लकाराणां कृते इमे प्रत्ययाः भवन्ति

(अदादि–जुहोत्यादि–स्वादि–रुधादि–तनादि–क्र्यादि–गणस्था धातवो यदा स्वस्वविकरणैः संयुज्यन्ते, तदाङ्गमनदन्त एव भवतीति तेषां लट्–लोट्–लङ्–विधिलिङ्–लकाराणां रूपाणि कर्तुमिमे प्रत्ययाः संयोज्याः)

अत एते द्वितीयगण समूहस्य प्रत्ययाः सन्ति

लट् लकारस्य प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	*ति*	त:	अन्ति
म. पु.	*सि*	थ:	थ
उ. पु.	*मि*	व:	म:

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ते	आते	अते
म. पु.	से	आथे	ध्वे
उ. पु.	ए	वहे	महे

लोट् लकारस्य प्रत्यया:

परस्मैपद

प्र. पु.	तु / तात्	ताम्	अन्तु
म. पु.	हि / तात्	तम्	त
उ. पु	*आनि*	*आव*	*आम*

आत्मनेपद

प्र.पु.	ताम्	आताम्	अताम्
म.पु.	स्व	आथाम्	ध्वम्
उ.पु.	*ऐ*	*आवहै*	*आमहै*

लङ् लकार

परस्मैपद

प्र. पु.	*त्*	ताम्	अन्
म. पु.	*स् (:)*	तम्	त
उ. पु.	*अम्*	व	म

आत्मनेपद

प्र. पु.	*त*	आताम्	अत
म. पु.	*था:*	आथाम्	ध्वम्
उ. पु.	*इ*	वहि	महि

विधिलिङ् लकारस्य प्रत्यया:

परस्मैपद

प्र. पु.	यात्	याताम्	यु:
म. पु.	या:	यातम्	यात
उ. पु.	याम्	याव	याम

आत्मनेपद

प्र. पु.	ईत	ईयाताम्	ईरन्
म. पु.	ईथा:	ईयाथाम्	ईध्वम्
उ. पु.	ईय	ईवहि	ईमहि

एतेषु सार्वधातुकप्रत्ययेषु ये प्रत्यया: स्थूलाक्षरा: वक्राश्च दृश्यन्ते, ते पित्सार्वधातुका:। ये च सामान्याक्षरा: समाश्च दृश्यन्ते, तेऽपित्सार्वधातुका:। एतेऽपित्सार्वधातुकप्रत्यया: 'सार्वधातुकमपित्' (पा.१.२.४) इत्यनेन सूत्रेण ङिद्वद् भवन्ति।

लेट्लकारस्य प्रत्यया:

लट्–लकारस्य ये प्रत्यया: सन्ति, तत्र लेटोऽडाटौ (पा.३.४.९४) इत्यनेन सूत्रेण अडागम:, आडागमो वा क्रियताम्। इतश्च लोप: परस्मैपदेषु (पा.३.४.९७) इत्यनेन सूत्रेण परस्मैपदे इकारलोप: क्रियताम्। आत्मनेपदे आताम्, आथाम्, इत्यनयो: आकारस्य स्थाने 'आत ऐ' (पा.३.४.९५) इत्यनेन सूत्रेण ऐकार: क्रियताम्। आताम्, आथाम्, इति प्रत्ययद्वयं वर्जयित्वा अन्येषां प्रत्ययानामेकारस्य स्थाने, वैतोऽन्यत्र (पा.३.४.९६) इत्यनेन सूत्रेण ऐकारादेशो वा क्रियताम्।

अडागमे कृते लेट्–लकारस्य सार्वधातुक प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	अति	अतः	अन्ति
	अत् / अद्	—	अन्
म. पु.	असि	अथः	अथ
	अः	—	—
उ. पु.	अमि	अवः	अमः
	अम्	अव	अम

आत्मनेपद

एकवचन	द्विवचन	बहुवचन
अते	ऐते	अन्ते
अतै	—	अन्तै
असे	ऐथे	अध्वे
असै	—	अध्वै
ए	अवहे	अमहे
ऐ	अवहै	अमहै

आडागमे कृते लेट्—लकारस्य सार्वधातुक प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	आति	आतः	आन्ति
	आत् / आद्	—	आन्
म. पु.	आसि	आथः	आथ
	आः	—	—
उ. पु.	आमि	आवः	आमः
	आम्	आव	आम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	आते	ऐते	आन्ते
	आतै	—	आन्तै
म. पु.	आसे	ऐथे	आध्वे
	आसै	—	आध्वै
उ. पु.	ए	आवहे	आमहे
	ऐ	आवहै	आमहै

एतेषाम् सर्वेषां प्रत्ययानामादौ यदि 'सिब्बहुलं लेट्' इत्यनेन सूत्रेण सिप् योज्यते, तदा इमे प्रत्यया आर्धधातुका भवन्ति, यथा अग्रे आर्वधातुकखण्डे दर्शयिष्यते।

एते प्रत्ययाः स्थूलाक्षराः वक्राश्च दृश्यन्ते। आडुत्तमस्य पिच्च, (पा ३.४.९२) इत्यस्मात् सूत्रात् पित्पदस्यानुवर्तनादेते लेट्लकारस्येमे सर्व एव प्रत्ययाः पित्सार्व–धातुकाः।

सार्वधातुकृत्प्रत्ययाः

'तिङ्शित्सार्वधातुकम्'(पा.३.४.११३) इत्यनेन सूत्रेण शतृ, शानच्, शानन्, चानश्, खश्, श, एश्, शध्यै, शध्यैन् एते नव प्रत्ययाः कृत्सु सार्वधातुकाः।

सार्वधातुकविकरणप्रत्ययाः

'तिङ्शित्सार्वधातुकम्' (पा.३.४.११३) इत्यनेन सूत्रेण *शप्*, श्यन्, श्नु, श्ना, श्नम्, श्ना, शायच्, शानच्, एतेऽष्टविकरणप्रत्यया शित्वात् सार्वधातुकाः। अत्र शप्प्रत्ययः पित्सार्वधातुकः, अन्ये चापित्सार्वधातुकाः।

किमर्थमियं सार्वधातुकसंज्ञा ?

अस्माभिर्ज्ञातं यल्लट्, लोट्, लङ्, विधिलिङ्, सार्वधातुक–लेट्–लकाराणां तिङ्प्रत्ययाः सार्वधातुकाः सन्ति। शतृ, शानच्, शानन्, चानश्, खश्, श, एश्, शध्यै,

शध्यैन्, एते कृत्प्रत्यया: सार्वधातुका: सन्ति। एतद्भिन्ना धातुभ्यो विहिता: सर्वे प्रत्यया आर्धधातुका एव।

यदा धातुभ्य: सार्वधातुक–तिङ्प्रत्यया:, सार्वधातुक–कृत्प्रत्यया वा भवन्ति, तदा धातो: प्रत्ययस्य च मध्ये तत्तद्गणानां विकरणप्रत्यया अवश्यमेव भवन्ति। यथा – भू + ति, इत्युक्ते 'कर्तरि शप्' (पा.३.१.६८) इति शपि भू + शप् + ति, इति भवति/ नृत् + ति, इत्युक्त 'दिवादिभ्य: श्यन्' (पा.३.१.६९) इति श्यनि नृत् + श्यन् + ति, इति भवति क्री + ति, इत्युक्ते 'क्र्यादिभ्य: श्ना' (पा.३.१.८१) इति श्नाविकरणे क्री + श्ना + ति, इति भवति।

एवमेव कृत्सु क्री + शान:, इत्युक्ते 'क्र्यादिभ्य: श्ना' (पा.३.१.८१) इति श्नाविकरणे क्री + श्ना + शत:, इति भवति। एवमेवान्यत्राप्यूह्यम्।

आर्धधातुकखण्डम्

आर्धधातुकतिङ्प्रत्यया:

यद्यपि 'आर्धधातुकं शेष:' (पा.३.१.११४), इत्यनेन सूत्रेण तिङ्शिद्भिन्नानां सर्वेषां प्रत्ययानामार्धधातुकसंज्ञैव विहिता तथापि तदपवादत्वेन 'लिट् च' (पा.३.४.११५) इत्यनेन सूत्रेण लिडादेशानां तिङामथ च 'लिङाशिषि' (पा.३.४.११६) इत्यनेन सूत्रेण आशीर्लिङादेशानां तिङामार्धधातुकसंज्ञा भवति। तथा च स्य–विकरणस्य संयोगेन लृडादेशा लृङादेशाश्च तिङ्प्रत्यया आर्धातुककार्यं प्राप्नुवन्ति।

तास्–विकरणस्य संयोगेन लुडादेशास्तिङ्प्रत्यया आर्धधातुककार्यं प्राप्नुवन्ति। 'सिब्बहुलं लेटि' (पा.३.१.३४) इति सिब्विकरणस्य संयोगेन लेडादेशास्तिङ्प्रत्यया आर्धधातुककार्यं प्राप्नुवन्ति। सिच्, चङ्, अङ्, क्स इत्यादिविकरणाना सन्नियोगेन लुङादेशास्तिङ्प्रत्यया आर्धधातुककार्यं प्राप्नुवन्ति। इत्थञ्च दश लकारा एव लिङो द्वैविध्येन लेटश्च द्वैविध्येन, द्वादशविधा भवन्ति। तेषु पञ्च सार्वधातुका, सप्त चार्धधातुका:। सार्वधातुका उक्ता, आर्धधातुका उच्यन्ते। लादेशान् विकरणाञ्चाश्रित्यैषां स्वरूपमीदृशं भवति –

लृट्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	स्यति	स्यतः	स्यन्ति
म. पु.	स्यसि	स्यथः	स्यथ
उ. पु.	स्यामि	स्यावः	स्यामः

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	स्यते	स्येते	स्यन्ते
म. पु.	स्यसे	स्येथे	स्यध्वे
उ. पु.	स्ये	स्यावहे	स्यामहे

स्य–विकरणस्य संयोगेनात्र आर्धधातुककार्याणीडागमादीनि भवन्ति।

लृङ्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	स्यत्	स्यताम्	स्यन्
म. पु.	स्यः	स्यतम्	स्यत
उ. पु.	स्यम्	स्याव	स्याम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	स्यत	स्येताम्	स्यन्त
म. पु.	स्यथाः	स्येथाम्	स्यध्वम्
उ. पु.	स्ये	स्यावहि	स्यामहि

अत्रापि स्य–विकरणस्य संयोगेनात्रार्धधातुककार्याणीडागमादीनि भवन्ति।

लुट्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ता	तारौ	तारः
म. पु.	तासि	तास्थः	तास्थ
उ. पु.	तास्मि	तास्वः	तास्मः

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ता	तारौ	तारः
म. पु.	तासे	तासाथे	ताध्वे
उ. पु.	ताहे	तास्वहे	तास्महे

तास्–विकरणस्य संयोगेनात्रार्धधातुककार्याणीडागमादीनि भवन्ति।

आशीर्लिङ्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	यात्	यास्ताम्	यासुः
म. पु.	याः	यास्ताम्	यास्त
उ. पु.	यासम्	यास्व	यास्म

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सीष्ट	सीयास्ताम्	सीरन्
म. पु.	सीष्ठाः	सीयास्थाम्	सीध्वम्
उ. पु.	सीय	सीवहि	सीमहि

'लिङाशिषि (पा.३.४.११६) इत्यनेन सूत्रेणैषामार्धधातुकत्वम्।

लिट्लकारस्य प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	णल् (अ)	अतु:	उ:
म. पु.	थल् (थ)	अथु:	अ
उ. प्र.	णल् (अ)	व	म

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ए	आते	इरे
म. पु.	से	आथे	ध्वे
उ. पु.	ए	वहे	महे

'लिट् च' (पा.३.४.११५) इत्यनेन सूत्रेणैपामार्धधातुकत्वम्।

लुङ्लकारस्य प्रत्यया:

लुङ्लकारस्य प्रत्यया: द्वादशविधा भवन्ति –

१. सिज्लुकि लुङ्लकारस्य प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	त्	ताम्	अन् (उ:)
म. पु.	स् (:)	तम्	त
उ. प्र.	अम्	व	म

आत्मनेपद

आत्मनेपदे सिज्लुङ् न भवति।

२/३४/५ अङि/चङि लुङ्लकारस्य प्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	अत्	अताम्	अन्
म. पु.	अ:	अतम्	अत
उ. प्र.	अम्	आव	आम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	अत	एताम्	अन्त
म. पु.	अथाः	एथाम्	अध्वम्
उ. पु.	ए	आवहि	आमहि

६ / ७. क्से लुङ्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सत्	सताम्	सन्
म. पु.	सः	सतम्	सत
उ. प्र.	सम्	साव	साम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सत	साताम्	सन्त
म. पु.	सथाः	साथाम्	सध्वम्
उ. पु.	सि	सावहि	सामहि

८. धातोः सगागमे कृते, इटि सिचि च लुङ्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सीत्	सिष्टाम्	सिषुः
म. पु.	सीः	सिष्टम्	सिष्ट
उ. प्र.	सिषम्	सिष्व	सिष्म

आत्मनेपद

अत्रात्मनेपदं न भवति।

९ / १०. अनिडादौ सिचि लुङ्लकारस्य प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सीत्	स्ताम्	सुः
म. पु.	सीः	स्तम्	स्त
उ. प्र.	सम्	स्व	स्म

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	स्त	साताम्	सत
म. पु.	स्थाः	साथाम्	ध्वम्
उ. पु.	सि	स्वहि	स्महि

११ / १२. इडादौ सिचि लुङ्लकारस्थ प्रत्ययाः

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	ईत्	इष्टाम्	इषुः
म. पु.	ईः	इष्टम्	इष्ट
उ. प्र.	इषम्	इष्व	इष्म

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र.पु.	इष्ट	इषाताम्	इषत
म.पु.	इष्ठाः	इषाथाम्	इढ्वम्
उ.पु.	इषि	इष्वहि	इष्महि

आर्धधातुक–लेट्–लकार–प्रत्ययाः

सार्वधातुकखण्डे प्रोक्ताः लेट्लकारस्य प्रत्ययाः सिब्बहुलं लेटि इति सिब्योगेना– र्धधातुकत्वं भजन्ते –

अटा सिपा च युक्ता लेट्लकारस्यार्धधातुकप्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	सति	सत:	सन्ति
	सत्/सद्	—	सन्
म. पु.	ससि	सथ:	सथ
	स:	—	—
उ. पु.	समि	सव:	सम:
	सम्	सव	सम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र.पु.	सते	सैते	सन्ते
	सतै	—	सन्तै
म.पु.	ससे	सैथे	सध्वे
	ससै	—	सध्वै
उ.पु.	से	सवहे	समहे
	सै	सवहै	समहै

आटा सिपा च युक्ता लेट्लकारस्यार्धधातुकप्रत्यया:

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्र. पु.	साति	सात:	सान्ति
	सात्/साद्	—	सान्
म. पु.	सासि	साथ:	साथ
	सा:	—	—
उ. पु.	सामि	साव:	साम:
	साम्	साव	साव

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्र.पु.	साते	सैते	सान्ते
	सातै	–	सान्तै
म.पु.	सासे	सैथे	साध्वे
	सासै	–	साध्वै
उ.पु.	से	सावहे	सामहे
	सैं	सावहैं	सामहैं

आर्धधातुक–कृत्प्रत्ययाः

पूर्वोक्तान् नव सार्वधातुककृत्प्रत्ययान् विहायावशिष्टाः कृत्प्रत्यया आर्धधातुकाः। त इत्थम् –

ञित्–णित्–कृत्प्रत्ययाः– ण्वुल् वुञ् ण्यत्

घञ्	णिनि	ण	ण्युट्	अण्
खुकञ्	ण्वि	ञ्युट्	ण्विन्	घिनुण्
उकञ्	उण्	णच्	इनुण्	इञ्
ण्वुच्	णमुल्	खमुञ्।		

कित्–ङित्–कृत्प्रत्ययाः –क्यप् क टक्

क्विन्	कञ्	क्विप्	कप्	क्वनिप्
क्त	क्तवतु	ङ्वनिप्	कानच्	
क्वसु	क्स्नु	क्नु	क्मरच्	कुरच्
क्वरप्	किन्	कि	नजिङ्	कुक्
क्रि	नङ्	क्निन्	अङ्	कितच्
क्से	कसेन्	कध्यै	कध्यैन्	तवेङ्
कमुल्	कसुन्	केन्	केन्य	क्त्वा

कित्–ङित्–ञित्णिद्भिन्नकृत्प्रत्ययाः – तव्य तव्यत्

अनीयर्	यत्	तृच्	ल्यु	अच्
ष्वुन्	थकन्	वुन्	ट	इन्
खच्	ड	खिष्णुच्	विट्	विन्

मनिन्	वनिप्	इनि	ख्युन्	तश्न्
इष्णुच्	युच्	पाकन्	आलुच्	[illegible]
घुरच्	उ	ऊक्	र	आरु
लुकन्	वरच्	डु	ष्ट्रन्	इत्र
तुमुन्	अप्	अथुच्	नन्	अ
अनि	ल्युट्	घ	खल्	से
सेन्	असे	असेन्	अध्यै	अध्यैन्
तवै	तवेन्	तोसुन्	त्वन्	अतन् = [illegible]

आर्धधातुकविकरणप्रत्यया:

यद्यपि क्स, चङ्, अङ्, सिप्, स्य, तास्, च्लि, सिच्, च्णि, उ, यक् इत्येकादश विकरणप्रत्यया: सन्ति, किन्तु एषु नवानां संयोगेनार्धधातुकलकाराणां प्रत्यया निर्मिता:। अत: तनादिगणस्य विकरण: 'उ' तथा भावकर्मविकरण: 'यक्' इति द्वावेवार्धधातुकविकरणौ ज्ञेयौ।

धातुप्रत्यया:

अष्टाध्याय्यां 'प्रत्यय:' ३.१.१ इत्यस्मात्सूत्रादारभ्य, ३.१.३२, इति सूत्रं यावद् द्वादश धातुप्रत्यया: सन्ति। सन्, क्यच् ,काम्यच्, क्यष्, क्यङ्, क्विप्, णिच्, णिङ्, ईयङ्, यक्, यङ्, आय, इत्येते द्वादशप्रत्यया: येन सह युज्यन्ते तस्य 'सनाद्यन्ता धातव:' (पा.३.१.३२) इत्यनेन सूत्रेण धातुसंज्ञा भवति। एषां योगेन नवीनो धातुर्जायते, इत्येते धातुनिर्मापका: प्रत्यया धातुप्रत्यया इत्युच्यन्ते।

अत्रावधेयम् – अष्टाध्याय्यास्तृतीयाध्यायस्थेषु सूत्रेषु 'धातो:' (पा.३.१.९१) इत्युक्त्वैव ये प्रत्यया धातुभ्यो विहिता: सन्ति, तेषामेव सार्वधातुकसंज्ञार्धधातुकसंज्ञा वा भवति। परन्त्वस्मिन् येऽपि प्रत्यया विहितास्ते क्वचिद् धातुभ्यो भवन्ति, क्वचिच्च प्रातिपदिकेभ्य: क्वचिच्च सुबन्तेभ्यो भवन्ति। सार्वधातुकसंज्ञार्धधातुकसंज्ञा च धातुभ्यो विहितानामेव प्रत्ययानां भवतो, नान्येषाम्। ये प्रत्यया: प्रातिपदिकेभ्यो विहितास्तेषामुभयसंज्ञे न भवत:।

अतोऽस्मिन् प्रकरणे काम्यच्, क्यच, क्यष्, क्यङ् इत्येतेषु प्रत्ययेषु सुबन्तेभ्यो विहितत्वादार्धधातुकत्वाभावः।

अस्य प्रकरणस्यावशिष्टाः प्रत्यया अपि सम्यग् विचारणीयाः।

१. 'गुप्तिज्किद्भ्यः सन्' (३.१.४) 'मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य' (३.१.५) इत्येताभ्यां सूत्राभ्यां यः सन्प्रत्ययो विहितः, स तु 'धातोः' इत्युक्त्वा धातुभ्यो न विहितः। अतस्तस्य सन्प्रत्ययस्यार्धधातुकसंज्ञा न भवति। अत एव गुप्तिज्किद्भ्यः सनि जुगुप्सते, तितिक्षते, चिकित्सति, इत्यत्र सन आर्धधातुकत्वाभावादिण् न भवति। आर्धधातुकत्वाभावस्तु सनो धातोरित्यविधानात्।

किन्तु 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' (३.१.७) इति सूत्रेण विहितस्य सन्प्रत्ययार्धधातुकत्वं निर्बाधं, यतोऽयं 'धातोः' इत्युक्त्वा धातुभ्यो विधीयते।

२. 'पुच्छभाण्डचीवराण्णिङ्' (३.१.२०) इत्यनेन सूत्रेण प्रातिपदिकेभ्यो विहिते णिङ्प्रत्यये आर्धधातुकत्वाभावः। अतो 'णाविष्ठवत्कार्यं प्रातिपदिकस्य' इतीष्ठवद्भावाद् भसंज्ञाया 'टे'रित्यनेन सूत्रेण टिलोपः।

किन्तु 'कर्मणिङ्' (३.१.३०) इत्यनेन सूत्रेण विहिते णिङ्प्रत्यये 'धातो'रित्युक्त्वा धातोर्विहितत्वादार्धधातुकत्वमस्त्येव।

३. अष्टाध्यायास्तृतीयाध्याये 'आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः' तथा 'सर्वप्रातिपदिकेभ्य इत्येके' इति (३.१.११) सूत्रस्थैर्वार्तिकैर्यः क्विप्प्रत्ययो विहित-स्तस्याप्यधातुभ्यो विहितत्वादार्धधातुकत्वाभावः।

किन्तु 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्' (३.२.६१) इति सूत्रेण तथा च 'क्विप् च' (३.२.७६) इति धातुभ्यो सूत्रेण विहितस्य क्विप्प्रत्ययस्य 'धातो'रित्युक्त्वा धातोर्विहितत्वादार्धधातुकत्वमस्त्येव।

४. 'मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्' (३.१.२१) इति सूत्रेण यो णिज्प्रत्ययो विहितस्तस्याप्यधातुभ्यो विहितत्वादार्धधातुकत्वाभावः।

'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' (पा.३.१.२५) इति सूत्रेण यदा सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण, इत्येतैः प्रातिपदिकैर्णिज् विधीयते, तदा तस्याधातुभ्यो विहितत्वादार्धधातुकत्वाभावः।

तथा च 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च' 'तत्करोति तदाचष्टे' इति गणसूत्रैर्यो णिज्प्रत्ययो विधीयते तस्याप्यधातुभ्यो विहितत्वादार्धधातुकत्वाभावः।

किन्तु 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्'
(पा.३.१.२५) इत्यनेनैव सूत्रेण यदा चुरादिगणस्थैर्धातुभ्यो णिज् विधीयतेऽथ च 'हेतुमति
च' (३.१.२६) इति सूत्रेण धातुभ्यो णिज् विधीयते तदा तस्य 'धातो'रित्युक्त्वा
धातोर्विहितत्वात्तस्यार्धधातुकत्वमस्त्येव।

५. अष्टाध्यायास्तृतीयाध्याये 'कण्ड्वादिभ्यो यक्' (३.१.२७) इति सूत्रेण
कण्ड्वादिभ्यो यग्विधीयते। कण्ड्वादयो द्विविधाः। धातवः, प्रातिपदिकानि च। अ
धात्वधिकारत्वात् कस्य चासञ्जनाद् धातुभ्य एव यग्विधानम्।

धातुप्रकरणाद् धातुः कस्य चासञ्जनादपि।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः॥

धातुभ्य एव विहितत्वात् तस्यार्धधातुकत्वमत एव 'मगध + यक् = मगध्यति'
इत्यत्रार्धधातुकाकारस्थेन 'अतो लोपः (पा.६.४.४८) इत्यनेन सूत्रेणातो लोपो भवति।
कण्डूरित्यादीनां दीर्घोच्चारणसामर्थ्यात् प्रातिपदिकत्वमप्येतेषामित्येकान्तः पक्षः।

यक्, यङ्, आय, इत्येते त्रयः प्रत्ययाः धातोरित्युक्त्वा केवलं धातुभ्यो
विहितत्वादशित्त्वाच्चार्धधातुकाः।

इत्थञ्चाष्टाध्यायास्तृतीयाध्याये सन्, णिङ्, णिच्, क्विप्, यक्, एते प
प्रत्यया यदा 'धातो'रित्युक्त्वा धातोर्विधीयन्ते, तदा तेषामार्धधातुकत्वमस्त्येव। अधातुभ्यो
विहिते तत्रैवार्धधातुकत्वाभावः।

किमर्थमियमार्धधातुकसंज्ञा ?

अस्माभिर्ज्ञातं यल्लट्, लोट्, लङ्, विधिलिङ्, सार्वधातुकलेट्लकारा
तिङ्प्रत्ययान् विहाय, शतृ, शानच्, शानन्, चानश्, खश्, श, एश्, शध्यै, शध्यै
इत्येतान् कृत्प्रत्ययान् विहाय, शप्, श्यन्, श्नु, श, श्नम्, श्ना, शायच्, शान
इत्येतान् विकरणप्रत्ययान् च विहाय, धातोरित्यनूद्य धातुभ्यो विहिताः सर्वे प्रत्य
आर्धधातुकाः सन्ति।

यदा धातुभ्य आर्धधातुकतिङ्प्रत्ययाः, आर्धधातुककृत्प्रत्यया वा भवन्ति,
धातोः प्रत्ययस्य च मध्ये तत्तद्गणानां विकरणप्रत्यया नैव भवन्तीति बोध्यम्। परन्त्वा
र्धधातुकप्रत्यये सतीडागमस्य विचारो भवति।

यथा – भू + तव्य, इत्युक्ते 'आर्धधातुकस्येड् वलादेः' (पा.७.२.३५) इति इटि, भू + इट् + तव्य, इति भवति। एवमेवान्यत्राप्यूह्यम्।

अनुबन्धानाश्रित्यैषां प्रत्ययानां विभागः

एतेषु प्रत्ययेष्वनुबन्धा आसञ्जिताः सन्ति, यैः प्रत्ययानां कित्वमकित्वं वा निर्णीयते। परन्तु केवलं प्रत्ययस्थाननुबन्धान् दृष्ट्वैव प्रत्ययस्य कित्वमकित्वं, ङित्वमङित्वं, णित्वमणित्वं वा निर्णेतुं न शक्यते। यतोऽतिदेशसूत्रैरनेकधा कित्वेऽकित्वं, अकित्वे च कित्वमतिदिश्यते। यथा किदपि क्त्वाप्रत्ययः 'न क्त्वा सेट्' (पा.१.२.१८) इत्यनेन सूत्रेणाकिद् विधीयते। अकिदपि सन्प्रत्ययः 'इको झल्' (पा.१.२.९) 'हलन्ताच्च' (पा.३.१.२.१०) इत्यादिभिः सूत्रैः किद् विधीयते। एवं चान्येऽपि। सिप्प्रत्ययो णिन्नास्ति, किन्तु 'सिब्बहुलं णिद् वक्तव्य' इति वार्तिकेन तत्र वा णित्वमतिदिश्यते। अपित्सार्व-धातुकप्रत्यया ङिद्वद् भवन्ति। एतदर्थं अष्टाध्याय्या अतिदेशप्रकरणस्य सूत्राण्यन्ये च सिब्बहुलं णिद् वक्तव्य, इत्यादीनि वार्तिकानि चाहत्य पुरतः स्थापयितव्यानि। तानीत्थम्–

१. गाङ्कुटादिभ्योऽञ्णिन्ङित् (पा.१.२.१) –गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः।

२. विज इट् (पा.१.२.३)– विजेः पर इडादिः प्रत्ययो ङिद्वत्स्यात्।

३. विभाषोर्णोः (पा.१.२.३)– इडादिप्रत्ययो वा ङिद्वत्स्यात्।

४. सार्वधातुकमपित् (पा.१.२.४)– अपित्सार्वधातुकं ङिद्वत्स्यात्।

(इति ङित्वातिदेशः) अथ कित्वातिदेशः

५. असंयोगाल्लिट् कित् (पा.१.२.५)– असंयोगात्परोऽपिल्लिट् किद्वत्स्यात्।

६. ईन्धिभवतिभ्यां च (पा.१.२.६)– आभ्यां परो लिट् किद्वत्स्यात्।

७. मृडमृदगुधकुशक्लिशवदवसः क्त्वा (पा.१.२.७)– एभ्यः सेट् क्त्वा किद्वत्स्यात्।

८. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च (पा.१.२.८)– एभ्यः संश्च क्त्वा च कितौ स्तः।

९. इको झल् (पा.१.२.९)– इगन्ताज्झलादिः सन्कित्स्यात्।

१०. हलन्ताच्च (पा.१.२.१०)– इक्समीपाद्धलः परो झलादिः सन्कित्स्यात्।

११. लिङ्सिचावात्मनेपदेषु (पा.१.२.११)– इक्समीपाद्धलः परौ झलादिलिङात्मने-पदपरः सिच्चेत्येतौ कितौ स्तः।

१२.उश्च (पा.१.२.१२) – ऋवर्णात्परो झलादी लिङ् तङ्पर: सिच्चेत्येतौ कितौ स्त:।

१३.वा गम: (पा.१.२.१३)– गम: परौ झलादी लिङ् सिचौ वा कितौ स्त:

१४. हन: सिच् (पा.१.२.१४) – कित्स्यात्।

१५. यमो गन्धने (पा.१.२.१५)– सिच्कित्स्यात्।

१६. विभाषोपयमने (पा.१.२.१६)– यम: सिच्किद्वा स्याद्विवाहे।

१७. स्थाघ्वोरिच्च (पा.१.२.१७)– अनयोरिदादेश: स्यात् सिच्च कित्स्यात्।

१८. न क्त्वा सेट् (पा.१.२.१८)– सेट् क्त्वा किन्न स्यात्।

१९. निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृष: (पा.१.२.१९) – एभ्य: सेण्निष्ठा किन्न स्यात्।

२०. मृषस्तितिक्षायाम् (पा.१.२.२०)– सेण्निष्ठा किन्न स्यात्।

२१. उदुपधाद् भावादिकर्मणोरन्यतरस्याम् (पा.१.२.२१)–उदुपधात्परा भावादिकर्मणो सेण्निष्ठा वा किन्न स्यात्।

२२. पूङ: क्त्वा च (पा.१.२.२२)– पूङ: क्त्वा निष्ठा च सेट् किन्न स्यात्

२३. नोपधात्थफान्ताद्वा (पा.१.२.२३)– सेट् क्त्वा किद्वत्स्याद् वा।

२४. वञ्चिलुञ्च्यृतश्च (पा.१.२.२४)– सेट् क्त्वा किद्वत्स्यादवा।

२५. तृषिमृषिकृशे: काश्यपस्य (पा.१.२.२५)– एभ्य: सेट् क्त्वा किद्वत्स्याद् वा।

२६. रलो व्युपधाद्धलादे: संश्च (पा.१.२.२६) – उश्च इश्च इति वी। तौ उपधे यस्य तस्माद्धलादे रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्त:।

अत: प्रत्ययेष्वनुबन्धाकारेण यद् दृश्यते, तदल्पम्। अत: प्रत्यय उपस्थित एव तत्र संभाव्यातिदेशो विचार्य:। एतद् सर्वमवधार्य प्रत्ययस्य सम्यग् ज्ञाने जात एव तदनुरूपमङ्गकार्य स्वयमेव झटित्युपतिष्ठते। अतोऽङ्गकार्यनिर्देशार्थमेवानुबन्धा: प्रत्ययेष्वासज्जिता: सन्तीत्यवधार्यम्।

अनुबन्धानाश्रित्य धातुभ्यो विहितानां सार्वधातुकप्रत्ययानां द्वौ विभागौ जायेते पित्सार्वधातुकप्रत्यया, अपित्सार्वधातुकप्रत्ययाश्च। तयो: पुन: हलादित्वमजादित्वमिति भेदद्वयम्। तदित्थम् –

- सार्वधातुकप्रत्ययाः
  - पित्प्रत्ययाः
    - अजादिपित्प्रत्ययाः
    - हलादिपित्प्रत्ययाः
  - अपित्प्रत्ययाः
    - अजाद्यपित्प्रत्ययाः
    - हलाद्यपित्प्रत्ययाः

येऽपित्सार्वधातुकप्रत्ययास्ते 'सार्वधातुकमपित्' (पा.१.२.४) इत्यनेन सूत्रेण ङिद्वद् भवन्ति। अतस्तेषु ङित्त्वप्रयुक्तानि कार्याण्येव भवन्ति। उपरि निर्दिष्टेषु सार्वधातुकप्रत्ययेषु ये प्रत्ययाः स्थूलाक्षराः वक्राश्च दृश्यन्ते, ते पित्सार्वधातुकाः।

सार्वधातुकखण्डे ये प्रत्ययाः सामान्याक्षराः समाश्च दृश्यन्ते, तेऽपित्सार्वधातुकाः। एतेऽपित्सार्वधातुकप्रत्ययाः 'सार्वधातुकमपित्' (पा.१.२.४) इत्यनेन सूत्रेण ङिद्वद् भवन्ति।

अनुबन्धानाश्रित्य धातुभ्यो विहितानामार्धधातुकप्रत्ययानां त्रयो विभागा मुख्यत्वेन कर्तुं शक्यन्ते।

- आर्धधातुकप्रत्ययाः
  - कित्ङित्प्रत्ययाः
  - ञित्णित्प्रत्ययाः
  - कित्ङित्ञित्णिद्भिन्नप्रत्ययाः

एतत्सर्वं मनसिकृत्यैव भगवताङ्गकार्याणि निर्दिष्टानि।

अङ्गकार्यविज्ञानम्

अष्टाध्याय्यां ६.४.१ इत्यत आरभ्य ७.४.९७, इति यावदङ्गाधिकारो वर्तते। सर्वमङ्गकार्यमनुबन्धानपेक्षते। तत्र प्रत्ययस्यानुबन्धा एवाङ्गकार्यं निर्दिशन्ति।

यत्र कित्वं, ङित्वं वा, तत्र गुणवृद्धिनिषेधः, सम्प्रसारणं, नलोपश्च भवन्ति। यत्र णित्वं ञित्वं वा, तत्राचो ञ्णिति, अत उपधाया, इत्यादीनां प्रवृत्तिः। यत्रैषामभावस्तत्र सार्वधातुकार्धधातुकयोः, इत्यादीनाम्।

'आर्धधातुके' (पा.६.४.४६) इत्यधिकृत्यार्धधातुकसम्बन्धीनि कार्याणि, हुश्नुवोः सार्वधातुके, (पा.६.४.८७) अत उत्सार्वधातुके, (पा.७.४.१०) नाभ्यस्तस्याचि पिति सार्वधातुके (पा.७.३.८७) इत्यादिभिः सार्वधातुकसम्बन्धीनि कार्याणि पृथक्कृत्योक्तानि।

एवञ्चाङ्गानां विभाजनमन्त्याक्षराण्याश्रित्य कृतम्। यतः – अतो लोपः, (पा. ६.४.४८) अतो दीर्घो यञि, (पा.७.३.१९) अतो येयः, (पा.७.२.८०)अतो हलादेर्लघोः, (पा.७.२.७) आतो लोप इटि च, (पा.७.४.६४) एरनेकाचोऽसंयोगपूर्वस्य, (पा.७.४.८२) उतश्च प्रत्ययादसंयोगपूर्वात्, (पा.७.४.१०६) ऋतश्च, (पा.७.४.९२) ऋतश्च संयोगादेर्गुणः, (पा.७.४.१०) रीङ् ऋतः, (पा.७.४.२७) ऋति इद् धातोः, इत्यादिष्वन्त्याक्षरेणाङ्गानि निर्दिष्टानि।

अतो यदि प्रत्ययानामनुबन्धा अङ्गानाञ्चान्त्याक्षराणि सम्यगवगम्येरन्, तर्हि तदाश्रितान्यङ्गकार्याणि स्वयमेव स्फुटीभवन्ति।

यथैकस्मिन् सुव्यवस्थिते गृहे सर्वाणि वस्तूनि पृथक्कृत्य यथास्थानं स्थापितानि वर्तन्ते, तथैवाष्टाध्याय्यां सर्वाणि कार्याणि पृथक्कृत्य यथास्थानं स्थापितानि वर्तन्ते। एकस्य शब्दस्य साधने नैकानि कार्याणि भवन्ति। परन्त्वष्टाध्याय्यां तेषां सम्यग्व्यवस्थापनाद् तानि दूरत एव सुस्पष्टं प्रतिभान्तीति वैलक्षण्यं चमत्कृतिश्चाष्टाध्याय्याः।

श्रीपेरि–सूर्यनारायणशास्त्र–विरचित–
भूषणसारव्याख्या–तत्त्वदर्शिनी–विवेचनम्

एस. रङ्गनाथः

आन्ध्रप्रदेशे विशाखमण्डले चोड़वरं जनपदे पेदनन्दिपल्लिनामकः कश्चन अग्रहारोऽस्ति। तत्र यजुश्शाखायां श्रौत प्रक्रियायां स्मृतिप्रक्रियायां व्याकरणे ज्योतिषशास्त्र–प्रवीणाः अनेके प्रवराः व्यराजन्त। तस्मिन्नेवाग्रहारे गौतमवंशीयाः केचन श्रोत्रिया न्यवसन्। तेषां वंशे सुप्रसिद्धः "पेरि" इत्युपनामकस्सर्वेश्वराख्य (द्विजन्माऽवसत्), तस्य सूरिसोम–देवीनामिका धर्मपत्न्यासीत्। तयोः पुण्यदम्पत्योः पूर्वजन्मकृतसुकृतपरिपाकवशेन–२०.८.१९१० दिने सूर्यनारायणशास्त्रिणः पुत्रत्वमवायुः।

ग्रन्थरचना

१. तत्त्वदर्शिनी – भूषणसारस्य व्याख्या।

२. नागेश–भावप्रकाशः– अयं नागेशभट्ट–विरचित–लघुमञ्जूषाया उपरि विस्तृतो व्याख्यानग्रन्थः लघुमञ्जूषाया विवरणे यावन्तो दर्शनान्तरीयविषया अपेक्ष्यन्ते ते सर्वेऽपि अत्र संग्रथिताः।

३. खण्डदेव–भावप्रकाशः – खण्डदेवेन जैमिनीयमतानुसारेण शाब्दबोधप्रक्रिया अत्र निर्मिता। अत्र धर्माधर्मलक्षणं, विधिवादः, भावनावादः इत्येते विषयास्सन्ति। अस्य ग्रन्थस्यैतावत्पर्यन्तं टीका नास्ति। नैयायिकानां शाब्दिकानाञ्च मतं निराकृत्य भावनामुख्यविशेष्यको शाब्दबोधस्सिद्धान्तीकृतः।

भूषणसारव्याख्या–तत्त्वदर्शिनी

एतद्–ग्रन्थस्य विरचने महान्प्रयत्नविशेषस्समपाद्यत ग्रन्थकृता कौण्डभट्टेन। तथाहि शाब्दबोधप्रक्रियोपयोगिनः पदार्थाः पाणिनीये एव प्रादर्शिषत। तदर्थमेव खलु तच्छास्त्रं प्रावर्तत। तत्र च सनादयः १२, विकरणाः २३, लकाराः १०, तिङः १८, कृत

प्रायेण १००, सुप: २१, टाबादिस्त्रीप्रत्यया: ९, तद्धिता: प्रायेण २००, इत्यष्टविधा: प्रत्यया: तृतीयचतुर्थपञ्चमाध्यायेषु त्रिषु इच्छादितत्तदर्थेषु विहिता:। शास्त्रस्येद-मध्यायत्रयमेव जीवातुभूतम्। एतदेव तार्किकाणां मीमांसकानां च शाब्दबोधप्रक्रियोपयोगीत्यत्र न कश्चिद् विप्रतिपद्यते। नैयायिकमीमांसकवैयाकरणानां त्रयाणामपि शब्दखण्डेऽधिकारस्य समानत्वात्तार्किकैर्मीमांसकैश्चैतादृतमित्यत्र न महदाश्चर्यम्। तत्र प्राथमिका: पञ्चविधा: प्रत्यया: धातूद्देशेन ततस्त्रिविधा: प्रातिपदिकोद्देशेन च पाणिनिमहर्षिणा विहिता:। प्रकृतिप्रत्ययसंयोजनेन साधुशब्दनिष्पत्तयेऽपेक्षितानि कार्याणि अतिरिक्तेऽध्यायपञ्चके कथितानि।

पाणिनीयसूत्रेषु कात्यायनेन वार्तिकानि व्यरचिषत। सूत्रवार्तिकानामुपरि भगवता पतञ्जलिना महाभाष्यं निरमायि। भाष्यवार्तिककाराभ्यां कर्तृकर्मरूपो धर्मी तिङर्थ:। कर्मकर्तृकरणादिरूपो धर्मी सुपामर्थ: समासादिवृत्तौ न व्यपेक्षा, किन्तु एकार्थीभाव:, धात्वर्थमुख्यविशेष्यको बोध:। अन्तत: अखण्डवाक्यस्फोटशब्द एव वाचक: इत्यादयो वैयाकरणसिद्धान्ता: निरूपिता:। तांश्च सिद्धान्तान् गुरु: भर्तृहरि: काण्डत्रयात्मके वाक्यपदीये शाब्दिकानुजिघृक्षया विस्तरेण प्राबोधयत्।

एवं सत्यपि दर्शनान्तरीया: विकल्पग्रस्तचित्ततया तान् च सम्यगधिगन्तुमीशते, प्रत्युत दूषयन्ति च। अतस्तन्मतनिराकरणपूर्वकं वैयाकरणसिद्धान्तप्रतिष्ठापनस्य आवश्यकता समजनि। तदर्थमेव प्रायतन्त दीक्षितकौण्डमहोदय:। नैयायिकैर्मीमांसकैश्च स्वीयप्रबन्धेषु तत्तत्सन्दर्भे वैयाकरणमतमवतार्य अदूष्यत। तदसहमान: सर्वतन्त्रस्वतन्त्र: श्रीमान् भट्टोजिदीक्षित: प्रौढमनोरमायां शाब्दकौस्तुभे च "ल: कर्मणि च भावे चाकर्मकेभ्य:" ३.४.६७, 'भावे' ३.३.१८, "नञ्" १.४.४७ इत्यादिसूत्रव्याख्यावसरे परमतं दूषयित्वा वैयाकरणसिद्धान्तं प्राबोधयत्। तिङा कर्तृकर्मरूपो शक्योऽर्थ: न वृत्ति:। फलव्यापारौ धात्वर्थ: आख्यातार्थत्वेन पराभिमता कृतिरपि धातुशक्यैव। नञ: आरोपितद्योतकत्वं समासादिवृत्तौ जहत्स्वार्था-रूपैकार्थीभाव एव स्वीकार्य:। बोधकतैव शक्ति:। न तु नैयायिकाभ्युपगतेश्वरसङ्केत:। अपभ्रंशा अपि शक्ता एव, सर्वत्रापि धात्वर्थमुख्य विशेष्यक एव शाब्दबोध:। परमसिद्धान्ते स्फोटशब्द एवावशिष्यते। स च निर्गुणब्रह्मरूप: प्रक्रियांशस्तु अविद्याविजृम्भणमात्रम् इत्यादय: स्वसिद्धान्ता: तत्र तत्र विकीर्णतया बाहुल्येन च दीक्षितेन प्रादर्शिपत। परमतमप्रतिषिद्धमनुमतं भवतीति न्यायमनुसृत्य सर्वत्रापि परमतनिराकरणपूर्वकमेव स्वसिद्धान्तो न्यरूपि। एवं मनोरमाशब्दकौस्तुभयो: प्रतिपादितस्य पदार्थजातस्य विप्रकीर्ण-

त्वाद्गुरुभूतत्वाच्च दुर्घटतया व्युत्पित्सूनामुपकारो न भवेदित्याशयेन संक्षेपेण तत्पदार्थजातं दिदर्शयिषुः चतुस्सप्ततिश्लोकात्मकं ''वैयाकरणमतोन्मज्जनम्'' — नामकं वैयाकरणशाब्द-बोधप्रक्रियाप्रदर्शनपरं ग्रन्थं प्रणिनाय दीक्षितः।

तत्र धात्वर्थ—लकारार्थ—सुबर्थ—नामार्थ— समासशक्ति—शक्ति—नञर्थ—निपातार्थ—त्वादिभाव—प्रत्ययार्थ—देवताप्रत्ययार्थ—क्त्वाद्यर्थ—स्फोटनिर्णयात्मकानि चतुर्दश—प्रकरणानि सन्ति। भट्टोजिदीक्षितः स्वीयशाब्दबोधप्रक्रियाग्रन्थस्य प्रमाणसम्पादनाय वाक्यपदीयात् आख्यातशब्दे, साध्यत्वेन क्रिया तत्र, अविग्रहागतादिस्था, भेद्यभेदक, आख्याततद्धित, इन्द्रियाणां स्वविषयेषु, असाधुरनुमानेन सम्बन्धिशब्दे, पदेन वर्णा, अनेकव्यक्ति, सत्यासत्यौ तु यौ यागौ, इत्येकादशश्लोकान् स्वग्रन्थमानिनाय। तथा भट्टपादानां तन्त्रवार्तिकात् (भावार्थाधिकरणे) अस्त्यादावपि इत्यादि श्लोकमप्यानिनाय। भट्टवार्तिके अस्त्यादावपि कर्त्रंशे इति पाठः। सोऽयं महानुभावः स्वज्येष्ठभ्रातृरङ्गोजिभट्टस्य तनूजन्मने सर्वतन्त्रस्वतन्त्राय श्रीमते कौण्डभट्टाय स्वसिद्धान्तान् साकल्येनोपदिदेश।

कौण्डभट्टोऽपि पितृव्योपदिष्टान् पदार्थानाकलय्य ''वैयाकरणमतोन्मज्जनस्य'' बृहद्वैयाकरणभूषणनामकं महान्तं व्याख्यानग्रन्थमरीरचत्। तत्रादौ तेनैव प्रतिज्ञातम्—

''गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धान्तानामुपपत्तिभिः प्रकटये तेषां तेषां वचो दूषये'' इति। एवं प्रतिजानतः भट्टस्यायमभिप्रायः यत् न्यायतन्त्रे सूत्रवार्तिकभाष्य-ग्रन्थाः अस्माकमनुकूलाः। परन्तु तद्व्याख्यातारः केवलं वैयाकरणमतदूषणाभिनिवेशेनैव तत्खण्डनाय प्रववृतिरे। तथा पूर्वतन्त्रे जैमिनीयसूत्राण्यस्मत्—सिद्धान्तस्यानुकूलान्येव। भाष्यकारप्रभृतयस्सर्वेऽप्यस्मसिद्धान्तस्वरूपमनाकलय्य तदन्यथैव गृहित्वा तद्दृष्ट्यैव जैमिनि—सूत्राणि व्याचचक्षिरे। जैमिनिसूत्राणि व्याकरणसिद्धान्तानुसारेणैव सुयोग्यानि भवन्तीति। निर्व्यूढ़ा चेयं प्रतिज्ञा वैयाकरणभूषणेन कौण्डभट्टेन। तदन्तरकालिकेन नागेशेनापि महता प्रबन्धेन सा प्रतिज्ञा सुष्ठु परिपालिता मञ्जूषायाम्। भूषणग्रन्थस्यातिविस्तृततयाऽस्मत्—सिद्धान्तजिज्ञासुभिरनयासेन सुज्ञेयास्युरित्याशयेन कौण्डभट्टेनैव भूषणग्रन्थस्य सारांशं प्रतिपिपादयिषिता भूषणसारनामको ग्रन्थो निरमायि। तत्रामैव कथयति एतन्मूलभूतं भूषणमस्तीति। एष दीक्षितकौण्डभट्टयोः प्रयत्नविशेष एवेदानीं वैयाकरणभूषणसाररूपेणा—स्मदादीनां हस्तेषु विलसतीति महदिदं प्रमोदस्थानम्। एतस्याध्ययनेन दर्शनान्तरीयाणां सिद्धान्तेष्वस्वास्थ्यमप्रामाणिकत्वं च वैयाकरणसिद्धान्तेषु साम्मुख्यं च सहृदयानां चेतस्सु प्रतिफलति। परन्तु नव्यन्यायस्य प्रादुर्भावेण प्राचीनन्याय इव भूषणसारस्योत्पत्त्यनन्तरं

बृहद्वैयाकरणभूषणं प्रायोऽस्तंगतमित्येव वक्तव्यम्। भूषणसार एव विश्वविद्यालय–परीक्षासु पाठ्यत्वेन नियोज्यते। तदुपर्येव विद्वांसः व्याख्यानानि निरमासिषुः।

कौण्डभट्टेन भूषणग्रन्थे शब्दप्रयोगविषये कार्पण्यं नाशितम्। किन्तु स्वाभिप्रायः गंगाप्रवाहसदृशया भाषया विस्तरेण प्रदर्शितः। अतस्तस्य व्याख्यापेक्षा नासीत्। भूषणसारे तु ग्रन्थविस्तरभिया शब्दप्रयोगे कार्पण्यमाश्रितम्। ग्रन्थकर्तुराशयप्रदर्शनाय व्याख्यापेक्षा समजनि। सूक्ष्मरूपेण वर्तमानस्यास्य ग्रन्थस्य व्याख्यानाय भूषणग्रन्थस्यावश्यकताऽत्यन्त–मस्तीति च विविच्य वक्तव्यम्। कारिकाग्रन्थस्य भट्टोजिदीक्षितनिर्मितत्वेन भूषणसारव्याख्या–नावसरेऽपि दीक्षितविरचितसकलग्रन्थपर्यालोचनावश्यकी। वैयाकरणैर्महाभाष्यस्य परमप्रमाणे–नाङ्गीकृतत्वान्महाभाष्यार्थपरिशीलनमपि भूषणसारव्याख्यानायात्यन्तमावश्यकम्। एवञ्च "सिद्धान्तकौमुदी", "प्रौढमनोरमा", "बृहद्वैयाकरणभूषणं, "महाभाष्यादिग्रन्थान् सम्यक्–परिशील्य तदीयानुसन्धानेन भूषणसारग्रन्थो यदि व्याख्यायते तदा सारग्रन्थार्थः मूलकृत्–सम्मतस्पष्टमवभासते पठितॄणां पाठयितॄणाञ्च। प्रमाणत्वेन प्रदर्शितग्रन्थाननवलोक्य केवलं भूषणसारग्रन्थमाश्रित्य व्याख्याकरणे सारग्रन्थार्थस्सम्यक्तया प्रतिपादितो न भवति। एतावत्पर्यन्तं भूषणसारस्योपरि मुद्रिताः षड्व्याख्याः समुपलभ्यन्ते। ताः सर्वा अपि सिद्धान्तकौमुद्यादि–मूलग्रन्थाननवेदयैव स्वोत्प्रेक्षितार्थानुसारेण सारग्रन्थार्थं प्रतिपादयामासुः। ते व्याख्यातारः सर्वतंत्रस्वतंत्रा अपि मूलग्रन्थानवेक्षणदोषेण भूषणसारस्य तत्त्वार्थं नाग्रहीषुरेव। ताः व्याख्याः अधः प्रदर्श्यन्ते–

१.	दर्पणम्	हरिवल्लभकृतम्
२.	काशिका	हरिरामदीक्षितकृता
३.	परीक्षा	भैरवमिश्रकृता
४.	प्रभा	पञ्चोलिबालकृष्णविरचिता
५.	सरला	नेने गोपालकृष्णविरचिता
६.	भूषणसारव्याख्या	कृष्णमिश्रकृता

एवं स्थिते पेरिसूर्यनारायणशास्त्रिमहोदयाः भूषणसारग्रन्थार्थं परिज्ञानायावश्यकान् मूलग्रन्थान् दर्शनान्तरीयसिद्धान्तांश्च सम्यगाकलय्य उपरिप्रदर्शितव्याख्यानग्रन्थान्परिशील्य तेषु दोषप्रदर्शनपूर्वकं सारग्रन्थार्थतत्त्वप्रतिपादनपरां "तत्त्वदर्शिनी" नाम्ना बृहती व्याख्यां निर्ममुः। ग्रन्थारम्भे तैरेवं प्रतिज्ञा कृता–

विमृश्यप्राक्तनीष्टीकाः प्रमादांस्तु विविच्य च।
व्याख्यां भूषणसारस्य कुरुते तत्त्वदर्शिनीम्॥
हरिवल्लभपञ्चोलिभैरवैर्हरिशास्त्रिणा।
कृष्णमिश्रेण विदुषा नेनेगोपालशास्त्रिणा॥
व्याख्या निर्ममिरे बह्व्यः पदार्थप्रतिपादिकाः।
सारग्रन्थार्थजिज्ञासोः साहाय्यं ताः प्रकुर्वते॥
प्रागगृह्णामहमपि पदार्थं तत एव हि।
स्वांतप्रक्षितार्थनिपुणं सारं ते किन्त्वनुयूयुन्॥
न तत्त्वमग्रहीपुस्ते मूलग्रन्थानवेक्षणात्।
मूलग्रन्थानवेक्ष्याहं सारतत्त्वं निरूपये॥ इति॥

सा च प्रतिज्ञा शास्त्रिचरणैस्तत्त्वदर्शिनी व्याख्यायां साकल्येन निर्व्यूढा।

शब्दसद्भावसाधने कविकर्णपूरस्य वैशिष्ट्यम्

रमाकान्तपाण्डेय:

स्फोटात्मको ध्वन्यात्मकश्च द्विधा शब्दविभाग: कृतो दृश्यते शब्दशास्त्रे। तत्र वस्तुत: स्फोट एव शब्दत्वेन स्वीकृतस्तथापि लोकव्यवहाराद् ध्वनावपि शब्दव्यवहार इति स्पष्टमाह भाष्यकृद् भगवान् पञ्जलि:[1]। काव्यशरीरत्वेन अङ्गीकृतस्य शब्दस्य वर्णात्मक–ध्वन्यात्मकभेदेन द्वैविध्यं प्रतिपादयन् कविकर्णपूर: स्फोटसद्भावे प्रत्यक्षम् अर्थापत्तिं च प्रमाणतयोपन्यस्यतीति न केवलम् आलङ्कारिकसम्प्रदाये शाब्दिकसम्प्रदायेऽपि तस्य वैशिष्ट्यम्।

ननु मीमांसकमते वर्णात्मक एव शब्दो नित्य:, न शाब्दिकसम्प्रदाये, ध्वनित्वेनाऽत्र तस्यैव व्यपदेशादिति कविकर्णपूरेण वर्णात्मकशब्दस्य नित्यत्वनिर्देश: सम्प्रदायविरुद्ध एवेति चेत्, न। वर्णात्मकशब्देन तत्र स्फोटस्यैव विवक्षितत्वात्। तथा चाह कवि: कर्णपूर:–

''वर्णात्मको ध्वन्यात्मकश्चेति शब्दो द्विधा। यद्यपि वर्णा नित्यास्तथापि तदभिव्यक्ति: शरीरस्थवायुनैव भवति''[2]।

अयं भाव: वर्णानां नित्यत्वविषये मीमांसकसिद्धान्तोऽनुकूल एव आलङ्कारिकाणाम्। वर्णा एव शब्द:, शब्दाश्च नित्या इति तैरभ्युपगमात्। तथापि तत्राऽभिव्यक्ति–सिद्धान्ताऽनङ्गीकारा न नित्यवर्णघटितकाव्ये कविजन्यत्वव्यवहाराऽप्रसङ्गाच्छाब्दिक–सम्मतशब्दस्वरूप आस्थावन्त आलङ्कारिका:। ''यद्यपि नित्य: तथापि कार्य'' इति भाष्यप्रतिपादितरीत्या नित्यसिद्धवस्तुनोऽप्यभिव्यक्तिसिद्धे: काव्येऽपि तद्व्यवहारोपपत्ते:। स चाऽयं स्फोट: शरीरस्थवायुनैवाऽभिव्यज्यत इति वर्णात्मकशब्दस्य कविकर्णपूराभिमतस्य स्फोटत्वाङ्गीकारे न काऽपि क्षति:[3]।

स्फोटव्यवस्थापने कवि: कर्णपूर: श्रीमद्भागवतोक्तिं प्रमाणतयोपन्यस्यतीति तत्र नागेशाऽनुसार्येव विवेचनम्। तथा च तत्र तदाशयं विवृण्वानष्टीकाकारो लोकनाथ–स्तत्रैवाऽऽह–

निरंश: न कोऽप्यंश: अत एवाऽभिन्न एक इत्यर्थ:। नित्यो ज्ञानस्वरूपश्च एवम्भूत ओङ्कार: शब्दार्थवस्तुमात्राणां प्रादुर्भावकत्वात् शब्दार्थमय:। एतन्मते प्रणवादेव वेदादीनां सर्वेषां सृष्टिरिति बोध्यम्। जन्मान्धमूकबधिरस्य पुरुषस्य चक्षु:कर्णवागिन्द्रियाणाम्-भावात् स्वीयान्त:करण एव स्वत एव शब्दार्थयो: परामर्शे जाते सति स्वीयवाक्यस्य शब्दार्थस्य चान्तर एव बोधो भवतीत्यान्तर: स्फोट एव।

वर्णस्फोटो नाऽत्र कविकर्णपूरेण निर्दिष्ट:। पद—वाक्यस्फोटयो: विवेचनम् एव तस्य प्रयासो दृश्यते। पुण्यराजेनाऽपि "एक एव नित्य: पदाभिव्यङ्ग्यो वाक्याभिव्यङ्ग्योऽ-खण्डो व्यक्तिस्फोटो वहीरूप" इत्युक्तम्। तत्सर्वं समीक्षितं सुधीभिरिति नेह प्रतन्यते।

किन्तु नाऽयं स्फोट: सर्वै: स्वीकृत इति विरोधिमतोल्लेखपूर्वकं तत्र प्रमाणोपन्याससमयो जगाद कौस्तुभकृच्छ्रीमान् कर्णपूर: —

"तमन्ये न सहन्ते। तथाहि — पूर्व—पूर्ववर्णाननुभवतश्चरमवर्णश्रवणकाले पूर्व—पूर्ववर्णानुभवजनितसंस्कारसहकृतचरमवर्णसम्बन्धेन पदव्युत्पादनसमयग्रहणानुगृहीतेन पूर्व—पूर्ववर्णानुभवजनितसंस्कारसहकृतचरमवर्णसम्बन्धेन श्रोत्रेण युगपदेव सदसदनेक-वर्णावगाहिनी पदप्रतीतिर्जन्यते। सहकारिदार्ढ्येन प्रत्यभिज्ञानवदेव प्रत्यभिज्ञाने प्रत्येकेऽपि अतीताऽपि पूर्वावस्था स्फुरति तेन कृतं स्फोटेनेति।

तन्न! तथा हि— पदव्युत्पादनसमयो हि स्फोटकृत एव। न च तत्र प्रमाणाभाव:, प्रत्यक्षाऽर्थापत्यो: सम्भवात्। यथाऽयं गौरित्युक्ते नहि गकारौकारविसर्गा एव प्रतीयन्ते, अपि तु सास्नादिमत् किमपीति प्रत्यक्षम्। अयं गौरित्यत्र किं गकारादयो वर्णा व्यस्ता एवाऽर्थप्रत्यायका:, किं समस्ता:? नाद्य:, इतरवर्णवैयर्थ्यात्। नापि द्वितीय:, उत्पन्न-प्रध्वस्तानां सामस्त्याभावात्। न च व्याससमासाभ्यामन्य: प्रकारोऽस्ति। तस्माद् वर्णानां वाचकत्वानुपपत्तौ यद्बलादर्थप्रतीति: स एव स्फोटो वर्णातिरिक्तो वर्णाभिव्यङ्ग्यार्थ-प्रत्ययायको नित्य एवेति अर्थापत्तिरपि"।।

अयमाशय: मीमांसकप्रभृतयो न स्फोटं सहन्त इति तन्मतनिरासाय कवेरुपक्रम:। स च तन्मतनिरसनपूर्वकं स्फोटसद्भावे प्रमाणमुपस्थापयितुं प्रयतते। पूर्व—पूर्व—वर्णाननुभवत: पुरुषस्य चरमवर्णसम्बन्धेन श्रोत्रेण युगपदेव पूर्वपूर्वातीतवर्णावगाहिनी पदप्रतीतिर्जायते। तदनन्तरं वाक्यार्थविषयकशाब्दबोधो भवति। 'न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते' इति मीमांसकमतानुसारेण अत्र कालस्याऽपि विषयविधया कारणत्वम्। सोऽयं

देवदत्तः'' इति प्रत्यभिज्ञास्थले चक्षुःसन्निकर्षजन्येदम्पदार्थज्ञानकाले पूर्वप्रतीततत्कालतद्देश-रूपतत्ताऽपि तादृशप्रत्यये भासते। तथा चाऽत्रापि चरमवर्णस्य श्रवणेन्द्रिजन्यज्ञाने पूर्व-पूर्वातीतवर्णस्याऽपि संस्कारवशाद् भानं भविष्यतीति स्फोटोऽनावश्यक एवेति मीमांसकमतं निराकरोति तन्नेति ग्रन्थेन अलङ्कारकौस्तुभकारः श्रीमान् कर्णपूरः।

यत्समयेऽतीतसमस्तवर्णघटितपदानां मीमांसकमते पुनः प्रतीतिर्भवति, तत्समये स्फोटकृतशाब्दबोध एव भवति, न तु अतीतवर्णानां पुनः प्रतीतिः। अत्र न किमपि प्रमाणमिति तैरुच्यते चेत्, प्रत्यक्षाऽर्थापत्योः सद्भावो निरूपितोऽत्र ग्रन्थे। गौरित्युक्ते न अतीतगकारादेः पुनः प्रतीतिः, किन्तु सास्नाद्यवयवविशिष्टगोपदार्थस्य प्रतीतिरेवेत्यत्र सर्वेषामनुभव एव प्रमाणम्। अथ च गौरित्यत्र केवलगकारस्य कारणत्वेऽन्यवर्णोच्चारणस्य वैयर्थ्यापत्तिः। केवलगकारोच्चारणात् शाब्दबोधापत्तिश्च। तस्मात् पदजन्यशाब्द-बोधान्यथानुपपत्या स्फोटः सिद्ध इत्यन्यथानुपपत्तिरेवाऽत्र प्रमाणम्। यथा– 'स्थूलो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र पीनत्वाऽन्यथानुपत्तिप्रमाणेन रात्रिभोजित्वसिद्धिः।

ननु शब्दे प्रमाणादिलक्षणमेव नोपन्यस्तम्, कथमत्र पुनः प्रमाणप्रदर्शनमिति चेन्न। भाष्यादौ तद्व्यवहारस्थापितत्वात्। तथा च –''अनिर्ज्ञातार्थविषयकं सम्भावित-सकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणम्'' इति हि शाब्दिकसम्मतं प्रमाणसामान्य-लक्षणाम्। तथा चाह भगवान् भाष्यकार – ''मानं हि नाम तद् येनाऽनिर्ज्ञातमर्थं ज्ञास्यामि''। एतदेव अनुवदन् हरिरप्याह

''अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते''।

अतो नाऽत्र शास्त्रे प्रमाणव्यवस्थाभावप्रसङ्गः। तथापि शब्दप्रत्यक्षे शाब्दिकमते कश्चन विशेषो वर्तते। तत्र ध्वन्यात्मकस्य शब्दस्य प्रत्यक्षे तु श्रोत्रस्य तेन सह समावाय एव सन्निकर्षः, श्रोत्रेन्द्रियस्य आकाशरूपत्वात्, ध्वनिरूपशब्दस्य च तद्गुणत्वात्। सफोटात्मकशब्दस्य श्रावणप्रत्यक्षे तु स्वमतमेवध्वनितादात्म्यम्, स्वसमवेतध्वनिव्यङ्ग्यत्वं वा सम्बन्धः। तस्य न श्रावण–प्रत्यक्षमपि तु मनसा ग्रहणमिति मते तु स्वसंयुक्तात्मतादात्म्यं तादृशात्मसंयोगो वा सम्बन्ध इति निर्धारितं श्रीमद्भी रामप्रसादत्रिपाठिभिः। एवं कविकर्णपूरस्य प्रत्यक्षविषयकः सिद्धान्तः शाब्दिकसिद्धान्तानुगुण एव।

अर्थापत्तिर्यद्यपि शब्दशास्त्रे सम्यङ्नोपन्यस्ता, तथापि तन्महत्त्वं तु दृश्यत एव शाब्दशास्त्रे। स्फोटसङ्कल्पनायां शक्त्याश्रयत्वान्यथानुपपत्तिर्मानत्वेनोपस्थाप्यते, सैव

अर्थापत्तिः। व्याकरणशास्त्रे यत्र यत्रोच्यते व्यर्थीभूयेदं पदं सूत्रं वा एतज्ज्ञापयति, तत्र तत्र प्रायस्तज्ज्ञापनमर्थापत्तिरूपा प्रमा, ज्ञापकं च अर्थापत्तिरूपं प्रमाणम् इत्यपि श्रीत्रिपाठिचरणानां धीरिति स्फोटसद्भावे प्रत्यक्षाऽर्थापत्योः प्रमाणत्वेन स्वीकृतिर्न सम्प्रदायविरुद्धा[8]।

ननु स्फोटानङ्गीकारे का हानिः? नित्यवर्णैनैव शाब्दबोधप्रसङ्गः स्वीक्रियतां स्फोटस्याऽपि तद्रूपत्वादिति चेत्, अत्रोच्यते कविना कर्णपूरेण–

''स्फोटानङ्गीकारे सर्व एव संस्कारा विशृङ्खला एव सन्तः पदजन्य–पदार्थप्रतीतौ न शक्नुवन्ति। नापि प्रत्यभिज्ञाने प्रत्यक्षेऽपि अतीताऽपि पूर्वावस्था स्फुरति। न वा सदसदनेकवर्णावगाहिनी पदप्रतीतिः श्रोत्रेण जन्यते। सोऽयं देवदत्त इति प्रत्यभिज्ञानस्य तत्तांशे संस्कारजनितस्मृतिविशेषत्वात्, श्रोत्रेण सदसदनेकवर्णावगाहाभावाच्च। नहि प्रत्यभिज्ञानमेकं ज्ञानं, तदंशे संस्कारतया, इदमंशे च चक्षुर्जन्यतया च स्मरणग्रहणात्मकत्वात्। न च तदंशेऽपि चक्षुः करणं, तस्य सन्निहितग्राहितया तदभावात्। नापीदमंशे संस्कारः, चक्षुरन्वयव्यतिरेकानुविधानात् स्मरणहेतुव्यवसायाभावाच्च। तेन स्फोट एव अङ्गीकार्यः''[9]।

शाब्दिकसम्प्रदाये स्फोट एव शाब्दबोधे कारणम्, न तु तत्तद्वर्णज्ञानानां तादृशज्ञान–जन्यसंस्काराणां वा कारणत्वम्। यादृशानुपूर्वीविशिष्टचरमवर्णज्ञानानन्तरं शाब्दबोधे जायते तादृशचरमवर्णज्ञाननिष्ठोऽसाधारणजातिविशेषः स्फोटत्वम्। स च स्फोटः तद्विषयकशाब्द–बुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेकतया सिद्धः। न च न्यायमतसिद्धतादृशा–ऽनुर्व्यवच्छिन्नचरमवर्णज्ञानस्यैव कारणत्वम्, आनुपूर्वीघटितधर्मस्य कारणतावच्छेदकत्वे महागौरवात्।[10]

वर्णसमुदायज्ञानानां तादृशज्ञानजन्यसंस्काराणां वा शाब्दबोधे कारणत्वाङ्गीकारे विशृङ्खलाद् वर्णानां ज्ञानात् संस्काराद् वा शाब्दबोधापत्तिः। यच्च मीमांसकैः ''सोऽयं देवदत्त'' इति प्रत्यभिज्ञानात्मकचाक्षुषप्रत्यक्षं दृष्टान्तीकृत्य श्रवणेन्द्रियजन्यचरमवर्ण–ज्ञानेऽप्यतीतवर्णस्य संस्कारवशाद् भानमुच्यते, तदपि नोचितम्। प्रत्यक्षात्मकप्रत्यभिज्ञाने तद्देशतत्कालरूपा अतीता पूर्वावस्था न स्फुरति, न वा श्रोत्रेण अतीतवर्णावगाहिनी चरमवर्णविषयकप्रतीतिर्जन्यते। तत्र अतीतदेशकालरूपवत्तायाः स्मरणं, चक्षुःसन्निकृष्टेदम्प–दार्थस्य प्रत्यक्षमिति ज्ञानद्वयमेव, न तु तत्ताविशिष्टेदम्पदार्थस्यैकं ज्ञानम्, यतोहि तत्तांशे चक्षुःसन्निकर्षाभावेन चाक्षुषप्रत्यक्षे तत्र तस्य भानम् असम्भवि। इदमंशे चक्षुःसन्निकर्षसत्त्वे सति ज्ञानं, तदभावे न, इत्यन्वयव्यतिरेकात् स्मृतिजनकस्येदम्पदार्थस्याऽनुभवाभावाच्च। अतश्च पृथक् सम्बन्धानाम् आनुपूर्वीरहितानां संस्काराणां प्रत्येकवर्णोच्चारणानां क्रमेण

परस्परानुपूर्वीविशिष्टचरमवर्णज्ञाने शाब्दबोधकारित्वं कारणतावच्छेकं स्फोटत्वम्। तथा च यादृशानुपूर्वीविशिष्टचरमवर्णस्य् ज्ञानसत्त्वे तत्तदर्थस्य शाब्दबोधो जायते तादृशज्ञाननिष्ठजाति-विशेष एव स्फोटत्वम्। सा जातिस्तत्तदर्थविषयकशाब्दबोधजनकतावच्छेदकत्वेन सिद्धेति नाऽत्र तत्सद्भावे शङ्कावसर इति।

एवं कविकर्णपूरप्रदर्शितन्यायेन सप्रमाणं स्फोटसिद्धिरिति निर्देशोऽत्र कृतोऽस्माभिः। वस्तुतस्तु समीक्षणमस्य प्रबन्धविषय एवेति सुधीभिस्तथा प्रयासो विधास्यत एव। किञ्च, कविकर्णपूरोऽयं नगोशसमकालिकः सन्नपि ततः पूर्ववर्ती भवितुमर्हति। प्रपञ्चसारतन्त्र-श्रीमद्भागवतादौ च प्राप्तानि स्फोटसाधकतत्त्वानि गौडीयसम्प्रदायोपासकैरुपन्यस्तान्येव नागेशस्य बीजानि, नागेशोपन्यस्तानि वा तत्त्वानि गौडीयानामेतेषामुपजीव्यानीत्यपि समीक्षणीयं प्रसङ्गेऽस्मिन्। यद्यपि महाभाष्यदीपिकादौ उपनिषद्वचनान्युपजीव्य प्रणवरूपत्वं साधितं स्फोटस्य तथापि तत्र तन्त्रप्रभावो न तथाऽवलोक्यत इति तादृशसमीक्षा नितरां सिद्धान्तस्याऽस्याऽपेक्ष्यत एव।

यत्तु प्रत्यक्षाऽर्थापत्योरुपन्यासपूर्वकं स्फोटसद्भावः प्रदर्शितः कविना कर्णपूरेणाऽत्र तन्न शाब्दिकसिद्धान्ताऽनुसारि इति दिक्।

सन्दर्भाः

१. येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति, स शब्दः। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। महाभाष्यम्, पश्पशाह्निकम्।

२. कविकर्णपूरः अलङ्कारकौस्तुभः,पृ. २१

३. तत्रैव। अस्मिन् विषये "स्फोटसिद्धान्त की अर्वाचीन संवाद परम्परा" इत्यस्मल्लेखोऽप्याकलनीयः, उन्मीलने १६.१. अङ्के।

४. लोकनाथचक्रवर्त्तिकृता टीका, तैत्रव

५. तत्रैव, पृ. २४—२५

६. वाक्यपदीये — २—२९ पुण्यराजकृतटीकायाम्?

७. त्रिपाठी, रामप्रसादः, पाणिनीयव्याकरणे प्रमाणसमीक्षा, पृ.२२ भूमिका।

८. तत्रैव, पृ. २९६

९. अलङ्कारकौस्तुभः, पृष्ठ. २९

१०. तथा च गौरवस्य स्वरूपम्– घोच्चारणव्यहितोत्तरटोच्चारणघटितानुपूर्वीशरीरे तदव्यवहितोत्तरत्वं नाम तत्क्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति तत्क्षणध्वंसाधिकरणत्वरूपम्, एतादृशानन्ताव्यहितोत्तरत्वघटितगुरुधर्मस्य कारणतावच्छेदकत्वप्रसङ्गः। एवं "घटेन जलमाहर" इति जले, घटेनाहरेति द्विविधानुपूर्व्यवच्छिन्नस्य कारणत्वे परस्परव्यभिचारवारणाय कारणवैशिष्ट्यमपि कार्यतावच्छेदले निवेशनीयमिति कार्यतावच्छेकेऽपि महागौरवप्रसङ्गः। टीकायां, पृ. २६।

संस्कृत-व्याकरणं प्रति उत्कलीय-वैयाकरण-श्रीवैजलदेव-विरचितायाः प्रबोध-चन्द्रिकायाः-वैजलकारिकायाः अवदानम्

बनमाली बिश्वालः

भूमिका

संस्कृत साहित्ये एकमपि तादृशं क्षेत्रं नास्ति यत् उत्कलीयैः शास्त्रकारैः काव्यकारैश्च अस्पृष्टं स्यात्। तादृशी शाखा नास्ति यत्र तैः किमपि योगदानं न कृतं स्यात्। वस्तुतः साहित्यस्य प्रत्येकं शाखां प्रति तेषां बोद्धिकमवदानम् उल्लेखयोग्यं वर्तते। यद्यपि काव्य–लेखन–प्रक्रिया शास्त्र–लेखन–प्रक्रियां च उत्कले निरवच्छिन्नतया प्रचलन्त्यौ आस्ताम् तथापि प्रायशः मध्ययुगे एव साहित्य–व्याकरण–कोष–दर्शन–ज्योतिष–धर्मशास्त्र–आयुर्वेद–तन्त्र–सङ्गीतशास्त्र–नाट्यशास्त्रादिषु विविधविषयेषु उत्कलीय–शास्त्रकाराणां प्रभूतं लेखनम् अभवत्। अत एव मध्ययुग एव उत्कलीय–शास्त्रकाराणां कृते सुवर्णयुग आसीदिति ऐतिहासिकाः प्रमाणयन्ति। यद्यपि काव्य–महाकाव्य–गीतिकाव्य–स्तोत्र–नाटक–नाटिका–भाण–षट्टकादिक्षेत्रविशेषेषु उत्कलीय–लेखकानां भूमिका अन्यशास्त्रापेक्षया अधिका वर्तते तथापि धर्मशास्त्र–व्याकरण–कोषादिविषयेष्वपि तेषामवदानम् उपेक्षितुं न शक्यते। द्वादशशताब्दितः एकोनविंशशताब्दिं यावत् अन्यूनाः पञ्चदश उत्कलीय– वैयाकरणाः, नैके कोशकाराश्च स्व–स्व–कृतिभिः भारतीय–संस्कृतसाहित्यं समृद्धं कृतवन्तः। तेषु अधोलिखिताः कृतयः कृतिकाराश्च विशेषरूपेण उल्लेख–मर्हन्ति – पुरुषोत्तमदेवस्य भाषावृत्तिनाम्नी महाभाष्यटीका, कविराज–स्कन्धयारस्य कविकर्पटी, कविराजचन्द्रशेखरमहापात्रस्य भाषार्णवः, लक्ष्मिधरउद्गातुः निर्मलदर्पणनाम्नी प्रक्रियाकौमुदी–टीका, वैद्यनाथ–आचार्यस्य व्याकरणवादार्थदीपिका, वसुप्रहराजस्य वसुप्रक्रियानाम्नी सिद्धान्तकौमुदीटीका तथा सारमञ्जरी च वैजलदेवस्य प्रबोधचिन्द्रका अथवा वैजलकारिका, चन्द्रमणिमहन्तस्य शब्दकल्पलता, गोविन्ददासस्य प्रक्रियासारव्याकरणम्, चङ्गदासस्य चङ्गदासकारिका अथवा सम्बन्धोपदेशः, हलधरमिश्रस्य हलधरकारिका, मार्कण्डेयमिश्रस्य प्राकृतसर्वस्वम्, महामहोपाध्यायकृष्णमिश्रस्य

कृष्णमिश्रप्रक्रिया, नरसिंहपट्टनायकस्य शब्दमाला, रघुनाथदासस्य रघुनाथदास–प्रक्रिया, संस्कृतमञ्जरी च तथा चिन्तामणिमिश्रस्य अभिधानसमुच्चयः। एतदतिरिच्य अधोलिखिताः कोषग्रन्थाः अपि उत्कले प्रसिद्धाः अभवन् – पुरुषोत्तमदेवस्य त्रिकाण्डशेषः, हारावली, एकाक्षरकोषः, द्विरेफकोषः, शब्दमाला च, मयूरभञ्जस्य मुग्धबोधाभिधानम्, मुकुन्दमिश्रस्य अनेकार्थमञ्जरी, दैत्यारिदासस्य हरिप्रियानाम्नी अमरकोषटीका, महिधर – मिश्रस्य शिशुबोधिनी, कोषार्थमञ्जरी, नानार्थकोषः तथा शब्दकोषतोला च।

उपर्युक्तेषु व्याकरण–ग्रन्थेषु वैजलदेव–विरचितायाः प्रबोध–चन्द्रिकायाः अथवा वैजल–कारिकायाः स्थानं महत्त्वपूर्णं वर्तते। तस्याश्च कृतेः शास्त्रीयं समीक्षणम् अस्य आलेखस्य आलोच्यविषयः। वैजलदेवस्य त्रीणि नामानि प्रसिद्धानि आसन् – वैजलदवः, वैजलसिंहदेवः[१], वैजलभूपतिश्च[२]। उत्कलप्रदेशस्य पश्चिमे क्षेत्रे पटनाराज्ये लब्धजन्मनः वैजलदेवस्य पितुः नाम विक्रमार्कः[३] आसीत्। 'पटना'[४] इति स्थाननाम्ना भ्रान्तः एच.पी. शास्त्रीयमहोदयः वैजलदेवं विहारप्रदेशीयं प्रमाणायितुं यतते यन्न समीचीनं भाति। यतो हि प्रबोध–चन्द्रिकायामेव स्वयं लेखकेन उक्तम्–

दिग्देशकालयोगे च ग्रामात् पूर्वं स्थितिर्मम।
उत्कलात् पश्चिमं ज्ञेयं पटनाराज्यमुत्तमम्।।[५]

बहवो विद्वांसः[६] सप्तदश–शताब्द्याः पूर्वभागे निवसन्तं पटनायाः चतूर्णां प्रगणानां प्रमुखं वैजलभूपतिं प्रबोधचन्द्रिकायाः लेखकरूपेणापि नाङ्गीकुर्वन्ति। तेषां मतानुसारं इयं कृतिः वैजलभूपतेः सभा–कविना जगमोहनेन वैजलभूपतेः पुत्रं श्रीहिराधरं[७] पाठयितुमेव लिखता आसीत्।

श्रीमान् वैजलभूपालः श्रीहिराधरबालकम्।
सुप्रीतिपरितुष्टात्मा सुतमित्यवदत् पुनः।।[८]

लेखकस्य वैजलदेवस्य मतानुसारं 'प्रबोधचन्द्रिका' कश्चन प्रक्रियाग्रन्थः वर्तते। यद्यपि बहवः प्रक्रियाग्रन्थाः पूर्वमपि आसन् तथापि तैः प्रबोधचन्द्रिकायाः महत्त्वं कथमपि न ह्रीयते इति दम्भोक्तिं पोषयन् लेखकः वदति–

बहवः प्रक्रियाग्रन्थाः सन्ति ते सन्तु का क्षतिः।
मालतीमधुनः क्वापि मधुपानामनादृतम्।।[९]

समीक्षार्थं प्रस्तुतः प्रबोधचन्द्रिकाभिधः व्याकरणग्रन्थः उत्कलीयेषु कारिकायमय–व्याकरणेषु अन्यतमः। हलधरकारिका चङ्गदासकारिका च अपरे द्वे कारिकामये व्याकरणे उत्कले प्रसिद्ध्यतः। न केवलं बालान् अपि तु प्रौढान् विदुषश्च सरलया रीत्या व्याकरणं शिक्षयितुं वैजलभूपतिना प्रबोधचन्द्रिका लिखिता आसीदिति लेखकः स्वयमेव लिखति–

फलदा बालकानां हि भूयाद् विद्यावतां शुभ।।[10]

व्याकरणशिक्षणेन सह पुण्यार्जनम् अपि प्रबोधचन्द्रिकाध्ययनेन भवतीति लेखकः स्वमतं द्रढयितुं ग्रन्थे रामायणाद् एव राम–सीता–लक्ष्मण–भरत–हनुमदादिपात्राणि उदाहरणरूपेण उपस्थापयति। अधोलिखितयोः कारिकयोः स्पष्टमुक्तमस्ति यत् संसारसागरतरणं, अज्ञानान्धकारनाशश्चेति प्रयोजनद्वयमनेन व्याकरणेन सिद्ध्यति।

संसाराम्भोधितरणं रामनामानुकीर्तनम्।
रामनामान्विता तस्मिन् प्रक्रिया क्रियते मया[11]।।
प्रबोधचन्द्रिका नाम रामनामसमाश्रिता।
अज्ञानतिमिरध्वंसकारिणी दुःखहारिणी।।[12]

लेखकः नैष्ठिको रामभक्तः आसीत्। अत एव बहुषु स्थलेषु अन्यपात्रापेक्षया सः श्रीराममेव उदाहरणरूपेण चितवान्। विभक्तिशिक्षणप्रसङ्गे तेन एकं रामपदम् अधिकृत्य सप्तविभक्तीनाम् उदाहरणानि प्रदत्तानि–

रामो मेऽभिहितं करोतु सततं रामं भजे सादरम्
रामेणापहृतं समस्तदुरितं रामाय दत्तं धनम्।
रामान्मुक्तिरभीप्सता सरभसं रामस्य दासोऽस्म्यहम्।
रामे रञ्जतु मे मनः करुणया हे राम ! मां पालय।।[13]

प्रबोधचन्द्रिकायाः एतदुदाहरणम् अस्मिन् प्रसङ्गे अपरमेकम् एतादृशं प्रसिद्धम् उदाहरणं स्मारयति–

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।

रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयं सदा भवतु मे भोः राम! मामुद्धर।[14]

यद्यपि लेखकः वैजलभूपतिः रामभक्तः एव आसीत् तथापि सः शिवविरोधी नासीत्। एकस्यां कारिकायां तेन प्रतिपादितं यत् सः उभयोः हरिहरयोः उपासकः आसीत्–

हरिहरगुरुभक्ता सर्वलोकानुरक्तः ।
त्रिभुवनगतकीर्तिः कान्तिकन्दर्पमूर्त्तिः।।
रणरिपुगणकालो वैजलक्षोणिपालो।
जयति जगति दाता सर्वकर्माविधाता।।[15]

वस्तुतः व्याकरणशिक्षणप्रसङ्गे देवतानामानि उदाहणरूपेण प्रयोक्तुं वैजलभूपतिः प्रथमः नासीत्। तस्मात् पूर्वं वोपदेवजीवगोस्वामीत्यादिभः वैयाकरणैः अपि स्वकीये मुग्धबोधव्याकरणे, हरिनामामृतव्याकरणे च विष्णु–शिवादयः देवाः उदाहरणरूपेण प्रयुक्ताः।

विषयवर्गीकरणम्

४६७–कारिकासु निबद्धः प्रस्तुतः ग्रन्थः सप्तचन्द्रिकासु विभक्तोऽस्ति। यथा– १. विभक्तिचन्द्रिका (स्वादिचन्द्रिका, त्यादिचन्द्रिका च), २. कारकचन्द्रिका, ३. अनुक्तचन्द्रिका, ४. समासचन्द्रिका, ५. तद्धितचन्द्रिका, ६. कृदन्तचन्द्रिका तथा ७. सन्धिचन्द्रिका च। एतासु सप्तचन्द्रिकासु प्रथमा विभक्तिचन्द्रिका स्वादिचन्द्रिका–त्यादिचन्द्रिकेति चन्द्रिकाद्वयेन विभक्ता। वस्तुतः विषयदृष्ट्या सम्पूर्णो ग्रन्थः नवधा विभक्तुं शक्यते–

१.	प्रस्तावना	३६ कारिकाः (१–३६)
२.	स्वादि–चन्द्रिका	६० कारिकाः (३६–९७)
३.	त्यादि–चन्द्रिका	३२ कारिकाः (१–३२)
४.	कारक–चन्द्रिका	५५ कारिकाः (१–५५)
५.	अनुक्त–चन्द्रिका (प्रकीर्ण)	९४ कारिकाः (१–९४)
६.	समास–चन्द्रिका	४० कारिकाः (१–४०)
७.	तद्धित–चन्द्रिका	४० कारिकाः (१–४०)

८.	कृदन्त–चन्द्रिका	३७ कारिका: (१–३७)
९.	सन्धि–चन्द्रिका	७२ कारिका: (१–५५)

सामान्यतया प्राय: सर्वेषु प्रक्रियाग्रन्थेषु सन्धिप्रकरणम् आरम्भे एव योज्यते परन्तु प्रबोधचन्द्रिकायाम् तत् प्रकरणम् अन्तिमम् अस्ति। अस्मिन् ग्रन्थे तु विभक्तय: (स्वादि+त्यादि) प्रारम्भे एव उपदिश्यन्ते। तस्य औचित्यं दर्शयितुं लेखक: वदति–

विभक्तिज्ञानतो यस्मात् प्रबोध: प्रतिपद्यते।
तस्मादिह प्रथमतो विभक्ति: प्रतिपद्यते।।[15]

१. प्रस्तावना

प्रस्तावनाया: ३६–कारिकासु ग्रन्थस्य अवतरणं प्रस्तुतम् अस्ति। ग्रन्थस्य आरम्भे तादृश्य: विद्या: वर्णिता: सन्ति या: राज्याभिषेकात् पूर्वं राजपुत्रा अपि पठेयु:। तासां विद्यानामध्ययने क: क्रमो भवेत् इत्यपि विचार: तत्र वर्तते। अस्यां प्रस्तावनायां राजोचितै: गुणै: सह व्याकरणाध्ययनस्य प्रयोजनान्यपि सम्बद्धानि सन्तीति तथ्यं प्रतिपादितमस्ति। अत्र स्वकीयमभिमतं प्रस्तुवता ग्रन्थकृता प्रतिपादितमस्ति यत् राजान: पूर्वं व्याकरणं पठेयु: अनन्तरं नीतिशास्त्रम्। व्याकरणाध्ययनस्य महत्तरं प्रयोजनं समर्थयितुं ग्रन्थकार: वदति व्याकरणं विना वाणी तथा न शोभते यथा भर्तारं विना रमणी। सम्पूर्णस्यास्य भागस्य सार: अधोलिखताभि: कारिकाभि: उपस्थापयितुं शक्यते–

विना व्याकरणं वाणी रमणी रमणं विना
सुविवेकं विना लक्ष्मीर्न सुखाय कदाचन।
तस्माद् व्याकरणं पूर्वं पठ त्वं बुद्धिवृद्धये।
पश्चान्नीतिं पठित्वा त्वं राज्यं भज यथासुखम्।।[13]
क्रियाकारकविज्ञानान्नीति: सम्यग् विविच्यते।
स्वादि–त्यादि–विभक्ततो दृष्टि: शाब्दी विवर्द्धते।
क्रियाकारकसम्बन्धाद् ज्ञानमुत्पद्यते यथा।
उत्कृष्टा प्रक्रिया सेयं त्वया सम्प्रति पठ्यताम्।।[12]

२. स्वादिचन्द्रिका (विभक्ति–चन्द्रिका)

वैजलभूपतिना स्वादि–त्यादीति भेदेन विभक्ति द्विधा विभक्ता *स्वादित्यादिर्विभक्ती द्वे*।[१९] प्रत्याहारव्यवस्थामाश्रित्य पाणिनिा 'सुप्–तिङ्' इति प्रत्याहारबलेन सर्वेषां सुबन्त–तिङ्न्त–प्रत्ययानाम् उपदेशः विहितः, परन्तु वैजलभूपतेः पद्धतौ प्रत्याहारव्यवस्था एव नासीत्। अत एव तेन स्वादि (सु+आदि) त्यादि (ति+आदि) इत्येवंविधं व्यवस्थाप्रणयनं कृत्वा विभक्ति–प्रत्ययाः निर्दिष्टाः। स्वादौ प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमीतिसंज्ञकाः सप्तविभक्तयः तेषाम् एक–द्वि–बहु–संज्ञानि त्रीणि त्रीणि वचनानि च अन्तर्भूतानि भवन्ति। एवम् आहत्य स्वादि–प्रत्ययाः एकविंशतिसंख्याकाः भवन्ति। अयं च भावः ग्रन्थोक्तेन अधोलिखितेन कारिकाद्वयेन वर्णितोऽस्ति–

..................स्वादौ सप्तविभक्तयः।
एक–द्वि–बहु–संज्ञानि वचनानि च सप्तसुः।।
प्रथमा च द्वितीया च तृतीया च यथाक्रमम्।
चतुर्थी पञ्चमी षष्ठी सप्तमी चेति ताः क्रमात्।।[२०]

ततः पञ्चदशकारिकासु लेखकः वाक्यव्यवहारप्रसङ्गे विभक्ति–प्रयोग–नियमान् सोदाहरणान् दर्शयति। अस्यैव परिच्छेदस्य ५५ तमकारिकतः आरम्य ९२–तमां कारिकां यावत् सः प्रक्रियाग्रन्थ–सरिणमनुसृत्य कारक–प्रकरणसम्बद्धान् प्रमुखान् व्याकरण–नियमान् एकत्र उपदिशति। कारक–प्रकरणस्य उपपद–विभक्ति–सम्बद्धाः विषयाः अस्यां चन्द्रिकायां प्रदत्ताः उदाहरणार्थं यथा–

शीङ्स्थासामधिपूर्वाणामाधारः कर्म तद्यथा।
अधिशेते वनं रामो ह्यध्यास्ते वाऽधितिष्ठति।।[२१]
अन्तरान्तरेण योगे द्वितीया स्याद् विनाऽपि च।
न मुक्तिर्जायते राममन्तरेणान्तरा विना।।
समया–निकषा हाधिगुपर्यध्यधसमापि।
आङः संयोगेऽपि भवेद् द्वितीया समुदाहता।।
काननं समया रामो निकषा भरतः पुरीम्
हा सीतं विपिने शून्ये रावणं धिग् जहार यः।[२२]

३. त्यादि–चन्द्रिका (विभक्ति–चन्द्रिका)

त्यादि–परिच्छेदः प्रथमपुरुष–मध्यमपुरुष–उत्तमपुरुषादि–पुरुषव्यवस्थया आरभ्यते। अस्मिन्नपि प्रकरणे त्रयाणामेव पुरुषाणाम् एक–द्वि–बहु–संज्ञानि त्रीणि त्रीणि वचनानि भवन्तीति प्रतिपाद्यते ग्रन्थकारेण। एवम् एकस्य धातोः नव क्रियापद–प्रत्ययाः भवन्ति–

त्रयः स्युः पुरुषास्त्यादेः प्रथमो मध्यमोत्तमौ।
एक–द्वि–बहु–संज्ञं च त्रिषु स्याद्...।।[23]

'तिप्–तस्–झि–सिप्–थस्–थ–मिप्–वस्–मस्' इत्यादि नव परस्मैपदिनः प्रत्ययाः, 'त–आताम्–झ–थ–आथाम्–ध्वम्–इट्–बहिङ्–महिङ्' इत्यादि नव आत्मनेदिनः प्रत्ययाः भवन्ति। सर्वमाहत्य अष्टादश क्रियापद–प्रत्ययाः भवन्ति–

त्यादिनां नवपूर्वार्धं परस्मैपदमुच्यते।
उत्तरार्द्धं नव ज्ञेयमात्मनेपदसंज्ञकम्।।[24]

पूर्वार्ध–नव–प्रत्ययाः परस्मैपदिनः, उत्तरार्द्ध–नवप्रत्ययाः आत्मनेपदिनः इति उभयविधधातो स्थूलं लक्षणं ग्रन्थकृता प्रस्तुतम्। एषु परस्मैपदिनः प्रत्ययाः कर्तृवाच्ये प्रयुक्ताः भवन्ति तथा आत्मनेपदिनः प्रत्ययाः भाववाच्ये, कर्मवाच्ये कर्तृवाच्ये च प्रयुक्ताः भवन्ति–

परस्मैपदमादिष्टं धातोः कर्तरि केवलम्।
यथा खादति रामोऽयं लक्ष्मणेन सहौषधम्।।
आत्मनेपदमादिष्टं भावे कर्मणि कर्तरि।
तत्र भावे यथाऽरण्ये रामेण तत्र शीयते।।
यथा कर्मणि रामेण जीयते शत्रुरुद्धतः।
यथा कर्तरि रामस्य शोभते मुखमिन्दुवत्।।[25]

धातवो द्विविधाः भवन्ति – सकर्मकाः अकर्मकाश्च। सकर्मकेषु धातुषु त्यादिप्रत्ययानां प्रयोगः कर्मणि, कर्तरि च भवति। अकर्मकेषु धातुषु त्यादिप्रत्ययानां प्रयोगः कर्तरि भावे च भवति –

सकर्मकाः कर्महीनाः धातवो द्विविधाः मताः।
सकर्मकाणां धातूनां त्यादिकर्मणि कर्तरि।।
अकर्मकाणां धातूनां भावे कर्तरि जायते।।[३६]

४. कारकचन्द्रिका

ग्रन्थेऽस्मिन् कर्तृ–कर्म–करण–सम्प्रदान–अपादान–अधिकरण–संज्ञकानां षट्कारकाणां चर्चा भवति। अधिकरणकारकस्य कृते लेखकेन आधार–शब्दस्य प्रयोगः कृतः। मन्ये छन्दोदृष्ट्या कारिकायाम् आधार–शब्दः एव उचितः स्यात्।

अथ षट्कारकाण्याहुः कथ्यन्ते कथितान्यपि।
ततः सप्तविभक्तीनां कारकत्वेन दर्शिताः।।
कर्ता कर्म करणं च सम्प्रदानं तथैव च।
अपादानं तथाधार इति षट्कारकाणि वै।।[३७]

कारकप्रकरणे ग्रन्थकारः किमपि नूतनं तथ्यं प्रस्तौति इति न। पूर्वसूरिभिः प्रतिपादितं सिद्धान्तमेव सः सरलया रीत्या उपस्थापयति। अत्र कारकाणां ये उपभेदाः दर्शिताः, ते एव अस्य ग्रन्थस्य वैशिष्ट्यं सूचयन्ति। सम्बन्धस्य कारकत्वं निराकर्तुं स वदति–

सम्बन्धस्य न शब्दज्ञैः कारकत्वमिहोच्यते।[३८]

क्रियान्वयित्वं कारकत्वम् इति प्रसिद्धं कारकस्य लक्षणमपि वैजलेन अनुमतम्। अत एव तेन 'साक्षात् क्रियाभिः सम्बन्धः' इति कारकलक्षणं विहितं स्वग्रन्थे–

साक्षात् क्रियाभिः सम्बन्धः कारकं हि विदुर्बुधाः।।[३९]

न केवलं कारकसामान्यस्य अपि तु सर्वेषां षट्कारकाणां लक्षणानि अपि ग्रन्थकृता विहितानि सन्ति अस्मिन् ग्रन्थे–

सः कर्ता यः क्रियां साक्षादुत्पादयति सर्वत्र।
तत्कर्म क्रियया यत्तु विषयीक्रियततेराम्।।

क्रिया निष्पद्यते येन करणं तदुदाहृतम्।
सम्प्रदानं तदैव स्याद् यस्मै सम्यक् प्रदीयते।।
यदपादीयते नूनं तदपादानमुच्यते।
यत्रैव धीयते सर्वं स एवाधार उच्चते।।[३०]

एतानि षट्कारकाणि अपि पुनः केषुचित् उपभेदेषु विभक्तानि सन्ति ग्रन्थकृता। ते च उपभेदाः आहत्य त्रयोविंशति–संख्याकाः भवन्ति। तेषाम् उपभेदानां नामानि, लक्षणानि, उदाहरणान्यपि अस्मिन् ग्रन्थे ४५–कारिकासु (४.६ तः ४.५१यावत्) वर्णितानि सन्ति। वैजलस्य समग्रं कारकचक्रम् इत्थं प्रस्तोतुं शक्यते–

१. कर्तृकारकम् पञ्चविधम्। क्रमशः तेषां नामानि, लक्षणानि, उदाहरणानि च यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते–

(i) स्वतन्त्रः कर्ता – क्रियासु निरपेक्षः यथा – रामं भजामि।
(ii) हेतु–कर्ता – यः कुर्वन्तं कारयेत् – यथा सीता रामं वनं यापयति।
(iii) कर्म–कर्ता – यथा – ओदनं पच्यते स्वयम्।
(iv) उक्तः कर्ता – यथा – रावणं हन्ति।
(v) अनुक्तः कर्ता – यथा – रामेण हन्यते रिपुः।

२. कर्मकारकम् – त्रिविधम्। क्रमशः तेषां नामानि, लक्षणानि, उदाहरणानि च यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते–

(i) निवर्त्यम् – यत् पूर्वमनिवृत्तम् – यथा – घटयामि सुवर्णान्।
(ii) कार्यम् – यद् विक्रितं क्रियते – यथा – रामः काण्डं लुनाति।
(iii) प्राप्यम् – पञ्चविधम् – ईप्सितम्, अनीप्सितम्, उभयम्, कथितम्, अकथितम् च।

३. करणकारकम् – द्विविधम्। क्रमशः तयोः नामलक्षणोदाहरणानि यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते–

(i) आभ्यन्तरम् – शरीरावयवादियत्तदाभ्यन्तरमुच्यते – यथा – रामं मानसेन भजामि।

(ii) बाह्यम् – तदभिन्नं बाह्यमाख्यातम् – यथा – अयोध्यां दोलया याति

४. **सम्प्रदानकारकम्** – त्रिविधम्। क्रमशः तेषां नामानि, लक्षणानि, उदाहरणानि च यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते –

(i) प्रेरकम् – यथा – मुक्तिं भक्ताय रामोऽसौ ददाति, मह्यं मुक्तिं प्रदेहि।

(ii) अनुमन्त्रकम् – यथा रामाय फलमूले दत्ते।

(iii) अनिराकर्तृकम् – यथा पञ्चोपचारं रामाय भक्तलोकः प्रयच्छति।

५. **अपादानकारकम्** – द्विविधम्। क्रमशः तयोः नामलक्षणोदाहरणानि यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते –

(i) चलम् – यथा – चलापाङ्गाद्धि नारीणां निर्याति विषमं विषम्

(ii) अचलम् – यथा – अचलं च यथा वृक्षात् पत्रं रामे पतत्यधः। हिमाद्रेरागता गङ्गा समुद्रादुत्थितं रत्नम्।

६. **आधारकारकम्** – चतुर्विधम्। क्रमशः तेषां नाम–लक्षणोदाहरणानि यथा पुस्तके उपलभ्यन्ते अत्र प्रस्तूयन्ते–

(i) व्यापाकम् – यथा – रामभक्ते भवेन्मुक्तिः।

(i) **औपश्लेषिकम्** – यथा – रामः सिंहासने स्थितः।

(i) **वैषयिकम्** – यथा – वने वसति सिंहः।

(i) सामीपिकम् – यथा – गङ्गायां वसति स्वयम्।

५. अनुक्तचन्द्रिका (प्रकीर्णम्)

अनुक्तचन्द्रिकायां प्रतिपादिताः विषयाः विविधाः सन्ति। ते च विषयास्तत्र वर्गीकृताः न दृश्यन्ते। परन्तु अस्य परिच्छेदस्य मनोहरत्वं स्वयं लेखकेन अङ्गीकृतमस्ति–

प्रबोधचन्द्रिकायां च कृतौ वैजलभूपतेः।
अनुक्तचन्द्रिका सम्यक् समाप्ता हि मनोहरा।।[31]

अयं परिच्छेदः न कमपि विषयविशेषं प्रस्तौति। व्याकरणस्य बहवः सामान्यविषयाः अत्र प्रतिपादिताः सन्ति। अतः अत्र प्रतिपादिताः विषयाः एकस्मिन् विषयविन्दौ एकस्मिन् नियमविशेषे वा स्थापयितुं न शक्यन्ते। अत एव लेखकेन अस्य परिच्छेदस्य नाम सम्भवतः 'अनुक्तचन्द्रिका' इति कृतं स्यात्। विषयवैविध्यं दृष्ट्वा अस्मिन् आलेखे अस्य परिच्छेदस्य नाम प्रकीर्णम् इति विहितम्।

आरम्भे लेखकेन कृत्–तद्धित–समासानां प्रसङ्गे लिङ्ग–वचन– विभक्ति–व्यवस्था निर्दिष्टा। तस्य मतानुसारं कृत्–तद्धित–समासेषु लिङ्गत्रयं सम्भवति। कृदन्तस्य उदाहरणं यथा – *रामोऽसौ कारकः सीता कारिका कारकं कुलम्* ।[32] तद्धितस्य उदाहरणं यथा – *वैयाकरणः, वैयाकरणी, वैयाकरणम् च।*[33] समासस्य उदाहरणं यथा – *कृतप्रणामः, कृतप्रणामा, कृतप्रणामम् च* ।[34] विशेष्याणां लिङ्ग–विभक्ति–वचनानि विशेषणपदेषु अपि योज्यन्ते।

विशेष्यस्य हि यल्लिङ्गं विभक्तिवचनं च यत्।
तानि कार्याणि योज्यानि विशेषणपदे बुधैः।।[35]

संख्याविषये स्वाभिमतं स्पष्टीकुर्वन् ग्रन्थकारः वदति – विंशत्यादि–संख्यानां प्रयोगः सर्वदा एकवचने एव भवति – *विंशत्याद्याः सदैकत्वे*।[36] समुच्चयप्रसङ्गे किन्तु एक–द्वि–बहुवचनानां प्रयोगार्थं विकल्पः प्रस्तुतः लेखकेन। यथा –

श्रीरामश्च सीता चैव वनं गच्छति गच्छतः।
रामश्च लक्ष्मणश्चापि भरतश्च प्रयान्ति हि।।
प्रयाति वा पुरीं स्वीयां जेता जेतार एव च।।[37]

समुच्चयप्रसङ्गे वाक्ये प्रयुक्तेनअन्तिमपुरुषेणैव पुरुष–व्यवस्थायाः नियमनं भवति। तथा चोक्तं ग्रन्थकारेण–

पुरुषेषु त्रिषु भवेद्य एव पुरुषः परः।
समुच्चये स एव स्यात् सङ्ख्या चापि तदाश्रिता।।

यथा रामश्च सीता च गच्छतो निर्जनं वनम्।
रामं त्वमहमित्यनुगच्छावो गुरुशासनात्।।[३८]

परन्तु उपर्युक्तस्य नियमस्य कश्चन अपवादोऽपि वर्तते। यदि वाक्ये उत्तमपुरुषस्य कश्चित् कर्ता भवेत् तर्हि क्रमम् अविगणय्य उत्तमपुरुषानुसारमेव क्रियापदं प्रयोक्तव्यम्। यथा –

अहं च त्वं रामश्च गच्छामो निर्जनं वनम्।
प्रथमादिक्रमादेव व्युत्क्रमो वादितोऽपि च।।[३९]

अभिव्यक्तिप्रसङ्गे सामान्यतः प्रयोगस्त्रिविधो भवति – मुख्यः गौणो लाक्षणिकश्च। मुख्यप्रयोगे पदानि स्वार्थे प्रयुक्तानि स्युः, गौणप्रयोगे पदानाम् अभिधार्थः (स्वार्थः) गौणः भवेत्, लाक्षणिकप्रयोगे तु प्रयुक्तानां पदानाम् अभिधार्थः पूर्णरूपेण त्यक्तो भवति। तत्र अभिव्यक्तेः अभीष्टोऽर्थः लक्षणया बुध्यते। लक्षणाऽपि द्विविधा भवति जहत्स्वार्था अजहत्स्वार्था च। जहत्स्वार्थायां पदानाम् स्वार्थाः पूर्णरूपेण त्यज्यन्ते, कश्चन अतरिक्तोऽर्थश्च बुध्यते। अजहत्स्वार्थायां तु पदेभ्यः स्वार्थसम्बलितः अतरिक्तोऽर्थः बुध्यते।

मुख्यः गौणो लाक्षणिकः प्रयोगस्त्रिविधो भवेत्।
मुख्यः स्वार्थेन सम्पन्नो यथाऽन्यन्नं रमूद्वहः।।
गुणयोगाद् भवेद् गोणौ रामक्रोधो विषं महत्।
खरं प्रति यथा रामो रामश्च रावणं प्रति।
स्वार्थान्वयस्य रोधेन तात्पर्यस्यानुरोधतः।
लक्षणा कल्पते साऽपि द्विविधा स्यात् प्रयोगतः।।
जहत्स्वार्थाऽजहत्स्वार्था तत्राद्या कथ्यते मया।
रामो वसति यथाब्धौ यमुायां जनार्दनः।।
यत्र स्वार्थपरित्यागोऽजहत्स्वार्था च सा यथा।।
छत्रिणो यान्त्यमी काशीं काकेभ्यो दधि रक्ष्यताम्।।[४०]

६. समासचन्द्रिका

वैजलदेवेन तत्पुरुष—कर्मधारय—बहुव्रीहि—द्विगु—द्वन्द्व—अव्ययीभावादिभेदैः समासः षड्धा विभक्तः।[४१] पुनः पञ्तजलिसरणिम् अनुसृत्य पदार्थप्राधान्यम् आधारीकृत्य च तेन समासस्य चतुर्विधत्वमपि प्रोक्तम्। यथा —

> द्विगुर्द्वन्द्वाव्ययीभावः प्राधान्यं च चतुर्विधम्।
> पूर्वोत्तरोभयान्यानां पदार्थानां विकल्पनात्।।[४२]

पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, उभयपदार्थप्रधानो द्वन्द्वः इत्येतादृशी व्यवस्था पतञ्जलिना महाभाष्ये कल्पिताऽस्ति।[४३] प्रसङ्गेऽस्मिन् वैजलदेवस्य किमपि वैशिष्ट्यमपि द्रष्टुं शक्यते। तस्य मतानुसारं अव्ययीभावसमासः त्रिप्रधानो भवति, तत्पुरुष—बहुव्रीहि—कर्मधारयाः द्विप्रधानाः, द्विगु—द्वन्द्वौ च द्विप्रधानौ भवतः। ग्रन्थकारस्य समासव्यवस्था सामग्रिकरूपेण इत्थं प्रस्तोतुं शक्यते—

१. तत्पुरुषः — द्विप्रधानः (पूर्वपदार्थः+उत्तरपदार्थः) — यथा — परकायः, नीलोत्पलम्।
२. कर्मधारयः — द्विप्रधानः (पूर्वपदार्थः + उत्तरपदार्थः) — यथा — पुरुषसिंहः, नीलोत्पलम्।
३. बहुव्रीहिः — द्विप्रधानः (अन्यपदार्थः + उभयपदार्थः) — यथा — स्मृतरामोऽहम्, द्वित्राः, पञ्चषाः।
४. द्वन्द्वः — एकप्रधानः (उभयपदार्थः) — यथा रामलक्ष्मणौ।
५. द्विगुः — एकप्रधानः (उभयपदार्थः) यथा — त्रीमूली, पञ्चाङ्गुली इत्यादयः।
६. अव्ययीभावः — त्रिप्रधानः (पूर्वपदार्थः + उत्तरपदार्थ + अन्यपदार्थः) — यथा — उपरामम्, सुखंप्रति, उन्मत्तमगङ्गम् च।

एवमनुभूयते यद् वैजलदेवः कौण्डभट्टादीनां नवीनानां वैयाकरणानां समासनिष्ठ—लक्षण—भेदादिविचारविषयेऽपि पूर्णः सचेतनः आसीत्। यैः पतञ्जलि—प्रतिपादित—पूर्वपदार्थप्रधान—उत्तरपदार्थप्रधानादिलक्षणप्रसङ्गे अव्याप्ति—अतिव्याप्ति—असम्भवादिदोषाः प्रदर्शिताः। तांश्च दोषान् निराकर्तुं कदाचिद् ग्रन्थकारेण समास—लक्षणप्रसङ्गे एक—प्रधान—द्विप्रधान—त्रिप्रधानरूपा कल्पना कृता स्यात्। समासानां क्रमविधानप्रसङ्गेपि ग्रन्थकारः

अव्ययीभावसमासम् अन्ते किमर्थं परिगणयतीति अस्माद् ग्रन्थात् स्पष्टं न भवति। मन्ये अत्रापि कारिकानिर्माणे छन्दोभङ्गादिदोषान् दूरीकर्तुं तेन अयं क्रमः निश्चितः स्यात्।

अस्मिन्नेव ग्रन्थे ग्रन्थकारेण समासस्य कश्चन अन्यथाविभागोऽपि प्रस्तुतः। समासस्य चतुर्धा–विभजनमपि अत्र द्रष्टुं शक्यते – १. नित्यः (यथा कुम्भकारः), २. अनित्यः (यथा राजपुरुषः), ३. लुक् (यथा पुरुषपुङ्गवः), तथा ४. अलुक् (यथा कण्ठेकालः) च।

समासानां पुनश्चैषां चातुर्विध्यं निगद्यते।
स्यान्नित्यत्वमनित्यत्वं लुकं चालुकमेव च।।[१४]

एतदतिरिच्य अत्र समासानां केचन उपविभागाः अपि कल्पिताः सन्ति –

१. तत्पुरुषस्य अष्टौ भेदाः – प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमी–नञ् इति भेदात्

२. कर्मधारयस्य सप्तभेदाः – विशेषणपूर्वपद–विशेषणोत्तरपद–विशेषणोभयपद–उपमानपूर्वपद–उपमानोत्तरपद–अवधारणापूर्वपदादिभेदात्।

३. बहुव्रीहेः भेदद्वयम् – द्विपद (प्रथमां विहाय षड् विभक्तीनां षड्भेदाः) बहुपदभेदात्

४. द्विगोः भेदद्वयम् – एकवद्भावी (यथा पञ्चमूली) अनेकपदभावि (यथा त्रिलोकाः) इति भेदात्

५. द्वन्द्वस्य भेदचतुष्टयम् – समुच्चय–अन्वाचय–इतरेतरयोग–समाहारादिभेदात्

६. अव्ययीभावस्य भेदद्वयम् – नामपूर्वपद (यथा प्रतिगृहम्) – अव्ययपूर्वपद (यथा उपतोरणम्) इति भेदात्।

७. तद्धितचन्द्रिका

सम्पूर्णः तद्धितपरिच्छेदः सामान्यवृत्ति–अव्ययसंज्ञ–भावार्थ–वाचकादिभेदात् त्रिधा विभक्तः–

तद्धितास्त्रिविधा ज्ञेयाः केचित् सामान्यवृत्तयः।
केचिदव्ययसंज्ञाश्च केचिद् भावार्थवाचकाः।।[१५]

एषु भेदेषु सामान्यवृत्तिभेदः व्यापको वर्तते यस्मिन् 'तदस्यास्ती' त्याद्यर्थे मतुप्–प्रत्ययः 'तस्यापत्यम्, तदस्य जातम्' इत्याद्यर्थे अणदि–प्रत्ययः, तरप्–प्रत्ययादयश्च अन्तर्भूक्ताः भवन्ति। 'यत्र–तत्र–अधुने'त्यादीनि अव्यय–पदानि अव्ययसंज्ञतद्धितस्य उदाहरणरूपेण, 'पटुता–गरिमा' इत्यादीनि पदानि भावार्थवाचकताद्धितस्य उदाहरणरूपेण उदाहृतानि सन्ति।

८. कृदन्तचन्द्रिका

सामान्यतः भावार्थे, कर्मार्थे, कर्त्रर्थे, च कृत्–प्रत्ययाः भवन्ति–

कृतस्त्रिष्वपि वर्तन्ते भावे कर्मणि कर्तरि।[४६]

ग्रन्थे 'विजय–विनय–नम–दम–पचन–ज्ञान–मुक्ति–भुक्तीत्यादीनि कृदन्तपदानि भावार्थवाचकस्य उदाहरणरूपेण उदाहृतानि।[४७] ग्रन्थकारेण कर्म 'सकर्मकर्म–भावकर्म'–भेदेन द्विधा विभक्तम्'। तीर्णः, निर्जितः इत्यादीनि पदानि ग्रन्थे प्रयुक्तानि सकर्म–कर्मणः उदाहरणानि।

सकर्मकर्मणि यथा तीर्णो रामेण सागरः।
निर्जितो रावणो वैरी सीता नीता पुरीं निजाम्।।[४८]

ग्रन्थे प्रयुक्तानि भावकर्मणः उदाहरणानि यथा –

भावे यथा कर्मकेभ्यः स्थितं रामेण काननम्।
सुप्तो राजा निशि सदा रमितं तेन सीतया।।[४९]

कर्त्रर्थे, कर्मार्थे भावार्थे च कृदन्तस्य उदाहरणानि प्रस्तुवन् ग्रन्थकारः वदति–

अयोध्या च गतो रामः कर्तरीत्यादि गम्यताम्।
तव्यादयः कर्मणि स्युर्भावे च निवसन्त्यमी।।[५०]

९. सन्धिचन्द्रिका

सन्धिप्रकरणे ग्रन्थकृता न किमपि वैशिष्ट्यमाचरितमिति भाति। अस्य प्रकरणस्य

कारिकासु स्वरसन्धि–प्रकृतिभाव–व्यञ्जनसन्धि–विसर्गसन्धीत्यादीनां चतुर्णां सन्धिभेदानां सारभूताः नियमाः उदाहरणानि च प्रतिपादितानि सन्ति। यणसन्धिः[५१] (यथा रामवार्यस्ति, जानक्येषा), गुणसन्धिः[५२] (यथा अद्योढा), वृद्धि–सन्धिश्च[५३] (यथा स्वैरम्, स्वरिणी) स्वरसन्धिविभागे चर्चिताः सन्ति। प्रकृतिभावश्च उदाहरणरूपेण 'सीते आगच्छ'[५४] इति उदाहरणं ग्रन्थकारेण कल्पिमस्ति। अस्मिन् ग्रन्थे प्रकृतिभावस्य कृते 'प्रकृतिवद्भाव' इति शब्दः प्रयुक्तः वर्तते।

वस्तुतः ग्रन्थकारस्य सन्धिविधानपद्धतिः अतीव सरला वर्तते। तेन केषुचन स्थलेषु नियमविशेषप्रणयनपुरःसरं सन्धिः निर्दिष्टः। यथा व्यञ्जनसन्धिप्रसङ्गे ग्रन्थकारः वदति यद् घोषवति स्वरे परे वर्गप्रथमः वर्गतृतीये परिवर्तितो भवति इति। परन्तु वर्गस्य पञ्चमे वर्णे परे सति वर्गप्रथमः विकल्पने वर्गतृतीये अथवा वर्गपञ्चमे परिवर्तितो भवति।

वर्गप्रथमं वर्गाणां पदानां च तृतीयका।
घोषवत्सु स्वरे चैव भवन्ति हि न संशयः।।
पञ्चमे पञ्चमा वा स्युस्तृतीया वेति या वेति।[५५]

चवर्गे, टवर्गे, लकारे च पर तवर्गस्य पररूपत्वम् ईष्यते–

चवर्गे च टवर्गे च लकारे च तथापरे।
पररूपं तवर्गस्य कथ्यते तदुदाहृतिः।।[५६]

विसर्गसन्धौ विसर्जनीयस्य पररूपं विकल्पेन भवति–

विसर्गः पररूपत्वं भजति हि विभाषया।[५७]

च–छ–कारयोः परे विसर्जनीयस्य शकारः भवति तथा ट–ठकारयोः परे विसर्जनीयस्य षकारः भवति। ''रामो हसति, रामोऽयम्' इत्यादिषु विसर्जनीयस्य उत्वं भवति।

चछयोः शकारो यथा रामश्चरति काननम्।[५८]
ट ठे षकारश्च यथा रामष्टिकाविशारदः।[५९]
रामो हसति रामोऽयमित्यादौ चोत्वमिष्यते।।[६०]

निष्कर्ष:

१. अभिनवोऽयं उत्कलीय: कारिकामय: प्रक्रियाग्रन्थ: यथा बालकानाम् अव–बोधार्थम् उपयोगी तथा विदुषां व्याकरणज्ञानपुष्ट्यै अपि उपयोगी प्रतीयते। तथ्यमिदं स्वयमेव ग्रन्थकारेणापि प्रतिपादितम् –

अथ बालकबोधार्थं सम्यक् सान्धिनिगद्यते।[61]
फलदा बालकानां हि भूयाद् विद्यावतां शुभा।[62]

२. अयं च व्याकरणग्रन्थ: प्रामुख्येन उदाहरणपरको वर्तते।

३. पुस्तकस्थानि सर्वाणि उदाहरणानि राम–सम्बद्धानि अथवा रामकथा–सम्बद्धानि सन्ति।

४. अस्य ग्रन्थस्य कारिकामयस्वरूपं शिशुक्षु–पाठकानां सुखाय भवति। अस्य ग्रन्थस्य पठनेन व्याकरण–विषयनिष्ठं क्लिष्टत्वं सर्वथा न अनुभूयते।

५. अस्य ग्रन्थस्य कारक–प्रकरणं समासप्रकरणं च अन्यप्रकरणापेक्षया व्यापके स्त:। अत एव एते व्याकरण–शिशुक्षूणाम् महते उपयोगाय कल्प्येताम्। अपराणि च नातिदीर्घाणि प्रकरणानि संक्षेपेण सम्बद्धान् विषयान् प्रस्तुवन्ति। तान्यपि व्याकरण–शिशुक्षूणाम् उपकाराय एव।

६. उपलब्धेषु अन्येषु प्रक्रियाग्रन्थेषु प्राय: पुरातनानि एव उदाहरणानि उदाहृतानि उपलभ्यन्ते किन्तु अस्मिन् ग्रन्थे ग्रन्थकारेण सर्वत्र नूतनानि एव उदाहरणानि प्रयुक्तानि।

सन्दर्भा:

प्रबोधचन्द्रिका, संपादक:, जे.एल. शास्त्री, प्रकाशक – ईस्टर्न बुक लिंकर्स, दिल्ली, १९७९।

१. द्र. संस्कृत–हस्तलेखोपरि एच.पी.शास्त्रिण: अनुसन्धानपरकं विवरणम् (**H.P. Shastri's report on the search of Sanskrit Manuscripts**) १९०६–११, पृ. ६

२–३. इति श्रीविक्रमार्क–तनय–वैजलभूपति विरचिता वैयाकरण–प्रबोधचन्द्रिका समाप्ता। पुष्पिता वाक् (colophon) गङ्गानाथ–झा– केन्द्रीय–संस्कृत–विद्यापीठस्य हस्तलेख–संख्या ३८६६– ४३०८/ २४६

४. इतिश्रीपटनाधिनाथ–भूपति–शिरोमणि–वैजलभूपाल–विरचिता वैयाकरण–प्रबोधाचन्द्रिका। पुष्पिता वाक् (colophon) गङ्गानाथ झा–केन्द्रीय–संस्कृत–विद्यापीठस्य हस्तलेख–संख्या ३८६४–४४१/३४

५. प्रबोधचन्द्रिका – १.८०–८१

६. एच.पी.शास्त्री, एकस्यां कारिकायां लिखति यत् वैजलदेव: १५७२ शकाब्दे (१६५० ई.) दिवं गत इति। द्र. संस्कृतहस्तलेखोपरि अनुसन्धानपरकं विवरणम्

७. द्र. दीनबन्धु–त्रिपाठिन: आलेख: (Versified Exposition in Sanskrit Grammar based on Orissan contribution with particular referecne to वैजलकारिका) वाणिज्योति:, भाग:–१, भुवनेश्वर, १९८६, पृ. ६३–६६

८. प्रबोधचन्द्रिका १.२८

९. प्रबोधचन्द्रिका १.३६

१०. प्रबोधचन्द्रिका ८.७२

११. प्रबोधचन्द्रिका १.९

१२. प्रबोधचन्द्रिका १.३५

१३. मङ्गलाचरणम्, प्रबोधचन्द्रिका

१४. मध्य–सिद्धान्त–कौमुदी

१५. प्रबोधचन्द्रिका १.१

१६. प्रबोधचन्द्रिका १.३७

१७. प्रबोधचन्द्रिका १.३१–३२

१८. प्रबोधचन्द्रिका १.३०,१.३४

१९. प्रबोधचन्द्रिका १.३८

२०. प्रबोधचन्द्रिका १.३८–३९

२१. प्रबोधचन्द्रिका १.५३

२२. प्रबोधचन्द्रिका १.५८–६०

२३. प्रबोधचन्द्रिका २.१–२
२४. प्रबोधचन्द्रिका २.७
२५. प्रबोधचन्द्रिका २.८–१०
२६. प्रबोधचन्द्रिका २.११, २.१३
२७. प्रबोधचन्द्रिका ३.१–२
२८. प्रबोधचन्द्रिका ३.५२
२९. प्रबोधचन्द्रिका ३.५३
३०. प्रबोधचन्द्रिका ४.३५
३१. प्रबोधचन्द्रिका ५.६४
३२. प्रबोधचन्द्रिका ५.३
३३. प्रबोधचन्द्रिका ५.६
३४. प्रबोधचन्द्रिका ५.७
३५. प्रबोधचन्द्रिका ५.१५
३६. प्रबोधचन्द्रिका ५.३१
३७. प्रबोधचन्द्रिका ५.१५
३८. प्रबोधचन्द्रिका ५.३७
३९. प्रबोधचन्द्रिका ५.३८
४०. प्रबोधचन्द्रिका ५.३९–४४
४१. प्रबोधचन्द्रिका ६.१
४२. प्रबोधचन्द्रिका ६.२
४३. महाभाष्यम्, भाग–१, सं.कील्हर्ण, पृ. ३७९,पा.सू. २.१.६
४४. प्रबोधचन्द्रिका ६.१३
४५. प्रबोधचन्द्रिका ७.१
४६. प्रबोधचन्द्रिका ८.१
४७. प्रबोधचन्द्रिका ८.१–३
४८. प्रबोधचन्द्रिका ८.६
४९. प्रबोधचन्द्रिका ८.७
५०. प्रबोधचन्द्रिका ८.८

५१. प्रबोधचन्द्रिका ९.३

५२. प्रबोधचन्द्रिका ९.१८

५३. प्रबोधचन्द्रिका ९.१८

५४. प्रबोधचन्द्रिका ९.१९

५५. प्रबोधचन्द्रिका ९.२८–२९

५६. प्रबोधचन्द्रिका ९.३८

५७. प्रबोधचन्द्रिका ९.४९

५८. प्रबोधचन्द्रिका ९.५१

५९. प्रबोधचन्द्रिका ९.५२

६०. प्रबोधचन्द्रिका ९.५७

६१. प्रबोधचन्द्रिका ९.१

६२. प्रबोधचन्द्रिका ९.७२

श्रीहरिनामामृतव्याकरणस्य शास्त्रीय-वैशिष्ट्यम्

सुनेलि देई

१.० उपक्रम:

विदितमिदं समेषां विदुषां यत् खैस्तीय षोडशशतके वृन्दावनवास्तव्य षड्गोस्वामिषु अन्यतमेन वैष्णवाचार्येण विदुषा श्रीजीवगोस्वामिना वैष्णवानां संस्कृतव्याकरणशिक्षार्थं हरिनामपरकसंज्ञाभि: समलङ्कृतं किमपि विलक्षणं व्याकरणं निर्मितम्। एतद् व्याकरणं वैष्णवसम्प्रदाये प्रसिद्धम्। एतद्व्याकरणरचनाया: उद्देश्यं पुन: एतस्य मङ्गलाचरणश्लोकै: सम्यक् अनुसन्धेयम्। वैष्णवा: स्वदिनचर्यायां प्रतिमुहूर्त्तं हरिमयं कर्त्तुं प्रयतते। लौकिकव्याकरणस्वाध्यायाभ्यासप्रयोगसमये हरिनामभ्य: व्यवहिता: न भवेयु: इति धिया तदर्थम् एतस्य सृष्टि:। किन्तु एतस्मिन् उद्यमे सफलतायै पूर्वाचार्य्याणां व्याकरणेभ्य: मौलिकतत्त्वानि समादाय तत्र तत्र स्वदर्शनानुगुणं यथेच्छं परिवर्त्तनं तेन विहितं दृश्यते। तानि परिवर्त्तनानि एव विशिष्टतामावहन्ति। तेषु वैशिष्ट्येषु कतिचन विदुषां पुरस्तात् प्रस्तूयन्ते।

१.१.० संज्ञानिर्माणगतवैशिष्ट्यम्

हरिनामपरकाणां संज्ञानां व्याकरणेऽस्मिन् प्रयोगात् इदं व्याकरणं श्रीहरिनामामृत-व्याकरणमित्युच्यते। अतएव संज्ञानां किमपि अनुपमं वैशिष्ट्यमस्ति। शास्त्रनिर्माणाय अथवा शास्त्रनिर्माणे यानि कौशलानि अवलम्बितानि तद्विशेषरूपेण शास्त्रीयवैशिष्ट्यमिति अभीप्सितम्। किन्तु सामान्यरूपेण ग्रन्थस्य विविधस्थलेषु रूपनिर्माणगता अथवा अर्थप्रतीतिसाधिका काचित् नवीनता तदितरग्रन्थेभ्य: परिलक्ष्यते विशेषत: पाणिनित:। तत्सर्वं शास्त्रीयवैशिष्ट्यरूपेण अत्र विविक्षतं वर्त्तते।

१.१.१ संज्ञानिर्माणे पूर्वाचार्यपद्धतेः व्यतिक्रमः

एकाचो द्वे प्रथमस्य (पा.सू. ६.१.१), अजादेर्द्वितीयस्य (पा.सू.६.१.८) इति अधिकारबलेन यदा द्वित्वं विधीयते तदा पूर्वः अभ्यासः भवतीति पूर्वोऽभ्यासः (पा.सू.६.१.४) इति। सूत्रस्यार्थः। भुव् भुव् इति स्थिते प्रथम 'भुव्' अभ्याससंज्ञकः भवति। भुव् भुव् इति उभययोः अभ्यस्तसंज्ञा च 'उभे अभ्यस्तम्' (पा.सू. ६.१.५), इति सूत्रबलेन। किन्तु हरिनामामृतव्याकरणे अभ्यासविषये पूर्वः अभ्यासंज्ञकः (नरः) भवति परः अभ्यस्तसंज्ञकः (नारायणः) भवतीति पाणिनितः भेदः। 'अभ्यासः' 'नर' रूपेण, अभ्यस्तः नारायण' रूपेण च संज्ञितः दृश्यते तथा च सूत्रम्–

पूर्वो नरः (ह. ना. व्या.सू. – ४३८)

परो नारायणः (ह.ना.व्या. सू.– ४३९)

१.१.२ हरिनाम्नां प्रत्ययैः योजनम्

वैशिष्ट्येषु इदमपि अन्यतमं परिगण्यते यत् केचन प्रत्ययाः विशेषतः कृत्प्रत्यय–तद्धितप्रत्यय–स्त्रीप्रत्ययाधिकारेषु प्रत्ययनिर्देशात् पूर्वं हरिनाम्नां योगः क्रियते। तत्र तत्र हरिनाम्नां केवलम् उच्चारणजं पुण्यम् अभीप्सितम्, न तु किमपि पारिभाषिक–प्रयोजनम्। यथा –

१.	विष्णुनिष्ठा[१]	२.	विष्णुकृत्यः[२]
३.	लक्ष्मीप्रत्ययः[३]	४.	लक्ष्मीपूरणप्रत्ययः[४]
५.	नृसिंह–यः[५]	६.	माधवान्यः[६]
७.	केशव–णः[७]	८.	माधव–ढः[८]
९.	नृसिंह–नः[९]	१०.	केशवारामः[१०]
११.	नृसिंह–इः[११]	१२.	नृसिंह–फिः[१२]
१३.	माधव–यरामः[१३]	१४.	माधव–फः[१४]
१५.	माधवायनः[१५]	१५.	माधव–ठः[१६]
१७.	माधव–णः[१७]	१८.	नृसिंह–वुः[१८]
१९.	नृसिंह–ठः[१९]	२०.	नृसिंह–छः[२०]
२१	नृसिंह–कः[२१]	२२	नृसिंह–खः[२२]

२३. माधव–ढक:[33] २४. नृसिंहस्त्य:[34]
२५. केशवस्तन:[35] २६. नृसिंहाह:[36]
२७. माधव–ड:[37] २८. केशव–ठ:[38]
२९. केशवचर:[39] ३०. केशवमय:[30]
३१. केशवस्तय:[31]

१.१.३ श्रीहरिनामामृतव्याकरणकारेण श्रीजीवगोस्वामिना पाणिनीयसंज्ञानां हरिनामपरक–करणार्थं कानिचननवीनसूत्राणि संकलितानि, तानि अधः प्रस्तूयन्ते।

१. तत्रादौ चतुर्दश सर्वेश्वराः (ह.ना.व्या.सू.२)
२. दश दशावताराः (ह.ना.व्या.सू.३)
३. आदेशो विरिञ्चिः (ह.ना.व्या.सू.३९)
४. आगमो विष्णुः (ह.ना.व्या.सू.४०)
५. लोपो हरः (ह.ना.व्या.सू.४१)
६. पूर्वो वामनः (ह.ना.व्या.सू.५)
७. वर्णस्वरूपे रामः (ह.ना.व्या.सू.३७)
८. णित् नृसिंहः (ह.ना.व्या.सू.३७८)
९. किच्च ङिच्च कंसारिः (ह.ना.व्या.सू.३८२)
१०. तत्र श्यामराम–कर्मधारयौ, त्रिरामी–द्रिगू, कृष्णपुरुष–तत्पुरुषौ, पीताम्बर–बहुव्रीहौ, रामकृष्ण–द्वन्द्वौ समानार्थौ ज्ञेयौ, अव्ययीभावस्तु षष्ठः (ह.ना.व्या.सू. १६९४)[32]।

१.१.४ कासांचन संज्ञानां संज्ञिनिरूपणम्

पाणिनिना नैकासां संज्ञानां लक्षणं विहितम्। सम्भवतः स्वसमये एताः संज्ञाः अतिप्रसिद्धाः स्युः, पूर्वाचार्यैरपि प्रयुक्तानाम् आसां व्याख्यानम् अनावश्यकमासीत्। अतएव समास–कारक–सर्वनामाव्ययादीनां बहूनां संज्ञानां लक्षणं न दृश्यते अष्टाध्याय्याम्। परवर्त्तिकाले संस्कृतभाषा लोकमुखाद् दूरंगता। व्याकरणशास्त्रस्य परम्पराऽपि त्रुटिता, ताः ताः पाणिनीयाः प्रसिद्धसंज्ञाः अपि दुर्बोध्याः संजाताः। यदर्थं परवर्त्तिव्याकरणग्रन्थेषु तासां संज्ञानां लक्षणनिरूपणम् अपरिहार्यं परिकल्पितम्।

हरिनामामृतव्याकरणेऽपि तादृश्य: काश्चन संज्ञा: सन्ति, यासां लक्षणं दत्तं दृश्यते। यथा–

क. क्रियासम्बन्धविशेषि कारकम् (ह.ना.व्या.सू.९६१)

ख. आख्यातादयो यत्र क्रियन्ते, तदुक्तम्। (ह.ना.व्या.सू.९६२)

ग. उक्तादन्यदनुक्तम् (ह.ना.व्या.सू.९६३)

घ. अन्तर्भिन्नपदत्वेप्येकनामत्वेन योजनं समास: (ह.ना.व्या.सू.१६९५)

ङ. समासवाक्यं विग्रह: (ह.ना.व्या.सू.१६९७)

च. जाति--गुण--क्रियाद्वारा यस्य विशेष: कथ्यते, तद्विशेष्यं, येन तस्य विशेष: कथ्यते, तद्विशेषणम् (ह.ना.व्या.सू.३०७)

१.१.५ पूर्वाचार्यसंज्ञानां स्मरणम्

हरिनामपरकसंज्ञाभि: सह ग्रन्थकर्त्रा न केवलं तदर्थीया: पाणिनीयसंज्ञा: स्मृता:, प्रातिशाख्येपु प्रसिद्धानां तथा पूर्वाचार्याणां[३३] संज्ञाश्च स्मृता:। यथा – सर्वेश्वरसंज्ञया सह स्वरा: अच इति प्राचीनसंज्ञाद्वयमपि स्मृतम्। तथैव दशवतारेण सह समाना:, अक इति प्राचीनसंज्ञाद्वयस्यापि स्मरणं कृतम्। अध: हरिनामपरकसंज्ञाभि: सह तदर्थीया: पाणिनिसंज्ञा: पूर्वाचार्यसंज्ञाश्च संकलिता: सन्ति–

	हरिनामपरकसंज्ञा:	पाणिनीयसंज्ञा:	इतरा: पूर्वाचार्यसंज्ञा:
१.	सर्वेश्वरा:[३४]	अच:	स्वरा:
२.	दशावतारा:[३५]	अक:	समाना:
३.	एकात्मकौ[३६]	सवर्णसंज्ञा	–
४:	वामन:[३७]	ह्रस्व:	निर्ह्रस्व:
५.	त्रिविक्रम:[३८]	दीर्घ:	–
६.	महापुरुष:[३९]	प्लुत:	–
७.	ईश्वरा:[४०]	इच:	नामिन:
८.	ईशा:[४१]	इक:	–
९.	अनन्ता:[४२]	अण:	–

१०. चतुःसनाः[४३]	इणः	—
११. चतुर्भुजाः[४४]	उकः	—
१२. चतुर्व्यूहः[४५]	एचः	सन्ध्यक्षराणि
१३. विष्णुचक्रम्[४६]	अनुस्वारः विन्दुः,लवः च	
१४. विष्णुचापः[४७]	अनुनासिकः	—
१५. विष्णुसर्गः[४८]	विसर्जनीयः	विसर्गः, विसृष्टः, अभिनिष्ठानः
१६. विष्णुजनाः[४९]	हलः	—
१७. वलः[५०]	रलः	—
१८. विष्णुवर्गाः[५१]	स्पर्शाः	—
१९. विष्णुगणाः[५२]	मयः	—
२०. हरिवेणवः[५३]	ञमः	—
२१. हरिमित्राणि[५४]	यणः	अन्तःस्थाः, षणः च
२२. हरिगोत्राणि[५५]	शलः	उष्माणः, षिटः च
२३. शौरयः[५६]	शरः	—
२४. वैष्णवाः[५७]	झलः	धुटः
२५. गोपालाः[५८]	हशः	घोषवन्तः
२६. यादवाः[५९]	खरः	अघोषाः
२७. सत्सङ्गः[६०]	संयोगः	—
२८. सुर्बुद्धः[६१]	सम्बुद्धिः	—
२९. अच्युतः[६२]	लट्	वर्त्तमाना
३०. विधिः[६३]	विधिलिङ्	सप्तमी
३१. विधातृ[६४]	लोट्	पञ्चमी
३२. भूतेश्वरः[६५]	लङ्	ह्यस्तनी
३३. भूतेशः[६६]	लुङ्	अद्यतनी
३४. अधोक्षजः[६७]	लिट्	परोक्षा
३५. कामपालः[६८]	आशीर्लिङ्	आशीः
३६. बालकल्किः[६९]	लुट्	श्वस्तनी

३७.	कल्किः[३०]	लृट्	भविष्यन्ती
३८.	अजितः[३१]	लृङ्	क्रियापत्तिः
३९.	पृथुः[३२]	पित्	—
४०.	नृसिंहः[३३]	णित्	—
४१.	कपिलः[३४]	कित्	—
४२.	निर्गुणः[३५]	ङित्	—
४३.	कंसारिः[३६]	कित्, ङित्	—
४४.	शिवः[३७]	शित्	—
४५.	परपदसंज्ञानि[३८]	परस्मैपदानि	—
४६.	आत्मपदसंज्ञकानि[३९]	आत्मनेपदानि	—
४७.	कृष्णधातुकाः[४०]	सार्वधातुकानि	—
४८.	रामधातुकाः[४०]	आर्धधातुकानि	—
४९.	नरः[४२]	अभ्यासः	—
५०.	सङ्कर्षणः[४३]	सम्प्रसारणम्	—
५१.	श्यामरामः[४४]	कर्मधारयः	—
५२.	कृष्णपुरुषः[४५]	तत्पुरुषः	—
५३.	पीताम्बरः[४६]	बहुव्रीहि	—
५४.	रामकृष्णः[४७]	द्वन्द्वः	—
५५.	उपेन्द्रः[४८]	उपसर्गाः	—
५६.	विष्णुपदम्[४९]	पदम्	—
५७.	हरिः[५०]	घिः	अग्निः
५८.	गोविन्दः[५१]	गुणः	—
५९.	वृष्णीन्द्रः[५२]	वृद्धिः	—
६०.	पञ्चपाण्डवाः[५३]	सुटः	घुटः
६१.	राधा[५४]	—	श्रद्धा
६२.	गोपी[५५]	नदी	—
६३.	उद्धवः[५६]	उपधा	—
६४.	कृष्णस्थानम्[५७]	सर्वनाम	घुट्

६५.	भगवत्	भसञ्ज्ञा	–
६६.	दामोदर:	घु:	दा
६७.	विष्णुनिष्ठा	निष्ठा	–
६८.	विष्णुकृत्य:	कृत्य:	–

१.२.१ नामग्रहणं विना पूर्वाचार्यमतोद्धरणम्

पूर्वाचार्याणां नामस्मरणपूर्वकं यथा पाणिनिना विधय: निर्मिता: सन्ति जीव–गोस्वामिना तथा सर्वत्र पूर्वाचार्याणां नाम न स्मृतम्। यद्यपि तदीयमतानि स्वीकृतानि दृश्यन्ते। यथा – ईशस्यानेकात्मके वामनश्च वा (ह.ना.व्या.सू.९१) इति सूत्रे 'ईश' संज्ञस्य एकात्मकान्यसर्वेश्वरे परे सन्धिर्वा स्यात्। त्रिविक्रमस्य वामनश्च वा। उदाहरणम्–हरी आसनम् – हरि आसनम्। वस्तुत: सिद्धान्तोऽयं शाकल्यस्य नाम्ना गृहीतोऽस्ति। तथा च पाणिनिसूत्रम् – इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (पा.सू. ६.१.१२७)।

१.२.२ नूतनसूत्राणि

यद्यपि श्रीजीवगोस्वामिना पाणिनीयव्याकरणमाधारीकृत्य वैष्णवव्याकरणमिदं विरचितम्। तथापि अस्य ग्रन्थस्य काश्चन मौलिकता: परिलक्ष्यन्ते। अध: कानिचन सूत्राणि हरिनामामृतव्याकरणत: संकलितानि, येषां समर्थकपाणिनीयसूत्राणि न सन्ति।

क. असिद्धरूपं न त्याज्यम्, प्रतिज्ञेयं कृदन्तिका (ह.ना.व्या.सू.४३)

ख. शसादयो यदुसंज्ञा: (ह.ना.व्यास.सू.१७४)

ग. तत्रावन्तलक्ष्मी राधा–संज्ञा (ह.ना.व्या.सू.२१०)

घ. समानार्थतया पुरुषोत्तमतार्हमीशान्तं ब्रह्मपुरुषोत्तमवद्वा टादि सर्वेश्वरे (ह.ना.व्या.सू.२३९)

ङ. पाणिनीयप्रत्याहारवाचिनामच्शब्दादीनामुञनअनुकरणस्य च न कवर्गा–दित्वम् (ह.ना.व्या.सू.२५४)

च. यवयोर्विष्णुपदान्तयोर्हरो गोपाले (ह.ना.व्या.सू.२७९)

छ. तदादिद्वये द्वयम् (ह.ना.व्या.सू.३८)

ज. सूत्राणि षड्विधानि (ह.ना.व्या.सू.४२)

झ. यादवमात्रे हरिकमलम् (ह.ना.व्या.सू.९८)

ञ. अरामान्त: कृष्णसंज्ञ: (ह.ना.व्या.सू.२७९)

१.२.३.० प्रक्रियालाघवदृष्टि:

पाणिनिव्याकरणे तिङ्प्रकरणे प्रतिलकारं मूलतिङाम् आदेशा: क्रियन्ते। तदभिधेयं सूत्राण्यपि अपेक्षितानि भवन्ति। एतेन व्याकरणस्य शास्त्रीयगौरवं भवतीति परिवर्त्तिवैयाकरणा: अनुभवन्त: दृश्यन्ते। शास्त्रलाघवधिया हरिनामामृतव्याकरणेऽपि लडादिषु सत्सु परिनिष्ठतरूपाणाम् आन्तिमभागा: तत्तत्प्रत्ययरूपेण परिकल्पिता: दृश्यन्ते। तथा सति तिङामादेशपरकाणि नैकानि पाणिनीयसूत्राणि स्वत: वर्जितानि। अनेन अवश्यं लाघवमायाति। किन्तु पाणिनीयव्याकरणे य: शस्त्रीय: बौद्धिकश्चव्यापार: कल्पित:, तस्य अवगणना जाता। यथा – लोटि परस्मैपदं प्रत्यया: भवन्ति–तुप्, ताम्, अन्तु, हि तम् त: आनिप् आवप् आमप् ताम् आताम् अन्ताम्, स्व आथाम् ध्वम्, ऐप् आवहैप्, आमहैप्। पाणिनीयतन्त्रे एतानि रूपाणि साक्षात् नोपलभ्यन्ते। तेषां प्राप्त्यर्थं, प्रक्रियादशायां नैकेषां सूत्राणां प्रयोग: क्रियते, यथा–

तिप् > तुप् (एरु:) पा.सू. ३.४.८६

तस् > ताम्

थस् > त (तस्थस्थमिपां तांतंताम:) (लोटो लङ्वत्) पा.सू. ३.४.८.३

थ > त

झि > अन्ति > अन्तु (झोऽन्त:) पा. सू. ७.१.३

(एरु:) पा. सू. ३.४.८६

सिप् > हि (सेर्ह्यपिच्च) पा.. सू. ३.४.८७

मिप् > नि > आनि (मेर्नि:) पा.सू. ३.४.८९ (आडुत्तमस्य पिच्च) पा.सू. ३.४.९२

वस् > आवप् (आडुत्तमस्य पिच्च) पा.सू. ३.४.९२

मस् > आमप् (आडुत्तमस्य पिच्च) पा.सू. ३.४.९२

त > ते > ताम् (टित आत्मनेपदानां टेरे), पा.सू. ३.४.७९

(आमेत:) पा.सू. ३.४.९०

आताम् > इयताम् > एताम् (आतो ङित:) पा.सू. ७.२.८१

(आद् गुण:) पा.सू. ६.१.८७, (लोपो व्योर्वलि), पा.सू. ६.१.६६

झ अन्त अन्ते अन्ताम् (झोऽन्त:) पा.सू. ७.१.३, (टित: आत्मनेपदाना टेरे) पा.सू. ३.४.७९ (आमेत:) पा.सू. ३.४.९०

थास् से स्व (थासः से) पा.सू. ३.४.८०

(सवाभ्यां वामौ) पा.सू. ३.४.९१

आथाम् > इय्थाम् > एथाम् (आतो ङितः) पा.सू. ७.२.८१

(आद्गुणः) पा.सू. ६.१.८७

(लोपोव्योर्वलि) पा.स. ६.१.६६

ध्वम् > (तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथाम्ध्वमिड्वहिमहिङ्) पा.सू. ३.४.७८

इट् > ए > ऐ (टित आत्मेपदानां टेरे) पा.सू. ३.४.७९

(एत ऐ) पा.सू. ३.४.९३

वहि > वहे > वहै (टित आत्मनेपदानां टेरे) पा.सू. ३.४.७९

(एत ऐ) पा.सू. ३.४.६३ (आडुत्तमस्य पिच्च) पा.सू. ३.४.९२

महिङ् > महे > महै (टित आत्मनेपदानां टेरे) पा. सू. ३.४.७९,

(एत ऐ) पा. सू. ३.४.६३

(आडुत्तमस्य पिच्च) पा. सू. ३.४.९२

यत्र नवपरस्मैपदानां नव आत्मनेपदानां लोट्लकाररूपाणां साधुत्वप्रदर्शनार्थं पञ्चदशाधिकपाणिनीयसूत्राणि अपेक्षन्ते, अत्र 'आशीः प्रेरणादौ तुबादयो विधातृ नामानः' (ह.न.व्या.सू. ३७०) इति एकेनैव सूत्रेण अष्टादशलोट्लकाररूपाणां साधुत्वं संपाद्यते। तथैव लट्लकाररूपाणां सिद्ध्यर्थं 'तत्र प्रायः वर्त्तमानकाले तिबादयोऽष्टादर्श अच्युतनामानः' (ह.ना.व्या.सू.३६८) इति सूत्रं, 'विधि—सम्भावनादौ यादादयोविधिनामानः' (ह.ना.व्यासू. ३६९), लङर्थं 'अनद्यतनभूते दिवादयो भूतेश्वर नामानः' (ह.ना.व्या. सू. ३७२), भूते दिवादयो भूतेशनामानः (ह.ना.व्या.सू.३७२) लिडर्थं लुङर्थ 'परोक्षभूते णलादयोऽधोक्षजनामानः' (ह.ना.व्या.सू.३७३), लिङाशिषि 'आशिषि यात् यास्तामित्यादयः कामपालनामानः' (ह.ना व्या. सू. ३७४) लुडर्थम् 'अर्हार्थेऽनद्यतनभविष्यति च तादयो बालकल्किनामानः' (ह.ना व्या. सू. ३७५), लुडर्थ 'भविष्यत्काले स्यत्यादयः कल्किनामानः' (ह.ना व्या. सू. ३७६), लृङर्थं 'साकांक्षं यत्र क्रियातिक्रमो निर्दिश्यते, तत्र कार्यकारणयोः स्यदादिका अजितनामानो भूते भविष्यति च' (ह.ना व्या. सू. ३७७) इत्यादिषु केवलम् एकैकमेव सूत्रं दृश्यते[७३]। परन्तु एतेषां लकारणां रूपाणां सिद्ध्यर्थं पाणिनीयव्याकरणे नैकानि सूत्राणि दृश्यन्ते।

१.२.३.१ आदरामगोपालयोरुर्नित्यम् (ह.ना.व्या. १४०)

पाणिनिव्याकरणदृष्ट्या अपेक्षिता दीर्घा प्रक्रियाऽत्र न्यूनीकृता। सा यथा – पाणिनीयपद्धत्या अकारपरस्य विसर्जनीयस्य अवर्णे परे साक्षात् उकारो न भवति। तत्रोपदिष्टा पद्धतिश्चेत्थम्–विसर्जनीयस्य सकारः (विसर्जनीयस्य सः पा ८.३.३४), पुनः सकारस्य रुत्वम् (ससजुषोः रुः पा. ८.२.६६), ततः रोः उकारादेशः (अतोरुरप्लुतादप्लुते पा. ६.१.११३) भवेत्। किन्त्वत्र जीवगोस्वामिना प्रक्रियालाघवसम्पादनार्थं अकार परस्य विर्जनीयस्य साक्षात् उकारः उपदिष्टः।

१.२.३.२ पूर्वस्य विष्णुपदवत्त्वं स्वादि–तद्धितयोरयसर्वेश्वराद्योः (ह.ना.व्या.२४७)

यसर्वेश्वरादिभिन्नयोः स्वादितद्धितयोः परयोः पूर्वस्य विष्णुपदवत्त्वं भवति इति सूत्रार्थः। एत्तपर्यायविशिष्टं सूत्रं पाणिनीयव्याकरणे साक्षात् नोपलभ्यते। किन्तु एतस्य कार्य्यं पाणिनिना भिन्नया पद्धत्या सूचितम्। वस्तुतः सुप्तिङन्तं पदमिति सुबन्तानां सर्वत्र पदसंज्ञा। किन्तु रूपनिर्माणार्थं कुत्रचित् भसंज्ञायाः आवश्यकता वर्तते। भसंज्ञानिरूपणं यच्चि भम् (पा. १.४.१८) इति संज्ञासूत्रेण विहितमस्ति। स्वादिषु अजादिप्रत्ययेषु एव परेषु सत्सु पूर्वं भसंज्ञा भवति। न तु पदसंज्ञा। भ्याम्प्रभृतिषु अनच्रूपविशिष्टेषु सुप्सु सत्सु यदि पूर्वं भसंज्ञं स्यात् तर्हि प्रत्यच्भ्याम् इत्यत्र 'च' कारस्य कुत्वं न स्यात्, नापि ककारस्य जश्त्वम्। कुत्वं जश्त्वं च पदसंज्ञायां सत्यां भवति। अतएव सुप्तिङन्तं पदम् (पा.१.४.१४) 'यचि भम्' (पा.१.४.१८) 'चोः कुः' (पा.८.२.३०) 'झलां जशोऽन्ते' (पा. ८.२.३९) एतेषां सामान्यविवेचनेन पाणिनीयव्याकरणे प्रत्यग्भ्याम् इत्यादिरूपाणि सिद्ध्यन्ति।

अवश्यम् एतत्सत्यं प्रत्यग्भ्याम् इत्यत्र 'ग्' कारस्य समाधानाय भ–पदयोर्मध्ये पार्थक्यज्ञानम् अपि च तज्जन्यफलपार्थक्यस्य ज्ञानञ्च अपेक्षते। पाणिनेः तदर्थसूत्राणां ज्ञानादनन्तरमेव एतद् सम्भवति। अत्र गौरवं भवतीति धिया एतस्य बोधनकाठिन्यस्य निराकरणाय जीवगोस्वामिना सूत्रमिदं परिकल्पितम्। एतेन एकेनैव सूत्रेण सोऽर्थः संपाद्यते।

उपसंहारः

विषयोऽयं बहुव्यापकोऽस्ति। सर्वे विन्दवः अत्र विस्तारभिया न स्पृष्टाः। केवलं स्थालीपुलाकन्यायेन केचन यथाग्रन्थम् आलोचिताः।

टिप्पणी

१. द्र. ह. ना. व्या. सू. १२५३
२. द्र. तत्रैव सू. १३७५
३. द्र. तत्रैव सू. २११५
४. द्र. तत्रैव सू. २२१९
५. द्र. तत्रैव सू. २९०३
६. द्र. तत्रैव सू. २३६०
७. द्र. तत्रैव सू. २३१२
८. द्र. तत्रैव सू. २३१९
९. द्र. तत्रैव सू. २३२०
१०. द्र. तत्रैव सू. २१९७
११. द्र. तत्रैव सू. २३२४
१२. द्र. तत्रैव सू. २३४९
१३. द्र. तत्रैव सू. २३५७
१४. द्र. तत्रैव सू. २३५८
१५. द्र. तत्रैव सू. २३६०
१६. द्र. तत्रैव सू. २८३३
१७. द्र. तत्रैव सू. २३६९
१८. द्र. तत्रैव सू. २४०२
१९. द्र. तत्रैव सू. २४१०
२०. द्र. तत्रैव सू. २४५३
२१. द्र. तत्रैव सू. २४६७
२२. द्र. तत्रैव सू. २४८५
२३. द्र. तत्रैव सू. २४८६

२४. द्र. तत्रैव सू. २४९२

२५. द्र. तत्रैव सू. २४९५

२६. द्र. तत्रैव सू. २५००

२७. द्र. तत्रैव सू. २५७०

२८. द्र. तत्रैव सू. २८०१

२९. द्र. तत्रैव सू. ३०८३

३०. द्र. तत्रैव मू. ३१४८

३१. द्र. तत्रैव सू. २९६०

३२. मत्प्रस्तुता सूत्रमेलनसूची द्रष्टव्या

३३. विशेषत: कातन्त्रचान्द्रजैनेन्द्रपरम्परा अनुसृता

३४. द्र. ह. ना. व्या. सू. २

३५. द्र. तत्रैव सू. ३

३६. द्र. तत्रैव सू. ४

३७. द्र. तत्रैव सू. ५

३८. द्र. तत्रैव सू. ६

३९. द्र. तत्रैव सू. ७

४०. द्र. तत्रैव सू. ८

४१. द्र. तत्रैव सू. ९

४२. द्र. तत्रैव सू. १०

४३. द्र. तत्रैव सू. ११

४४. द्र. तत्रैव सू. १२

४५. द्र. तत्रैव सू. १३

४६. द्र. तत्रैव सू. १४

४७. द्र. तत्रैव सू. १५

४८. द्र. तत्रैव सू. १६

४९. द्र. तत्रैव सू. १७

५०. द्र. तत्रैव सू. १८

५१. द्र. तत्रैव सू. १९

५२. द्र. तत्रैव सू. २०
५३. द्र. तत्रैव सू. २५
५४. द्र. तत्रैव सू. २७
५५. द्र. तत्रैव सू. २८
५६. द्र. तत्रैव सू. २९
५७. द्र. तत्रैव सू. ३०
५८. द्र. तत्रैव सू. ३१
५९. द्र. तत्रैव सू. ३२
६०. द्र. तत्रैव सू. ८२
६१. द्र. तत्रैव सू. १७१
६२. द्र. तत्रैव सू. ३६८
६३. द्र. तत्रैव सू. ३६९
६४. द्र. तत्रैव सू. ३७०
६५. द्र. तत्रैव सू. ३७१
६६. द्र. तत्रैव सू. ३७२
६७. द्र. तत्रैव सू. ३७३
६८. द्र. तत्रैव सू. ३७४
६९. द्र. तत्रैव सू. ३७५
७०. द्र. तत्रैव सू. ३७६
७१. द्र. तत्रैव सू. ३७७
७२. द्र. तत्रैव सू. ३७८
७३. द्र. तत्रैव सू. ३७९
७४. द्र. तत्रैव सू. ३८०
७५. द्र. तत्रैव सू. ३८१
७६. द्र. तत्रैव सू. ३८२
७७. द्र. तत्रैव सू. ३८३
७८. द्र. तत्रैव सू. ३८४
७९. द्र. तत्रैब सू. ३८५

८०. द्र. तत्रैव सू. ३८७

८१. द्र. तत्रैव सू. ३८८

८२. द्र. तत्रैव सू. ४३९

८३. द्र. तत्रैव सू. ६०९

८४. द्र. तत्रैव सू. १६९४

८५. द्र. तत्रैव सू. १६९४

८६. द्र. तत्रैव सू. १६९४

८७. द्र. तत्रैव सू. १६९४

८८. द्र. तत्रैव सू. ४०७

८९. द्र. तत्रैव सू. १५४

९०. द्र. तत्रैव सू. १७७

९१. द्र. तत्रैव सू. १७९

९२. द्र. तत्रैव सू. १९०

९३. द्र. तत्रैव सू. १९१

९४. द्र. तत्रैव सू. २१०

९५. द्र. तत्रैव सू. २२०

९६. द्र. तत्रैव सू. २२७

९७. द्र. तत्रैव सू. २२८

९८. द्र. तत्रैव सू. २३५

९९. द्र. तत्रैव सू. ४१९

१००. द्र. ह. ना. व्या. सू. १२५३

१०१. द्र. तत्रैव सू. १३७५

१०२. मत्प्रस्तुता सूत्रमेलनसूची द्रष्टव्या

१०३. विस्तारभिया सर्वे लकाराः नात्र आलोचिताः। विज्ञैः सुधिभिः सर्वत्र लकारान्तरेषु एतादृशी पद्धतिरनुसृता इति विवेचनीयम्।

पण्डितराज-शास्त्ररत्नाकर-वे-सुब्रह्मण्यशास्त्रि-विरचिता शाब्दतरङ्गिणी : एकं विहगावलोकनम्

रिछारिया ब्रजेशकुमारः

संस्कृतक्षेत्रे दक्षिणभारतस्य महद्योगदानमस्ति। प्राचीनकालादेव प्रदेशोऽयं संस्कृतस्य संवर्धनाय प्रयत्नशीलः परिलक्ष्यते। प्रदेशेऽस्मिन् बहवो विद्वांसः प्रादुरभूवन्, येषां कृतयोऽद्यापि विद्वत्सु समादृताः भवन्ति। प्रसङ्गादत्र शाब्दतरङ्गिणीकर्तुः पण्डितराज–शास्त्ररत्नाकर–वेपत्तूर–सुब्रह्मण्यशास्त्रि–महाभागस्य संक्षिप्तपरिचयं प्रस्तौमि।

एतेषां जन्म जुलाईमासे नवोत्तरैकोनविंशतितमे क्रैस्ते वर्षे तमिलनाडुराज्यान्तर्वर्ति तंजौर–जनपदस्य वेपत्तूर–ग्रामे अभवत्। ते मद्रास–विश्वविद्यालयतः न्याय–वेदान्तशिरोमणिः इत्युपाधिमधिगतवन्तः। तदनन्तरम् अण्णामलैविश्वविद्यालये अध्यापनं कृत्वा मद्रासस्य संस्कृत–महाविद्यालये प्राध्यापकपदम् अलङ्कुर्वाणाः स्वाध्यायाध्यापनपराः आसन्। ततः निवृत्तेः परं 'कुम्बाकोनम्' अद्वैतसभायां महापण्डितपदं तैः समलङ्कृतम्।

विद्वत्सभासु शास्त्रार्थसत्रेपु च तेषां वैदुष्यं अनितरसाधारणतया प्रकाशते स्म। पाण्डित्यप्रभया सर्वेषां अज्ञानतिमिरं दूरत एव उपयाति स्म।

तेषां वैदुष्यं अनेनैव द्योतते –

१. कांचीपुरम् पीठाधीश्वर–जगद्गुरुशंकराचार्यवर्यैः 'शास्त्ररत्नाकर' इत्युपाधिना इमे सभाजिताः
२. कोचीनमहाराज–परीक्षितवर्यैरपि ते पण्डितराजेत्युपाधिना विभूषिताः।
३. संस्कृतक्षेत्रे उत्कृष्टकार्यार्थं भारतस्य महामहिम–राष्ट्रपतिमहोदयेन सम्मानिताः।
४. शाब्दतरङ्गिणीति ग्रन्थमधिकृत्य साहित्य अकादेमी इति राष्ट्रियसंस्थया ते सम्मानिताः।

श्रीशास्त्रिचरणैः बहवो ग्रन्थाः प्रकाशिताः। तेषां ग्रन्थानां त्रिधा विभागो दृश्यते। यथा–

१. प्रकरणग्रन्थाः

क. व्युत्पत्तिवादे लकारार्थविवरणम्, अण्णामलै विश्वविद्यालयतः प्रकाशितम्।

ख. शाब्दतरङ्गिणी, मद्रपुरी–संस्कृत–समिति–मद्रासतः प्रकाशिता।

ग. प्रकटानुबन्धिशास्त्रार्थः, अद्वैतसभा–कुम्बाकोनमतः प्रकाशितः।

घ. न्याय–वैशैषिकतन्त्रार्थसंग्रहः, अद्वैतसभा–कुम्बाकोनमतः प्रकाशितः।

ड. ख्यातितत्त्वसमीक्षा, अद्वैतसभा–त्रिचितः प्रकाशिता।

२. व्याख्या–ग्रन्थाः

क. ब्रह्मानन्दीभावप्रकाशः (व्याख्या) कोचीनतः प्रकाशितः।

ख. न्यायकल्पलतिका व्याख्या, भागद्वयेन केन्द्रीय–संस्कृत–विद्यापीठ–तिरुपतितः प्रकाशिता।

३. प्रबन्धाः

क. त्रिमाशश्लोकी, अण्णामलै विश्वविद्यालयन्तः प्रकाशिता।

ख. न्यायरत्नम्, ऑरिएण्टल लाइब्रेरी मद्रासतः प्रकाशितम्।

ग. अवच्छेदकसारः, अण्णामलै विश्वविद्यालयतः प्रकाशितः।

घ. न्यायसारः, ऑरिएण्टल लाइब्रेरी मद्रासतः प्रकाशितः।

वयंत्वत्र पण्डितराज–शास्त्ररत्नाकर–श्री–वे.–सुब्रह्मण्यशास्त्रिणां ''शाब्दतर–ङ्गिणी'' इति ग्रन्थमधिकृत्य किञ्चिद् विवेचयितुम् इच्छामः।

ग्रन्थेऽस्मिन् आस्तिकदर्शनशास्त्रीयपरम्परासु प्रायः सर्वमपि शाब्दबोधविषयकं मतजातं सुविशदं सुसंहतं च निरूपितमस्ति। तत्र शाब्दबोधविचाराः विशिष्य मीमांसा–व्याकरण–न्याय–साहित्यशास्त्रेषु प्रामुख्येन दृश्यन्ते। प्रतितन्त्रं शाब्दबोधीयसिद्धान्ताः तदनुकुलतर्काः प्रक्रियाश्च बहुधा भिद्यन्ते। तेषां यथायथमाकलनं सर्वेषां शास्त्राणां गभीराध्ययनं विना विदुषां शास्त्रार्थगहनेऽध्वनि. प्रविविक्षुणाञ्च अनायासेन नो भवति। परन्तु अनेन एकेनैव ग्रन्थेन सर्वेषां शास्त्रीय–विचाराणां न्यक्षेण ज्ञानं भवितुमर्हतीति श्रीशास्त्रिचरणानां वैदुष्यस्य परः प्रकर्षः सुतरां ज्ञात एव भवति। तथाहि –

मीमांसकेषु मुख्यत: सम्प्रदायद्वयं दृश्यते। भाट्टा: प्राभाकराश्च। भाट्टा: शाब्दबोधे अभिहितान्वयवादमुररीकुर्वन्ति। प्राभाकरास्तु अन्विताभिधानवादिन:।

तत्र अभिहितान्वयवादे पदै: पदार्था: अभिधीयन्ते। पदार्था: अभिहिता: सन्त: वाक्यार्थानुभवं जनयन्ति। अत: वाक्यार्थबोधे पदार्था: एव करणानि इति उच्यन्ते भाट्टमते। अभिहितै: पदार्थै: वाक्यार्थानुभव अन्वयबोध: जायते इत्यत: अयं वाद: अभिहतान्वयवाद: इत्युच्यते।

प्राभाकरास्तु तन्नानुमन्यते। ते तु पदमेव वाक्यार्थबोधे कारणमिति स्वीकुर्वन्ति। पदेभ्य: अन्विता एव अर्था: अभिधीयन्ते अन्वितार्थाभिधानं हि पदानाम् अन्विता–भिधायित्वम्। प्राभाकरा: भाट्टाश्च भावनामेव मुख्यविशेष्यकं शाब्दबोधे इति मन्यन्ते।

वैयाकरणास्तु धात्वर्थमुख्यविशेष्यकशाब्दबोधवादिन:। तत्र कर्मत्वादिकं द्वितीयाद्यर्था:। उदाहरणार्थं – 'ग्रामं गच्छति चैत्र' इति वाक्यस्य ग्रामकर्मकं चैत्रकर्तृकं गमनमिति स्थूलं शाब्दबोधं वर्णयन्ति।।

प्रायश: शाब्दबोधीय–व्याकरण–मीमांसादि–निबन्धेषु नव्यनैयायिकानां शाब्दबोधविचारपद्धतिरेवानुसृता लक्ष्यते।

नञर्थवादनिरूपणप्रकरणे

''भूतले घटो नास्ति'' इत्यत्र घटविशेष्यक–भूतल–वृत्तित्वाभावप्रकारकबोध–वादिनां घटाभावविशेष्यक–वृत्तित्व–प्रकारकबोधवादिनाञ्चाशयविशेषादिकं सुनिरूपितमस्ति।

अत्रेदं बोध्यम्। 'नीलो घट:' इत्यत्र नीलाभिन्नो घट: इति शाब्दबोध:। नीलपदस्य नीलरूपवान् अर्थ:। तस्याभेदसम्बन्धेन घटपदार्थे अन्वय:। अभेदो न कस्यापि पदस्यार्थ:। परन्तु प्रथमान्तनीलपदोत्तर–प्रथमान्त–घटपदत्वरूपाकांक्षया शाब्दबोधे भासते। तन्निष्ठविषयता सांसर्गिकविषयता। अयमभेद–संसर्गको बोध: अभेदान्वयबोध: इत्युच्यते। श्रीगदाधर–भट्टाचार्या: शब्दमणे: पक्षधरमिश्रकृतस्य शब्दमण्यालोकस्य शिरोमणि–विरचितानां आख्यात–नञवाददिनाञ्च व्याख्यानानि विधाय व्युत्पत्तिवाद–शक्तिवाद–विविध–शाब्द–बोधेपयोयगि–पदार्थ–स्वरूप–विचारादीन् स्वतन्त्र–प्रबन्धांश्च निर्माय शाब्दबोध–पद्धितिं सुपरिष्कृतां सर्वदार्शनिकचित्तविनोदनीं चक्रु:।

अत्र वैयाकरणानां नैयायिकानाञ्च बोधानुबन्धिन: सिद्धान्तभेदा: प्रदर्श्यन्ते।

अथ वैयाकरणसिद्धान्ता:

१. धात्वर्थमुख्यविशेष्यक: शाब्दबोध:।

२. सकर्मकाणामिवाकर्मकाणामपि धातूनां फलव्यापारोभयार्थता।

३. कर्तृकर्मादयो धर्मिण: प्रत्ययवाच्या:।

४. लडाद्यर्थकाल: धात्वर्थभावनान्वयी।

५. समासे एकार्थीभाव:।

६. बोधकत्वं शक्ति:, न संकेत:।

७. अपभ्रंशा वाचका:।

८. लक्षणास्या: वृत्यन्तरं नास्ति।

९. प्रादीनां चादीनाञ्च वैषम्यं नास्ति।

१०. वाक्यार्थबोधक: स्फोट:।

अथ नैयायिकसिद्धान्ता:

१. प्राय: प्रथमान्तार्थमुख्यविशेष्यको बोध:।

२. सकर्मकाणामेव धातूनां फलव्यापारोभयार्थकता, नाकर्मकधातूनाम्।

३. कर्तृकर्मत्वादि: धर्म एव प्रत्ययवाच्य:, न धर्मी।

४. आख्यातार्थकाल: आख्यातार्थकृत्यन्वयी, यत्राख्यातार्थे कृतेर्न बोध: तत्र जानाति, नश्यति इत्यादौ धात्वर्थान्वयी।

५. समासे वाक्यवत् व्यपेक्षैव, नैकार्थीभाव:।

६. ईश्वरसंकेत: शक्ति:।

७. अपभ्रंश न वाचका:, शक्तिभ्रमात् तेभ्य: शाब्दबोध:।

८. लक्षणा नाम वृत्यन्तरम्।

९. प्रादयो द्योतका: चादयो वाचका:।

१०. स्फोट: न प्रमाणसिद्ध:।

नव्यवैयाकरणसिद्धान्तापेक्षया प्राचीनवैयाकरणसिद्धान्ता: नैयायिकसिद्धान्तसंन्नि–कृष्टा वर्तन्ते। तथाहि–

१. धातोः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च शक्तिद्वयं स्वीकुर्वन्ति नव्य–वैयाकरणाः। प्राचीनास्तु फलं व्यापारश्च धात्वर्थः इति नैयायिकसंमतं खण्ड–शक्तिपक्षं स्वीकुर्वन्ति। परन्तु फलव्यापारयोः सामानाधिकरण्ये धातोरकर्मत्वं, वैयधिकरण्ये तु सकर्मकत्वमिति वैयाकरणनयः। अकर्मधातोः केवलव्यापारार्थकत्वं, न फलार्थकत्वमपि। सकर्मकधातोरेव फलव्यापारोभयार्थकत्वमिति न्यायनयः।

२. क्रियाजन्यफलाश्रयत्वात् कर्मत्वमिति व्यवहारदर्शनात् स्वस्य स्वप्रयोज्यत्वा–संभवात् क्रियाजन्यफलाश्रयत्वातिरिक्तं कर्मत्वखण्डो धर्मः इति नवीनाः। नैयायिकमतवत् क्रियाजन्यफलाश्रयत्वं सखण्डमेव कर्मत्वम्। निरुक्तव्यवहारे कर्मत्वपदं कर्मसंज्ञापरमिति प्राचीना वदन्ति।

३. द्वितीयार्थः कर्म। तत्र क्रियायाः फलस्य च धातुतः, जन्यत्वस्य आकांक्षाया च लाभात् अनन्यलभ्यः आश्रयः अर्थः इति फलितम्। शक्तिपक्षे आश्रयत्वमर्थः इति प्राचीनानां निरूपणं, कर्मत्वार्थकद्वितीयायाः आधेयत्ववाचितावादि–नैयायिकपद्धतिमध्यस्ते।

४. जातिः, द्रव्यं, संख्या, लिङ्गं, कारकमिति पञ्चकस्य नामार्थपक्षं परमसिद्धान्त–तया आद्रियन्ते नव्याः। कारकस्य प्रत्ययवाच्यतापक्षं निरूपयन्ति प्राचीनाः भूषणसारकाराः 'प्रत्ययस्यैव वाचकतया युक्तत्वात्' इति ग्रन्थेन।

५. लिङर्थः प्रेरणा। तेनेष्टसाधनत्वमनुमाय पुरुषः प्रवर्तते इति नव्याः। प्राचीनास्तु नैयायिकवत् इष्टसाधनत्वं लिङर्थ इति प्रतिपादयन्ति। परन्तु नैयायिकसंमतं बलवदनिष्टाननुबन्धित्वं कृतिसाध्यत्वञ्च न लिङर्थः शाब्दिकमते। नव्यनैयायिकाः केचन इष्टसाधनमात्रस्य लिङर्थतां स्वीकुर्वन्ति।

६. आरोपितत्वं नञा द्योत्यते। 'चैत्रो न पचति' इति वाक्यात् आरोपितः चैत्रकर्तृकः पाकः इति बोधः इति नव्याः। प्राचीनास्तु आरोपितत्वस्य नञ्द्योत्यतापक्षमुपन्यस्य, 'निवृत्तपदार्थको नञ्।' इति भाष्यप्रामाण्यात् नैयायिकाभिमतं नञः अभावार्थकत्वं सिद्धान्तपक्षतया निरूपयन्ति।

शब्दानुशासनादिविषये प्रायः सर्वेषां दार्शनिकानां सिद्धान्ताः प्राप्यन्ते, तेषु सर्वत्र पाणिनीयव्याकरणानुबन्धीन्यनुशासनादि प्रमाणीकुर्वन्ति। ''क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते क्रियाविशेषणानां कर्मत्वम् इत्यनुशासनपदेन सीरदेवकृत–

परिभाषावृत्तौ ठक्पादे ज्ञापकसिद्धपरिभाषात्वेन निरूपितमेव व्यवहरन्ति भट्टाचार्याः स्पष्टीकृतश्चायमर्थः षष्ठे तरङ्गे।

पाणिनीयव्याकरणनुसारेणैव 'गां दोग्धि पयः' इत्यादौ पयसः प्रधानकर्मत्वं गोः कर्मत्वसंज्ञा 'अकथितञ्च' इति सूत्रेण दुहादिसमभिव्याहृतकर्म लकारस्य अप्रधान–कर्मत्वार्थकता इति निरूपयन्ति। एवमनुशासनानुरोधेन विभक्तीनामर्थं निर्धारयन्ति दुह्यमानपदस्य गोपदार्थविशेष्यबोधकत्वं तदुत्तरसप्तम्याः भावार्थकत्वञ्च स्वारसिकमिति मन्यमानाः विनैव दूषणोक्तिं व्युत्पत्तिवादे "गोषु दुह्यमानेषु गतः" इत्यादौ 'यस्य च भावेन' इत्यनेन गवादि पदात् सप्तमी तत्सामानाधिकरणदुह्यामानादिपदाच्च 'नीलं घटमानय' इत्यादि नीलादिपदात् द्वितीयावत् विशेषणपदस्य विशेष्यपदसमानविभक्तित्वनियमात् सप्तमी–विधायक–सूत्रे च भावपदं क्रियापरम्'' इति ग्रन्थेन गभीरसरण्या तर्कालंकारमतं कटाक्षयन्ति।

दुःखविशेषाभावरूपस्य नरकाभावस्य इष्टत्वाक्रान्तत्वात् तत्साधनत्वं लिङर्थ इति वर्णनमनुशासनमनुसरतीति ज्ञेयम्। कर्मणि विहितद्वितीयाया आधेयत्वार्थकत्व–तण्डुलानोदनं पचतीत्यत्र नाशकत्वस्य न द्वितीयार्थकत्वञ्चानुशासनानुसरोधतीति व्युत्पादिताः षष्टे तरङ्गे।

ग्रन्थेऽस्मिन् व्युत्पत्तिवाद–शब्दशक्तिप्रकाशिकादिभिरनवगता बहवोऽर्थाः विवेचिताः। सुबर्थनिरूपणावसरे शाब्दिकानां मीमांसकानां नैयायिकानाञ्चाशयः निरूप्यते। स्थालीपुला–कन्यायेन तदुक्तं किञ्चित् चिन्तितम्। क्रियाविशेषणस्थले वैयाकरणाभिमतां स्तोकादेः कर्मसंज्ञां सुखमास्यते इति कर्मणि लकारापत्तिं दर्शयित्वा, 'ततोऽन्यत्रापि दृश्यते' इति वार्तिकात् क्रियाविशेषणपदात् द्वितीया–विभक्तिमिव स्थापयन्ति पदस्वरूपतज्ज्ञानोत्पत्तिप्रकारं पदस्यार्थे संकेत्यैवाभिधायित्वं संकेतज्ञानस्य करणत्वञ्च व्युत्पाद्य सोदाहरणं भेदान्वयञ्च प्रदर्श्य संमतः स्फोटवादो निरस्तः। ततः प्रथमादीनां विभक्तीनामर्थनिरूपणपूर्वकं शाब्द–बोधमुपवर्ण्य ग्रन्थोऽयं समाप्तिं नीतः।

पाणिनीयव्याकरणेऽर्थतत्त्वं सम्भाषणसन्दर्भश्च*

बसन्तकुमारो भट्टः

भूमिका

केनापि वैयाकरणेन कस्याश्चिदपि भाषाया व्याकरणे विचार्यमाणे, ये ये तन्तवो भाषापट ओतप्रोता दृश्यन्ते, ते सर्वे शृङ्गग्राहिकतया परिगण्यमाने सति, चत्वारो भवन्ति। तद्यथा – १. ध्वनिः, २. पदम्, ३. वाक्यम् ४. अर्थश्चेति। अत्राप्यन्तिमाद् अर्थतन्तो ऋते, ये ध्वन्यादयस्त्रायस्तन्तवः सन्ति, ते साधनकोटिं सामविशान्ति। अन्तिमश्चार्थरूपस्तन्तुस्तु साध्यकोटिमारोहति। वागत्रव्यवहारकाले ये वक्तारो भवन्ति, ते स्वकीये मनसि स्वरव्यञ्जनात्मकैः ध्वनिभिः पदानि संसाधयन्ति, सुबन्ततिङन्तात्मकैश्च पदैर्वाक्यानि निष्पादयन्ति। ततश्च वाक्यानि संप्रयुज्य श्रोतृभ्यो नैकान्नर्थान् प्रकटीकुर्वन्ति। इत्थं वाग्व्यवहारस्य चरमं परमञ्च लक्ष्यम् अर्थाभिव्यक्तिरेवेति निश्चप्रचम्।

अतः पाणिनीयव्याकरणे साध्यरूपस्यार्थस्य किं स्थानम् अस्ति, तेन चार्थतन्त्वेन पाणिनि कानि कार्याणि साधयति, तस्य निरूपणमुदाहरणमुखेन क्रियतेऽत्र। पाणिनिना स्वकीये व्याकरणतन्त्रे सम्भाषणसन्दर्भस्य समुल्लेखः क्रियते न वा तदपि विचारणीयमास्ते।।

१

आधुनिकैर्भाषावैज्ञानिकैर्विचार्यते यद् भाषायाश्चतुर्थोऽयमर्थरूपो वर्ण्यविषयो विवेचनावसरे दुष्करः प्रतिभाति। यतोहि – भाषाया अर्थतत्त्वे वाच्यार्थेन सत लक्ष्यार्थस्य व्यङ्ग्यार्थस्य चानुपदं समावेशोऽनिरुद्धेन प्रजवेन च भवत्येव। अत एव च व्याकरणस्य ये ये चत्वारो वर्ण्यविषयाः (ध्वनिः, पदम्, व्यक्यम् अर्थश्चेति) सन्ति, तेभ्योऽर्थं निष्कास्य, ध्वन्यादयस्त्रयो विषया एव विवेचनीया इति केषाञ्चन भाषावैज्ञानिकानां

---

* महात्मागान्धीकाशीविद्यापीठस्य संस्कृतविभागेन वाराणस्यां समायोजिता "अखिलभारतीय संस्कृतवर्षव्याख्यानमाला" (24–27 नवं. 2000)। तत्र प्रस्तुतमिदं व्याख्यानम्।।

मतिः।' परन्तु पाणिनीयव्याकरणस्य याथार्थ्येन सूक्ष्मेक्षिकया च परीक्षणे क्रियामाणे सति, सूत्रकारोऽर्थतन्तूनपि संग्रथ्नात्येवेति दरीदृश्यते। व्यक्रियन्ते पृथक्क्रियन्ते शब्दा अनेनेति व्याकरणम् इति व्युत्पत्तिस्त्वित्थं कथयति यद् भाषायां वाक्यस्य प्रयोगः प्रथमं भवति, तदनन्तरं तत्र कानि पदानि सन्ति, पदे च का प्रकृतिः, कश्च प्रत्ययः इति क्रमशः पृथक्कृत्यान्ततो गत्वा कोऽस्ति प्रत्याय्योऽर्थः इति निरूप्यते। व्याकरणशब्दस्य पूर्वोक्ता व्युत्पत्तिस्तु भाषायाः पृथक्करणाय प्रवृत्तं किमपि तन्त्रजातं व्याकरणपदेनोच्यत इति व्याख्यां विवृणोति। एवमेव तत्रार्थतन्त्वमपि व्याकरणतन्त्राद् निष्पद्यमानम् अन्तिमं (Out-put) सोपानं दृश्यते। परन्तु व्याकरणशब्दस्यैतादृशी व्युत्पत्तिस्तु पाणिनीयतन्त्रय कृते नितराम् असमीचीना प्रतिभाति यतोहि – पाणिनीयतन्त्रेण किमपि वाक्यं पदं वा पृथक्क्रियतेऽर्थो वा निष्पाद्यतेऽवबोध्यते वा।

अत्र पाणिनीयतन्त्रे तु प्रकृतिः प्रत्ययेन सह संयोज्यते, तत्र च ये ध्वनिविकाराः परमावश्यकाः सन्ति, तेषां विधयो विधीयन्ते। अर्थात् पाणिनेरष्टाध्यायीरूपं यद्व्याकरणमस्ति, तस्य कृते तु "व्याक्रियन्ते = निष्पाद्यन्ते प्रथमं यथैकः इक्षुदण्डः (input रूपेण) प्रस्थाप्यते, तदनन्तरं यन्त्रेण निपीड्यमाने दण्डे, ततः इक्षुरसो (out-put रूपेण) बहिनिष्यन्दति, तथैव पाणिनीयतन्त्रेऽपि प्रथमे सोपान एव विवक्षितार्थस्य स्थापना क्रियते, तदनन्तरं तस्यार्थस्य वाचिका या प्रातिपदिकरूपा धातुरूपा वा प्रकृतिः स्यात्, सा वरणीयाऽस्ति। तस्याः प्रकृतेः पश्चात् विवक्षितकारक–कालवचनादि रूपस्यार्थजातस्य वाचकः कोऽपि विभक्तिसंज्ञकः प्रत्ययः संस्थाप्यते। ततश्च तयोः सम्मेलनं क्रियते। इत्थं पाणिनेर्व्याकरणं नास्ति पृथक्करणात्मकं, किन्तु संयोजनात्मकमस्ति। एवञ्चात्र पाणिनीय–तन्त्रेऽर्थतत्त्वम् इक्षुदण्डस्थानीयम् (input रूपम्) अस्ति, तन्त्राद् बहिर्निष्यन्दमानरसस्थानीयञ्च व्यक्यम् (Out-put रूपेण) अस्ति। अर्थात् भगवना पाणिनिना संस्कृतभाषाया व्याकरणनिरूपणावसरेऽर्थस्योपेक्षाऽवहेलना वा नैव कृता। प्रत्युत तन्त्रेऽस्मिन् विवक्षितार्थ–स्यावधारणा तु प्रथमे सोपान एवास्माभिः करणीयेति निर्विवादम्।

२

पाणिनेरष्टाध्याय्यां यद् व्याकरणं विलसति तद् आधुनिके भाषाविज्ञाने "वर्णनात्मकं शब्दनिष्पादकञ्च व्याकरणम्" (Descriptive and Generative grammar) इति नाम्नोच्यते।। अत्र शब्दनिष्पादकतन्त्रात्मकस्य पाणिनीयव्याकरणस्यारम्भबिन्दावेव

विपक्षितार्थस्य सङ्कल्पना निश्चीयते निवेद्यते वा। तदनन्तरं तस्यार्थस्य तद्वाचकध्वनि-सङ्केते परिवर्तनं भवति। ततश्च क्रमशः पदसिद्ध्या समं वाक्यसिद्धिरपि भवति। उदाहरणमुखेन यद्यस्य प्रदर्शनं क्रियते तर्हि—''राम लकडीसे चावल पकाता है'' इत्यस्ति मे विवक्षितार्थसमूहः। अत्र वर्तमानकालिकं विक्लित्यनुकूलात्मकं पाकक्रियारूपम् अर्थजातं रूढ़ितः सङ्केतितायां ध्वनिश्रेण्यां प्रकटीकरणाय पाणिनिना स्वकीये धातुपाठेऽर्थपुरस्सरं यद् धातुपारायणं क्रियते। तद्यथा – भू सत्तायाम् इत्यादि, ततः डुपचष् पाके, (भ्वादिगण ७.१८) स्वरितेत् धातुरित्यस्य चयनं क्रियते। एवमेव वर्तमाने लट् (३–२–१२–३) इति सूत्रमपि यत् प्रणीयते, तेन वर्तमानकालरूपस्यार्थस्य द्योतनाय – वचनाय वा लङ् इति शास्त्रीयः सङ्केतः स्वीक्रियते।

अत्र धातुपाठेऽष्टाध्यायीसूत्रे च सप्तम्यन्ते पदेऽर्थनिर्देशो विधीयते। तद्यश्च—डुपचष् पाके, वर्तमाने लडिति च। एवं पचतीति तिङन्तपदसिद्धौ प्रथमे सोपान एव (inputरूपेण) विवक्षितार्थस्य सङ्कल्पना स्थाप्यते, तदनन्तरं 'डुपचष्' रूपा धातुप्रकृतिः, 'लङ्' इति प्रत्ययश्चोद्भाव्य तयोः संयोजनं प्रारभ्यते। एवमेवाष्टाध्याय्यां कारकप्रकरणेऽ (१–४–२३)पि यदर्थरूपं तत्त्वं वक्तृश्रोत्रोः मनसि विलसति, तस्य किमपि पारिभाषिकं व्याकरणिकं नाम (=कारकसंज्ञा) प्रदीयते। तद्यथा ''साधकतमं करणम्। ध्रुवमपायेऽपादानम्'' इत्यादीनि कारकसंज्ञाविधायकानि सूत्राणि। अत्र 'साधकतमं', यद्वा, अपाये यद् ध्रुवम् (अवधिभूतं कारकं) इत्यादि अर्थतत्त्वम् अस्ति। करणम्, अपादानम् इत्यादयश्च कारकसंज्ञाः। तदनन्तरं विभक्तिपादे (२–३–१ तः २– ३–७३) कर्मकरणापादानादिरूपस्यार्थस्य प्रकटीकरणाय याः द्वितीयादयः विभक्तयः प्रभवन्ति तद्यथा – कर्मणि द्वितीया (२–३–२), कर्तृकरणयोस्तृतीया (२–३–१८) अपादाने पञ्चमी (२–३–२८) इत्यादिषु सूत्रेषु तासाम् उद्घोषणा श्रूयते।

अत्र विविधेषु विधिसूत्रेषु यानि सप्तम्यन्तानि पदानि श्रूयन्ते, तानि विविच्यन्ते। एकतः सन्ति– इको यणचि (६–१–७७), झरो झरि सवर्णे (८–४–६५), शश्छोऽटि (८–४–६३), आमि सर्वनाम्नः सुट् (७–१–५२), घेर्ङिति (७–३–१११), सिचि वृद्धिः परस्मैपदेषु (७–२–१), इत्यादीनि सूत्राणि। अपरतश्च सन्ति – क्षय्यजय्यौ शक्यार्थे (६–१–८१), आङो नाऽस्त्रियाम् (७–३–१२०), प्रातिपदिकार्थलिङ्गपरिमाण-वचनमात्रे प्रथमा। (२–३–४६), चार्थे द्वन्द्वः (२–२–२९), जनपदे लुप् (४–२–८१), परोक्षे लिट् (३–२–११५), लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३–३–१३९), इत्यादीनि सूत्राणि।

एकतो यानि 'इको यणचि' इत्यादीनि सूत्राणि सन्ति, तेषु निमित्तसप्तमी प्रयुक्ताऽऽस्ते। अर्थात् औश्लेषिकसप्तमी सा वर्णान्तरेणाव्यवडितस्य पूर्वस्य कार्यबोधिका भवति। परन्त्वत्र परतश्च क्षय्यजय्यौ शक्यार्थे (६–१–८१), चार्थे द्वन्द्वः (२–२–२९), यद्वा 'परोक्षे लिट्' (३–२–११५) इत्यत्र यानि सप्तम्यन्तानि पदानि प्रयुक्तानि दृश्यन्ते, तत्र तु वैषयिकी सप्तमी ग्रहीतव्या। अर्थात् तादृशी सप्तमी तु प्रथमे सोपाने विवक्षितस्यार्थ–स्योद्घोषणाय प्रयुज्यते। यदि शब्दान्तरेणोच्यते तर्हि – पाणिनिना पदसिद्धौ वाक्यसिद्धौ केऽर्थे रूपसिद्धेः प्रक्रियाद्य आरम्भबिन्दावेव विवक्षितार्थस्य स्थापना क्रियते। तद्यथा – अमुकोऽथैव्यच्ये सति लिट्लकारः प्रयोक्तव्यः लृङ्कारो वा। एवमेव 'भवतु' इत्यत्राशिषि वाच्ये सति, 'तु' इत्यस्य स्थाने तातङ्ङादेशो विधीयते। अस्य विमर्शस्यायमेवाशयो यद् भगवान् पापिनिः स्वकीये व्याकरणे संस्कृतभाषाया वर्णनावसरेऽर्थतत्त्वस्योपक्षां नैव करोति, प्रत्युतविवक्षितार्थस्य स्थापनां रूपसाधनिकायाः प्रथमे सोपाने कृत्वा, तदनन्तरमेव ध्वनिविकारान् वर्णयति, प्रकृतिप्रत्यययोः सम्मेलनञ्चादिशति।

३

पाणिनीयव्याकरणस्यार्थतत्त्वस्य न केवलम् आरम्भविन्दावेव स्थानं दृश्यते, कुत्रचित् पाणिनिः तस्यार्थतत्त्वस्य निमित्तांशे निर्देशं कृत्वाऽर्थभेदेन रूपभेदं, वैकल्पिकं रूपं वा जनयति। तद्यथा – (१) तस्माच्छसो नः पुंसि (६–१–१०३) इत्यत्र पुंस्त्वरूपो लिङ्गविशेषार्थो निमित्तदले विलसति, येन च रामान् – कवीन् इत्यादीनि रूपाणि भवन्ति। पुंस्त्वाभावे च मतीः नदीः इत्यादीनि रूपाणि भवन्ति। अत्र पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः न स्यात्, यतो हि मति – नदीन्यादिषु प्रातिपदिकेषु नास्त्यत्र पुंस्त्वम्।

(२) द्वितीयमुदाहरणम् – 'कालाध्वनोरत्यन्तसंयोगे' (२–३–५) इत्यनेन सूत्रेणान्तसंयोगे वाच्ये सति द्वितीया विधीयते कालावाचकाच्छब्दाद्, अध्ववाचकाच्छब्दादपि। यथा – द्वादशवर्षाणि व्याकरणमधीतम्। परन्तु 'अपवर्गे तृतीया' (२–३–६) इत्यनेन सूत्रकारः कथयति यद् अपवर्गशब्देन फलप्राप्तिरुच्यते, तस्यां द्योत्यायां काला–ध्वनोरत्यन्तसंयोगे तृतीया स्यात्। येन च द्वादशवर्षैर्व्याकरणमधीतम् इति विभक्तिभेदो भवति। अर्थात् 'द्वादशवर्षाणि' –'द्वादशवर्षैश्च' इत्यत्रार्थभेदेन रूपभेदः प्रादुर्भवति।

(३) तृतीयमुदाहरणम् – अचोऽन्त्यादि टि (१–१–६४) इत्यत्र शकन्ध्वादिषु पररूपं वाच्यम् इति वार्तिकवचनं वर्तते। येन शकन्धुः–कर्कन्धुः कुलटा–इत्यादयः शब्दाः साध्यन्ते। परन्तु तत्र सीमन्तः केशवेशे' इत्यनेन वार्त्तिकेन सीमन्तः – सीमान्तश्च इत्युभावपि शब्दौ विभिन्नार्थौ विलसतः इत्युक्तम्। एवं पाणिनीयव्याकरणे कुत्रचिद् अर्थभेदं निमित्तीकृत्य रूपभेदः प्रसाध्यते।

३

अस्मिन् व्याकरणशास्त्रे पाणिनिना न केवलम् अनुपेक्षणीयम् अर्थतत्त्वमुररीकृत्य वाक्यसिद्धिः प्रदर्शिता, किन्त्वर्थतत्त्वेन सह सम्भाषणसन्दर्भस्यापि भाषाप्रयोगे कीदृशः प्रभावः स्यात्तदपि सूक्ष्मेक्षिकया वर्णितम्। अत इदानीं वाग् व्यवहारकालेऽर्थतत्त्वादतिरिच्यमानः सम्भाषणसन्दर्भः कथं पाणिनीयसूत्रेषु निरुप्यते तदुदाहरणमुखेन प्रदर्श्यते।

(१) नादिन्याक्रोशे पुत्रस्य (८–४–४८) इत्यनेन पुत्रशब्दस्य न द्वेस्त आदिनीशब्दे पटे, आक्रोशे जभ्यमाने। तद्यथा – ''पुत्रादिनी त्वमसि पापे''। अत्र पुत्रवधूम् उद्दिश्य काऽपि श्वश्रूः कथयति इति लौकिको व्यवहारः सुविदितमेव। किन्तु यदा तत्त्वकथनं भवति तदा तत्र पुत्रशब्दस्य यरः द्वित्वं भवत्येव यथा ''पुत्त्रादिनी सर्पिणी''। अत्र लोके यः सम्भाषणसन्दर्भः पाणिनिनाऽवलोकितः, तमधिकृत्य रूपभेदस्य समुल्लेखः सूत्रबद्धः क्रियते।।

(२) युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः (१/४/१०५) इत्यनेन सूत्रेण तिङ्वाच्यकारकवाचिनि युष्मदि उपपदे प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः पुरुषः स्यादित्युक्त्वा, तदनन्तरमेव पाणिनिना ''प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च।'' (१–४–१०६) इत्यपि भणितम्। सूत्रेणानेन महर्षिः पाणिनिर्लोके प्ररिहासरूपं सम्भाषणसन्दर्भं लक्ष्यीकृत्य तिङ्प्रत्ययस्य युष्मदादिवाच्यपुरुषस्याऽसामानाधिकरण्यं वर्णयति। तद्यथा–''त्वं (युवां यूयं वा) मन्ये, अहं रथेन यास्यसि'' इति। अत्र वक्तुर्विवक्षितार्थः परिहासपूर्णोऽस्ति, येन 'त्वम्' इति युष्मद्वाच्यपुरुषेण सह मन्यतेदुत्तममुरुपस्य प्रयोगो भवितुमर्हति, 'अहम्' इति अस्मद्वाच्यपुरुषेण सत 'या' इति धातोः पश्चात् मध्यमपुरुषस्य प्रत्ययस्य योगो भवति। इदानीं 'त्वं मन्येऽहं रथेन यास्यसि' इत्यस्य वाक्यस्य योऽर्थः प्रतिभाति यद् ''त्वं यद्यपि मन्यसे यदहं रथेन यास्यामि, किन्तु वस्तुतस्तु मदीयो रथो दग्धः। अतः कथं त्वं रथेन यास्यसि? इति परिहासः। अत्र पाणिनिना सम्भाषणसन्दर्भानुसार विपरीता वाक्यनिष्पत्तिरपि स्वकीये व्याकरणे कथं व्युत्पादनीयेति वर्णितम्।।

(३) परोक्षे लिट् (३—२—११५) इत्यनेन भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्याद् इत्युक्त्वा, भगवता पाणिनिना परोक्षकालरूपमर्थम् प्रकटीकर्तुम् लिट्लकारस्य विधानं समुपदिष्टम्। किन्तु तत्र कात्यायनेन "परोक्षे लिड् अत्यन्तापह्नवे च" इति वार्तिकं प्रस्तावितम्। येन च वाग्व्यवहारकाले यदि कश्चिद् वक्ता श्रोतुः कामपि वार्तां निषेद्धुम् अभिलषति तर्ह्यपि लिट्लकारस्यैव प्रयोगं करोति। तद्यथा — "नाहं कलिङ्गान् जगाम" इति प्रदर्शयति।

(४) क्षेपे, गर्हायाम्, भूषणे, संज्ञायाम्, आक्रोशे इत्यादिभि र्बहुभिः शब्दैः पाणिनिः सम्भापणसन्दर्भान् सूत्रबद्धान् कुरुत एव। एवमेव, वार्त्तिककारो तं मुनिमनुसृत्य व्यवहारकाले दृश्यमानान्, नूतनाविर्भूतान् सम्भाषणसन्दर्भान्नपि बहुशः परिगणयति भिन्नेषु वार्त्तिकेषु। तद्यथा — अभूततद्भावेच्विः। अभ्यर्दितञ्च (पूर्वम्)। इत्यादीनि वार्तिकानि।।

इत्थं पाणिनीयव्याकरणं यदि वर्णनात्मकं शब्दनिष्पादकञ्च तन्त्रं स्यात् तर्हि तदपि विदुषां दृष्टिपथगामि भवितुमर्हति यद् पाणिनिनाऽर्थतत्त्वस्य स्वकीये तन्त्रे समावेशः कृत एव। तथा वाक्यसिद्धेरारम्भविन्दावेव विवक्षितार्थस्य सङ्कल्पना प्रस्थापिता दृश्यते। तदनन्तरमेव प्रकृतिप्रत्यययोः सम्मेलनमुपदिश्यते। एवमेव — यदीदं वर्णनात्मकं व्याकरणं स्यात् तर्हि तत्र लोके प्रचलितो यः कश्चित् सम्भाषणसन्दर्भः स्यात्, तदपि सूत्रे सङ्ग्रन्थनामर्हति। पाणिनिनोभयविधस्यापि व्याकरणस्येतिकर्तव्यता सुचारूपेण परिपालितेति सप्रमाणं वक्तुं पार्यते।।

संदर्भाः

1. The role of and approach to meaning in language is an important and vexatious theme of inquiry. Formerly, many American linguists, in a mood of strong rejection of traditional grammar and influenced by a rather extreme behavioristic position, viewed meaning with suspicion... some have said that meaning lies totally outside the linguistic system, that it is a sort of net work between cultural systems; some feel that it is to be analyzed as a quite separate problem. others, that it must be constantly taken into consideration.

   See : *American School of Linguistics;* by Eric. P. Hamp; published in "**Linguistics**", Ed, by Archibald A. Hill, Voice of America Forum Series, Washington. Reprinted in 1978, Pages - 280.

संस्कृत परिषद के महत्त्वपूर्ण प्रकाशन
संस्कृत विभाग
डॉ.हरीसिंह गौर विश्वविद्यालय, सागर - 470003 (म.प्र.)

1. **अप्राप्त नाट्यशास्त्रीय ग्रन्थ** : (1987) राधावल्लभ त्रिपाठी, मूल्य 20रु.
2. **अर्वाचीनसंस्कृतमहाकाव्यानुशीलनम्** (1861–1970) : (1981) रहसबिहारी, (अप्राप्त) ।
3. **आदिकविवाल्मीकि** : (1981) हिन्दी में , राधावल्लभ त्रिपाठी, मूल्य 25 रु.
4. **आधुनिकसंस्कृतसाहित्यानुशीलनम्** : (2022 वि.सं.) रामजी उपाध्याय, मूल्य 30 रु. ।
5. **आयाति** : (1998) समकालिक संस्कृत काव्य सङ्ग्रहः, राधावल्लभ त्रिपाठी, मूल्य 25रु. ।
6. **कर्णभार** : (1985) डॉ. फतेहसिंह, (सचित्र) मूल्य 10रु. ।
7. **कवि भवभूति और उनका नाट्यलोक** : (1987) राधावल्लभ त्रिपाठी, मूल्य 50रु. ।
8. **कालिदास की समीक्षापरम्परा** : (1988) राधावल्लभ त्रिपाठी, मूल्य 30 रु.
9. **कालिदासपरिशीलन** : (1988) राधावल्लभ त्रिपाठी, मूल्य 20रु. ।
10. **कुन्दमाला** : (1982) संस्कृत नाटक का सरस सुपाठ्य हिन्दी अनुवाद, अनु. राधावल्लभ त्रिपाठी, (अप्राप्त) ।
11. **नाट्यमण्डपम्** : (1981) प्राचीन भारतीय रंगमंच पर नया प्रकाश, राधावल्लभ त्रिपाठी, मूल्य 20 रु. ।
12. **नाट्यशास्त्र के बीजशब्द (द्वितीय भाग)** : (1986) राधावल्लभ त्रिपाठी, कुसुम भूरिया, (अप्राप्त) ।
13. **न्यायसत्रम्** : (1984) राधावल्लभ त्रिपाठी, मूल्य 60रु. ।
14. **पञ्चवटी (अनुवादकाव्य)** : (2002) राधावल्लभ त्रिपाठी, मूल्य 50 रु. ।
15. **पार्वतीपरमेश्वरीयम्** : (1966) संगीतिका, वनमाला भवालकर, मूल्य10रु.
16. **प्रख्या I** : संस्कृतकाव्य सीरीज, राधावल्लभ त्रिपाठी, मूल्य 30रु. ।
17. **प्रबुद्धरौहिणेय** : (1983) संस्कृत नाटक का हिन्दी अनुवाद, राधावल्लभ त्रिपाठी, (अप्राप्त) ।
18. **भरटकद्वात्रिंशिका** : (1987) प्राचीन कथा संग्रह , राधावल्लभ त्रिपाठी, मूल्य 15रु. ।
19. **भारतीयनाट्य : स्वरुप और परम्परा** : (1988) राधावल्लभ त्रिपाठी मूल्य 25रु. ।

20. **भारतीयरङ्गवृत्तम्** : (1982) प्राचीन नाट्यपरंपरा पर शोध कृति, राधावल्लभ त्रिपाठी, (अप्राप्त)।
21. **मुकुन्दविलासम्** : अप्रकाशित दुर्लभ महाकाव्य, राधावल्लभ त्रिपाठी, मूल्य 15 रु.।
22. **रसार्णवसुधाकर** : रेवाप्रसाद द्विवेदी, मूल्य 30रु.। (अप्राप्त)
23. **रामवनगमनम्** : (1965) संगीतिका, वनमालाभवालकर, मूल्य 10 रु.
24. **लहरीदशकम्** : (1991) संस्कृत काव्यसंग्रह, राधावल्लभ त्रिपाठी, (अप्राप्त)।
25. **वाक्त्रयी** : (2001) पालि–प्राकृत–अपभ्रंशसंग्रह, अच्युतानंद दाश, द्विसं. मूल्य 40रु.।
26. **वाल्मीकि विमर्श** : राधावल्लभ त्रिपाठी , संस्कृत में (अप्राप्त)।
27. **वेददीपिका** : (1994) बालशास्त्री, रमाकान्त पांडेय, (अप्राप्त)।
28. **शब्दादर्श** : (द्वि.सं. 2002) बालशास्त्री, रमाकांत पाण्डेय, मूल्य 50रु.।
29. **श्री हर्ष के रूपक** : (1981) गोकुलप्रसाद त्रिपाठी, मूल्य 40रु.)
30. **संस्कृत कविता की लोकधर्मी परम्परा** : (1986) राधावल्लभ त्रिपाठी, मूल्य 30रु.।
31. **संस्कृत कवियों के व्यक्तित्व का विकास** : (1976) राधावल्लभ त्रिपाठी, मूल्य 25रु., (अप्राप्त)।
32. **संस्कृत साहित्य को इस्लाम परम्परा का योगदान** : राधावल्लभ त्रिपाठी, मूल्य 70 रु., (अप्राप्त)
33. **सन्धानम्** : (1989) संस्कृत काव्यसंग्रह, राधावल्लभ त्रिपाठी, मूल्य 25रु.
34. **सरलसुभाषितमालिका** : (2001) धर्मेन्द्रकुमारसिंहदेव, मूल्य 50 रु.।
35. **साहित्यसन्दर्भाः** : (1970) रेवाप्रसाद द्विवेदी, मूल्य 30 रु.।
36. **सिद्धान्तसम्राट्** : (1976) ज्योतिष ग्रन्थ, उ.प्र. शासन से पुरस्कृत। मूल्य15रु.
37. **सिन्धुलिपिरहस्योद्घाटनम्** : (1970) फतेहसिंह , (सचित्र) (अप्राप्त)।
38. **सुशीला (प्रेक्षणकम्)** : (2002) राधावल्लभ त्रिपाठी, मूल्य 80 रु.।
39. **सुसंहतभारतम्** : संस्कृत नाटक, रामचुन्द्रुडु, मूल्य 10रु.।
40. **सूत्रधारवृत्त** : (1991) राधावल्लभ त्रिपाठी, कुसुम भूरिया, मूल्य 15 रु.

प्राप्तिस्थान : संस्कृत परिषद्, संस्कृत विभाग, विश्वविद्यालय, सागर

नोट - संस्कृत परिषद् के प्रकाशन पर पुस्तक विक्रेताओं के लिए 25% छूट का प्रावधान है। डाक व्यय अतिरिक्त।

सागरिका समिति पंजी.क्र. 867 NEWS PAPER'S
· REG. NO. 13073/67

सागरिका

षट्त्रिंशद्वर्षेभ्यो निरन्तरं
प्रकाश्यमाना अन्ताराष्ट्रियख्यातिं गता
संस्कृतशोधपत्रिका

सागरिकासमितेः प्रकाशनम्

पूर्वं प्रकाशिता सागरिकाया विशेषाङ्काः

१.	भारतीयसंस्कृतिविशेषाङ्कः	नवमवर्षे
२.	विश्वसंस्कृतसम्मेलनविशेषाङ्कः	दशमवर्षे
३.	कालिदासविशेषाङ्कः	द्वादश–त्रयोदशवर्षयोः
४.	ज्योतिषविशेषाङ्कः	षोडशवर्षे
५.	नाट्यवेदविशेषाङ्कः	सप्तदशवर्षे
६.	मध्ययुगीनं संस्कृतनाटकविशेषाङ्कः	अष्टादशवर्षे
७.	भट्टतोत–विशेषाङ्कः	द्वाविंशवर्षे
८.	रजतजयन्तीविशेषाङ्कः	पञ्चविंशवर्षे
९.	प्राचीनभारतीयसमाजदर्शनविशेषाङ्कः	ऊनत्रिंशवर्षे
१०.	मनुस्मृतिविशेषाङ्कः	त्रयस्त्रिंशवर्षे
११.	आधुनिकसंस्कृतसाहित्यविशेषाङ्कः	पञ्चत्रिंशवर्षे
१२.	संस्कृतगौरवविशेषाङ्कः	षट्त्रिंशवर्षे
१३.	संस्कृतव्याकरणविशेषाङ्कः	षट्त्रिंशवर्षे